सनातनजैनग्रंथमालायाः

षष्ठांकं ।

५

आचार्यवर्य श्रीगुणनंदिविरचिता

जैनेंद्रप्रक्रिया ।

(पूर्वार्द्ध)

सत्संधिं दधते समासमभितः ख्यातार्थनामोन्नतं
निर्वातं बहुतद्धितं क्रममिहाख्यातं यशःशालिनां ।
सैषा श्रीगुणनंदितानितवपुः शब्दार्णवं निर्णयं
नावत्याश्रयतां विविक्षुमनसां साक्षात्स्वयं प्रक्रिया ॥

संपादकः—

श्रीलालजैन व्याकरणशास्त्री ।

प्रकाशकः—

पन्नालालजैनमंत्री भारतीयजैनसिद्धांतप्रकाशिनीसंस्था काशी

वीरनिर्वाण संवत् २४४० । इस्वी सन् १९१४ ।

मूल्य उत्तरार्द्धसहित १॥) [उत्तरार्द्ध छपते ही भेजदेंगे ।

प्रिंटर अलोपीप्रसाद ई. जे. लाजर्स मेडिकलहालप्रेस बनारस ।

विज्ञप्ति।

विदित हो कि यह जगत्प्रसिद्ध अष्ट व्याकरणों में से जैनेंद्र (शब्दार्णव) व्याकरणकी प्रक्रिया टीका है। बहुत दिनों से इसके उद्धारकी चर्चा करते २ अब श्रेष्ठिवर्य नाथारंगजी गांधी की द्रव्यसहायता से यह प्रक्रिया मात्र छपने लगी है। यह प्रक्रिया जैनेंद्रव्याकरणके रचयिता प्रसिद्ध जैनाचार्य पूज्यपाद (देवनंदि) स्वामीके शिष्य वा प्रशिष्य आचार्यवर्य श्रीगुणनंदिस्वामी के द्वारा बनाई गई है यह प्रक्रिया बहुत ही उपयोगी है शब्दार्णव में विचरण करने के लिये यह नवका की समान है। अर्थात् इस को पढ़ लेनेसे विद्यार्थीमें शब्दार्णवचंद्रिका लघुवृत्ति, महावृत्ति आदि टीका तथा शब्दार्णवनिर्णय नामके भाष्य व न्यास वगैरहके पढ़ने वा समझनेकी शक्ति हो जाती है। इस के जीर्णोद्धार होने से एक विलक्षण बात यह ज्ञात हुई कि हमारे देश में जो इसव्याकरणका सूत्र पाठ है वह अपूर्ण है अथवा परिवर्तित (लौट फेर) किया हुआ नकली सूत्रपाठ है। पंचवस्तु, अभयनंदिस्वामीकृत महावृत्ति में भी सूत्रपाठ असली नहीं है। उसमें ६२० तौ सूत्र ही नहीं है उनकी जगह अभयनंदिस्वामी ने अथवा अन्य किसीविद्वानने पाणनीय व्याकरणकी त्रुटियां दिखलानेवाली कात्यायनीकृत वार्तिकोंकी तरह नवीन वार्तिकें बनाकर काम लिया है। तथा अनेक सूत्र परिवर्त्तन करके पाणिनीयव्याकरणके सूत्रोंकी तरह बना दिये हैं जिससे इससूत्रपाठ वा महावृत्तिको देखकरपाणिनीयभक्त विद्वानोंको यह श्रद्धा न हो सकता है कि पूज्यपादस्वामी में स्वतंत्र व्याकरण बनाने की शक्ति नहीं थी, पाणिनीयव्याकरणके सूत्रों कोही लौटफेर करके एक नया सूत्रपाठ घड़लिया है परंतु वास्तव में ऐसा नहीं है अन्वेषणकरने से कर्णाटकदेश में असली सूत्रपाठ व असली सूत्रपाठ पर बनीहुई यह प्रक्रिया तथा सोमदेवकृत शब्दार्णवचंद्रिका नाम की लघुवृत्ति प्राप्त हुई है इसमें सूत्रपाठ पूर्ण है महावृत्तिकी तरह कहीं भी वार्तिक नहीं है जिसके देखनेसे विद्वत्समाज कहैगा कि सर्वोपयोगी व्याकरण है तो यही एक जैनेंद्रव्याकरण है और संस्कृतकालेजो में भरती करने योग्य है कलकत्ता यूनिवर्सिटीमें भरती भी होगया परंतु सब ग्रंथोंका कर्णाटकी लीपीमेंसे जीर्णोद्धार करके छपाना बहुपरिश्रमसाध्य व द्रव्यसाध्यकार्य है। शब्दार्णवचंद्रिका टीका व असली सूत्रपाठकी प्रेसकापी तैयार है अनेक धनपात्रोंसे इनके उद्धारार्थ द्रव्यसहायताकी प्रार्थनाभी की गई परंतु अभीतककिसीने भी उदारताका उत्तर नहीं दिया। आशा है कि इस प्रक्रियाके पूर्वार्द्धको देखनेसे पढानेसे जैनी विद्वान् इस व्याकरणके जीर्णोद्धारार्थ अवश्य ही कुछ न कुछ प्रयत्न करेंगे। प्रा. मंत्री।

सनातनजैनग्रंथमाला।

५

आचार्यवर्य्य श्रीगुणनंदिविरचिता

जैनेंद्रप्रक्रिया।

६—१२

संपादकः—

श्रीलाल जैन व्याकरणशास्त्री।

प्रकाशकः—

पन्नालालजैनमंत्री भारतीयजैनसिद्धांतप्रकाशिनीसंस्था काशी

मुद्रकः—

अलोपीप्रसादः ई. जे. लाजर्समेडिकलहालयंत्रालयाध्यक्षः

गौरीशंकरलालश्चंद्रप्रभायंत्रालयस्य व्यवस्थापकश्च।

वीरनिर्वाण संवत् २४४१। ईस्वी सन् १९१४।

प्रथमावृत्तिः]

[मूल्यं सार्द्धरूप्यकं।

प्रस्ताव ।

सत्स्वपि नैकविधेषु व्याकरणशास्त्रेषु कथंचिच्छन्दसिद्धिमवधारयत्सु पाणिनीयमुग्धबोधादिषु यदिदं प्रकाशपदमानीतन्तत्रास्यापरिशीलितमनीषिप्रवेष्टव्यत्वाखिलाङ्गसौंदर्यादिगुणगणं विहाय नो निमित्तान्तरं । तदेवेदं व्याकरणशिरोमणीयमानं व्याकरणं यद्विरचयितृविषये **श्रीवोपदेवनिर्मितधातुपाठे** दरीदृश्यते वाचोयुक्तिरियं—

इंद्रश्चंद्रः काशकृत्स्नापिशलीशाकटायनाः ।
पाणिन्यामरजैनेन्द्रा जयंत्यष्टादिशाब्दिकाः ॥

अस्ति यथार्थनामास्य शब्दार्णवस्तथाप्येतन्निर्मातुर्देवनंदिपूज्यपाद जिनेंद्रबुद्ध्यादिनैकाभिधया प्रकाश्यमानतयैनज्जैनेंद्रमित्याचक्षते लोकाः ।

यदिदमायाति दृष्टिपथमधुना भवतां प्रथरत्नं, वर्तते तदस्यैव जैनेंद्राभिधयाभिधीयमानस्य **शब्दार्णव**व्याकरणस्य शाकटायनादिप्रक्रियां तत्पुरातनतमेयं प्रक्रिया । संस्कृतप्रविविक्षूणामल्पमतीनामपि सुकरः प्रवेशोऽध्ययनेनास्याः। लघुरपीयमावहति सामान्यकार्यकरमाखिलसूत्रसंदोहभरं । केवलामपीमामधीयतामाशु भवति सुदुस्तरोपि संस्कृतमहोदधिस्सुखेनैव क्षणेकतरः । प्रवेशयति चेयमखिलटीकासु यत्र तत्रोपलभ्यमानासु **शब्दार्णवचंद्रिका**प्रभृतिषु सारल्येन । कृतश्चाचार्येणास्यां प्रकरणविभागः संधिनामसमासद्धदंतमिङंतकृदंतेति षोढा। तथा चोक्तं—

---

१ यो देवनंदिप्रथमाभिधानो बुद्ध्या महत्या स जिनेंद्रबुद्धिः ।
श्रीपूज्यपादोऽजनि देवताभिर्यत्पूजितं पादयुगं तदीयं ॥

संघेर्नाम्नः समासस्य तद्धिर्मिकृतोरपि ।
संक्षेपादज्ञसंज्ञप्त्यै प्रक्रियामवतारये ॥ १ ॥

विषयाणामेषामेतादृश्यवतारिता प्रक्रियाऽऽचार्यवरेण यथा सततप्रयुज्यमानानां तेषां न कस्यचिदवशेषो यो हि नोदाहृतोऽस्यां । उपलभ्यते चास्यां प्रक्रियांतरानुपलभ्यमाना सुसमीचीनानर्घा रीतिर्येदुदाहृताः सौगम्याय संधिषु पूर्वावस्थाः षड्लिंगे शब्दोत्पादका धातवस्तथाश्चाजंतहलंताशेषशब्दाः समासे विग्रहास्तद्धिते सार्थप्रत्यया मिकंते धातूनां सर्वरूपाणि कृदंते चार्थपुरस्सरमुख्यमुख्यविषयाः । नास्ति कश्चिदवशिष्टोऽजंतेषु हलंतेषु वा शब्दो यस्य नोदाहृता रूपनयनरीतिः। एवमतिहितकारिण्याः निखिलव्याकरणाङ्गसुशोभितायाश्चास्याः कर्ता सुगृहीतनामधेयो महनीयपादो श्रीमदाचार्यवरो गुणनंदी कदा धारामंडलमिमं मंडयामास स्वशरीरमंडनेनेति न पार्यते निर्णेतुं जैनेतिहासप्राप्त्यप्राप्तितयेति महद्दुःखेनावद्यते, परं तथापि नंदिसंघपट्टावलिलेखमनुसृत्य शक्यते वक्तुं यदनेनाचार्यवरेण जैनेंद्रसूत्रपाठनिर्मातुः पूज्यपादपूज्यपादाचार्यशिष्यशिष्येण भाव्यं। तदनुसारतोऽस्य [illegible] २९४ तमे संवत्सरे संभाव्यते ।

नासीत्सत्त्वोत्तरखंडे भारतस्यास्याः सर्वोपकारिण्याः प्रक्रियायाः प्राक् प्रकाशनात्। अलाभ्यत्र संध्यादिपंचवस्तुसमन्वितान्वितार्था पंचवस्तु नाम्नी लघीयसी प्रक्रिया सा हि न व्याकरणसर्वस्वप्रदीपिका छात्रजनातिहितकारिणीत्यतो नाध्ययनाध्यापने प्राचरत्, नापि प्राचारयत प्रचारकैः। समवलोक्य चेमामेतादृशीमन्याञ्चाचार्यकृतामनुपलभ्यमानामुदिधीर्षुर्जैनेंद्रव्याकरणं लब्धवर्णसंदोहस्सांप्रतिकपंडितसाहाय्येनाभिनवां प्रक्रियामुदचिकीर्षत्। परं न तत्र सततं विघ्नव्यूहव्याहन्यमानतया साफल्यमुपेयिवान् । अत्रांतराल एवाश्रांतपरिश्रमणोद्दिधीर्षवो

जैनांकितं पुरातनं वाङ्मयं तदुन्नयदत्तसर्वस्वाः पूज्यतम पं० **पन्नालाल बाकलीवालाः** दक्षिणप्रांतस्थविद्वच्छ्रेष्ठ के. **कुमारैया** महाशयसाहाय्येन तालपत्रस्थकार्णाटिकलिपिलिखितामेनां प्रक्रियामुपालभंतातिश्रमेण। विलोक्य चैनामुपयोगिनीं तदभावाभावनिष्पादनसमर्थां प्रकाशयितुमनसो मां कर्णाटकलिपिमध्येतुं प्रैरयन्। माननीयो गुरूणामनुग्रहः, इत्यवहितचेतसा मयापि विहितो यत्नो गरीयसायासेन, अवाप्नुवञ्चातिसाफल्यमराभि च नागरीलिपिप्रातिछंद्यमानां तां कर्तुम्। सम-पादि च तेनैवैकपुस्तकेन बहुकालमतो नाशक्नुवमङ्कान्प्रदातुं सूत्रसंख्यासख्यापकान्, अवशिष्टा च शंकितस्थलबहुलताऽऽक्षरसाम्यान्नवलिपिसप्रवेशात्पुस्तकैक्याच्च। गते चानल्पसमये तैरेव पं० **के. कुमारैया**महोदयैरनुग्रहवशतया प्रेषितं पुस्तकांतरं। परं नासीत्तच्छुद्धमासीच्चास्यैवानुकृतिरिति न साहाय्यमवाप्तं तेन। तदन्तरे **बाबू चंद्रसेन** जैनवैद्यमहोदयैः**शब्दार्णवचंद्रिका**स्यैवलघुवृत्तिरनुगृह्य प्रेषिता। सासीदतीव शुद्धा प्राचीनतमा चेति महत्साहाय्यमवत्तमिति चिरमनुगृहीतास्तेषां। समभीप्सतां विद्याभिवृद्धिमेतेषामुपरि विनिवेदितमहाशयानां नो विस्मरिष्यामो महदेतदुपकारभरम्। कालनिर्णयादिकं चाचार्यवरदेवनंदिपादानां प्रकाशयिष्यामो यथासाधनं शब्दार्णवचंद्रिकाप्रस्तावनोल्लेखसमये।

समुपलभ्यंते चास्य जैनेंद्र (शब्दार्णव) व्याकरणस्य निम्नलिखितानि व्याख्यानादीन्यधुना—

१ **पंचवस्तु**—(लघुजैनेंद्र)-लघुकौमुदीसदृशी लघीयसी प्रक्रियेषा।

२। **जैनेंद्रप्रक्रिया**—(लघुः) आचार्यवरगुणनंदि विरचिता नातिलघ्वी संस्कृतपिपाठिषुमहद्धितकरी प्रक्रियातो मुद्रापितेयमखिलटीकातः प्राक्।

३ । जैनेंद्र प्रक्रिया—(गरीयसी) श्रीमद्विद्वच्छिरोमणि पं० वंशीधरमहानुभावैर्विरचिता सिद्धांतकौमुदीमस्पृहमाणातिमहती प्रक्रियेयमपि मुद्राप्यते तैरेव शोलापुरनगरे।

४ । शब्दार्णवचंद्रिका—(जैनेंद्रलघुवृत्तिः) श्रीमदाचार्यवरश्रीसोमदेवसूरिविरचिता निखिलसूत्रार्थप्रकटनकरी नातिमहती वृत्तिरियमपि मुद्राप्यतेऽत्र ।

५ । जैनेंद्रमहावृत्तिः—श्रीमदाचार्य—**अभयनंदि**विरचिता पाणिनीयकाशिकावृत्तितोपि महद्व्याख्यानदीपिका । मुद्राप्यते काश्यामन्यत्र ।

६ । न्यासः—श्रूयते समुपलब्धिर्दक्षिणप्रान्तेऽस्य । प्रयत्यते तदुपलब्धये ।

विरम्यते चांतेर्थयित्वाखिलमहाशयपुरस्तात् प्रमादविहिताशुद्धीरवक्षन्तुं नतिपुरस्सरमावेद्य चेदमिति शम् ।

गच्छतस्स्खलनं क्वापि भवत्येव प्रमादतः ।
हसंति दुर्जनास्तत्र समादधति सज्जनाः ॥

विदुषामनुचरः
श्रीलालजैनः ।

परिशिष्ट नं. १

८० तमपृष्ठस्य च्युतपाठः ।

शुनः । शुना । श्वभ्या । श्वभिरित्यादि । तथा युवन् मघवन् शब्दयोरस्युशि कृते दीर्घभवतः । यूनः । यूना । युवभ्यामित्यादि । मघोनः । मघोना । मघवभ्यामित्यादि नेयं । करिन्शब्दस्य भेदः । ततः स्वादयः । इन्हन्नित्यादौ वर्तमाने—

२८८(क) सौ । ४ । ४ । १० । इन्नादीनां किवर्जिते सौ दीर्भवति । करी । करिणौ । करिणः । हे करिन् । हे करिणौ । हे करिणः । करिणं । करिणौ । करिणः । इत्यादि । तथा हस्तिन् शिखिन् गोमिनित्येवमादयः । पथिन् शब्दस्य भेदः "सावनड्डुहः" इत्यधिकृत्य—

२८८ (ख) पथिमथ्यृभुक्षणामात् । ५ । १ । ६६ । पथिन् मथिन् ऋभुक्षिन् इत्येतषामाकारादेशो भवति सौ परतः । सोरित्वविसर्जनीयौ ।

२८८ (ग) एद्धे । ५ । १ । ६७ । पथ्यादीनामवयवस्येकारस्याकारादेशो भवति धे परतः ।

२८८ (घ) थो न्थः । ५ । १ । ६८ । पथ्यादीनां थकारस्य स्थाने न्थो भवति धे परतः । पन्थाः । पन्थानौ । पन्थानः । हे पन्थाः । हे पन्थानौ । हे पन्थानः । पन्थानं । पन्थानौ । शसादौ-

परिशिष्ट नं. २

४२ तमस्थच्युतपाठः

६६ (क) श्यनप्सुद्धं । १ । १ । ३२ । शिअनप्सुद् च घसंज्ञं भवति ।

शुध्यशुद्धिपत्रम् ।

पृष्ठांकाः	पंक्तयः	अशुद्धिः	शुद्धिः
६	७	हकाराद्वर्जित	हकाराज्वर्जित
८	८	,,	,,
१३	६	व्यंत्यादचः	व्यंत्याद्यचः
१६	९	झयः (वृत्तिः)	पदांतादुत्तरस्य हकारस्य पूर्वस्वं वा भवति
१७	८	कुङ्कूशेते	क्रुङ्कूशेते
२१	२१	कष्फाडिकः	कष्षडिकः
३४	१	जशः शी	जसः शी
३९	६	च कृतेऽय-	चाकृतेऽय-
,,	१८	सर्वशब्दवत्	धर्मशब्दवत्
४३	३	मुनीं	मुनिं
४४	१७	मृदः परस्य	मृदः पदस्य
४६	१७	क उप्	क इल् ?
४७	१६	गिनाक्	गिवाक्
५२	१८	एवं मातृ	एवं भ्रातृ
५५	१९	ग्गौशब्दः	ग्लौशब्दः
५७	१८	हे जरसे	हे जरसौ
५८	१२	उत्तर—	अंतर—
६१	१३	मोरव—	गौरव—
६६	१२	चमूजमू	चमूजनू

पृष्ठांकाः	पंक्तयः	अशुद्धिः	शुद्धिः
,,	१३	भृमेश्चड्—	भ्रमेश्च डूः
,,	१९	हे भोरि—	हे भूरि—
६९	८	अनेक—	नैक
७१	१०	दध्यक्षोऽनङ्	दध्यक्ष्णोऽनङ्
७५	६	मित्रद्रुक्	मित्रध्रुक्
८२	७	डकारांतः प्राड्शब्द	ढकारांतः प्रौढ् शब्दः।
८३	१	सृग्	स्रग्
८५	१०	विक्रिड	विक्रीड्
,,	,,	क्रुड्	क्रीड्
८८	२१	उद उत्तरस्य	उद उत्तरस्य भस्य
९०	१७	नुम् भवति	नुम् अखं च न भवति
,,	२०	प्रैत्यादि	प्रत्यादि
९१	२०	स्महतौ	स्महतोः
९७	१३	लकारजकारां—	लकारञकारां—
१०१	१	गर्दप्। गर्दब्	गर्धप्। गर्धब्
१०५	४	भ्यसोऽत्	भ्योऽसोऽत्
१०९	१२	कृतमित्यादिना शिनि-	कृकम्यादिना सिनिषेध
११३	१२	गुणोक्तोरु	गुणोक्तेरु
,,	१४	पृदुः पृद्वी	पृथुः पृथ्वी
११८	५	द्विरुक्तैरधोऽभिः	द्विरुक्तैरधोभिः
११९	१३	गार्गः	गार्ग्यः

श्रीपूज्यपादाय नमः ।

सनातनजैन ग्रंथमाला ।

५

आचार्यवर्य श्रीगुणनंदिविरचिता

जैनेंद्रप्रक्रिया ।

सर्वज्ञाय नमस्तस्मै वीतक्लेशाय शांतये ।
येन भव्यात्मनश्चेतस्तमस्तोमश्चिकित्सितः ॥ १ ॥

अथ प्रत्याहारक्रमोऽनुवर्ण्यते—

अ इ उ ण् । ऋक् । ए ओ ङ् । ऐ औ च् । ह य व र लण् । ञ म ङ ण न म् । झ भ ञ् । घ ढ ध ष् । ज ब ग ड द श् । ख फ छ ठ थ च ट त व् । क प य् । श ष स अं अः ᳵक ᳵप र् । हल् । इति प्रत्याहारसूत्राणि[1] । उक्तं च-

स्युस्त्रयोदशसूत्राणि तावंतश्चानुबंधकाः ।
षट् चत्वारिंशतो वर्णाः प्रत्याहारस्य संग्रहे ॥

इति सर्वे वर्णाः अलित्युच्यते । तत्कथं—

---

१ । महावृत्तिपंचवस्त्वादिषु पाणिनीयप्रत्याहारसूत्रवत्प्रत्याहारसूत्राणि वर्तंते ।

१ । **सात्मेतादिः**[1] । १ । १ । इता सहोच्चार्यमाणो-वर्णः समुदायो वा आदिभूतस्तन्मध्यपतितानां संज्ञा भवत्यात्मना सह । कथमित्संज्ञा—

२ । **अप्रयोगीत्**[2] । १ । २ । इह शास्त्रे संव्यवहाराथोपदिश्यमानो वर्णः समुदायो वा यो लौकिकशब्दप्रयोगे न श्रूयते स इत्संज्ञो भवति । शास्त्रे कार्यार्थमापद्यमानो लोके चाश्रूयमाणो यः स इत्संज्ञो भवति इत्यर्थः । एवं अच् हल् वल् इत्यादयो योज्याः । यस्येत्संज्ञा तस्य लोपः । कथं पुनरिहानुपदिष्टा द्विमात्रत्रिमात्रा दीर्घप्लुता गृह्यंते । स्वग्रहणात् । कथं—

३ । **स्वस्याभाव्योऽतपरोऽणुदित्**[3] । १ । १ । अण् च उदिच्च गृह्यमाणः स्वस्य ग्राहको भवति आत्मना सह भाव्यं तपरं च वर्जयित्वा । इत्यणा द्वित्रिमात्राणां ग्रहणं भवति । कोऽयं भाव्यः—

आदेशः प्रत्ययश्चैव कटमितो हि लक्षणे ।
भाव्यशब्देन पंचैते कथ्यंते देवनंदिभिः ॥

तपरं किं नाम—

तात्परं च तत्पूर्वं च स्वं न गृह्णात्यणां कुलं ।
विग्रहद्वयसंकल्पाद्यथाऽदेङेविति स्मृतौ ॥

---

१ । अस्य स्थाने महावृत्तौ अंत्येनेतादिः । १ । १ । ७३ । इति सूत्रमुपलभ्यते । २ अस्य स्थाने महावृत्तौ कार्यार्थोऽप्रयोगीत् । १ । २ । ३ । इति सूत्रं वर्त्तते । ३ अस्य स्थाने महावृत्तौ-अणुदित्स्वस्यात्मनाऽभाव्योऽतपरः । १ । १ । ७२ । इति सूत्रं दृश्यते ।

किं पुनः स्वं नाम—

४ । **सस्थानक्रियं स्वं** । १ । १ । यस्य वर्णस्य स्थानं क्रिया च येन वर्णेन समानं भवति स तेन तुल्यस्थानक्रियत्वात्स्वसंज्ञो भवति । किं पुनः स्थानं--वर्णनामुत्पत्तेरधिकरणभावं बिभ्राणः शरीरावयवः स्थानं । तदष्टधा । तद्यथा-कंठताल्वोष्ठमूर्द्धदंतोरोजिह्वामूलनासिकमिति । आह च—

अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा ।

जिह्वामूलं च दंताश्च नासिकोष्ठौ च तालु च ॥

का वा क्रिया—तेषामेव वर्णानामुत्पत्तावात्मनः प्रयत्नविशेषपूर्वकः परिस्पंदरूपः कंठादीनां प्रवृत्तिविशेषः क्रिया । सा चतुर्धा--स्पृष्टता, ईषत्स्पृष्टता, विवृतता, ईषद्विवृतता चेति । कस्य पुनः किं स्थानं का वा क्रिया—अकुहविसर्जनीयजिह्वामूलीयाः कंठ्याः । कुर्जिह्वामूली । हविसर्जनीयौ उरस्यौ । जिह्वामूलीयो जिह्व्यः । सर्वमुखस्थानमवर्णमित्येके । इ ए ऐ चु यशास्तालव्याः । ए ऐ कंठतालव्यावित्येके । उ ओ औ पूपध्मानीया ओष्ठ्याः । ओ औ कंठ्यौष्ठ्यावित्येके । ऋटुरषा मूर्धन्याः । रेफो दंतमूल इत्येके । लृतुलसा दंत्याः । वो दंत्योष्ठ्यः । सृक्वस्थानमित्येके । नासिक्योऽनुस्वारः । कंठ्यनासिक्य इत्येके । तथा स्पृष्टं करणं ककारादिमकारांतानां पंच पंच भूत्वा पंचवर्गसंज्ञानां । ईषत्स्पृष्टं यरलवानामंतःस्थसंज्ञकानां । विवृतमचां । ए ओ विवृततरौ । ताभ्यामै औ । ताभ्यामवर्णः । ईषद्विवृतं शषसहानामूष्मसंज्ञकानां । संवृतं नामकरणं पंचममवर्णस्येत्येके । तथाह—

वर्गेषु स्पृष्टमंतःस्थेष्वीषच्च विवृतं त्वचि ।
ईषच्चोष्मस्ववर्णे च संवृतं करणं विदुः ॥

इति स्वग्रहणविभागः। तत्र अ इति प्रसंज्ञाकारः । उदात्तानुदात्तस्वरितश्चेति त्रिप्रकारः । पुनरपि प्रत्येकं ङसंज्ञकोऽङसंज्ञकश्चेति द्विप्रभेदः । इति षोढा । एवं दीरेवं पः । इत्येवमष्टादशात्मकमवर्णं ब्रुवते । आह च—

प्रदीपाख्यप्रभेदाच्च त्रैस्वर्योपनयेन च ।
ङसंज्ञेतरभेदादः संख्यातोऽष्टादशात्मकः ॥

स च परस्परस्य स्वो भवति। तथा इवर्णः। तथा उवर्णः। तथा ऋवर्णः। तथा लृवर्णः। लृवर्णस्यानुकरणादन्यत्र दीर्नास्ति। एचां प्रा न संति। ते द्वादशप्रभेदाः। यवला द्विप्रभेदाः। ङसंज्ञका अङसंज्ञकाश्चेति । रेफस्योष्मणां च स्वे न संति। वर्ग्यो वर्ग्येण स्वमेति। शास्त्रे संव्यवहारप्रसिद्धये संज्ञारूपाणि प्रदर्श्यंते। तत्र--अण्। अक्। इक्। उक्। एङ्। अच्। इच्। एच्। ऐच्। अण्। इण्। यण्। अम्। यम्। ङम्। यञ्। झष्। भष्। अश्। हश्। वश्। झश्। जश्। बश्। छव्। यय्। मय्। झय्। खय्। यर्। झर्। खर्। चर्। शर्। अल्। हल्। वल्। झल्। शल्। इत्येकोनचत्वारिंशत्प्रत्याहाराः। तथाह---

णङञवैश्चतस्रः षाद् द्वे संज्ञे कणमैर्नव ।
मयाभ्यामष्ट शेनेता षड्रलाभ्यां दशैव ताः ॥ कःप्रादिः=

५ । **आकालोच् प्रदीपः** । १ । १ । एकमात्रकालोऽच् प्र इति संज्ञो भवति । द्विमात्रकालोऽच् दी इति संज्ञो भवति । त्रिमात्रकालोऽच् प इति संज्ञो भवति । तथाह—

एकमात्रः प्रसंज्ञः स्याद् द्विमात्रो दीरितीरितः ।
त्रिमात्रस्तु प इत्युक्तो हल्संज्ञं त्वर्द्धमात्रिकं ॥
वर्गेष्वाद्यो द्वितीयश्च शषसा अप्यघोषकाः ।
तृतीयतुर्यवर्णाः स्युर्महाप्राणा हसंयुताः ॥

इति प्रत्याहारानुप्रवेशः समाप्तः ॥ १ ॥

संधेर्नाम्नः समासस्य वृद्धिधर्मिङ्कृतोरपि ।
समासादर्थसंज्ञप्त्यै प्रक्रियामवतारये ॥ १ ॥

तत्र प्रथमं तावत्संधिमनुवर्णयिष्यामः । तद्यथा—कः संधिः-पूर्वोत्तरवर्णानां परस्परमव्यवधानेन संधानं संधिरविराम इत्यर्थः । दधि अशान । शमी अत्र । मधु अपनय । वधू आननं । पितृ अर्थः । लृ आकृतिः इत्येवं व्यवस्थिते बुद्ध्या कार्यार्थमिकारादीन् अपकृष्य संधावित्यधिकृत्य—

६ । **अचीको यण्** । ४ । ३ । इक यणादेशो भवति अचि परतः । इत्यनियमेन यण्प्राप्ते—

७ । [1]**स्वासन्नः** । १ । १ । इहास्वासन्नस्वासन्नप्रसंगे स्थानार्थगुणप्रमाणैर्यथास्वमासन्न एव विधिर्भवति । इति ताल-

---

१ । अस्य स्थाने महावृत्तौ-स्थानेऽन्तरतमः १ । १ । ४६ । इति पाणनीयवत्सूत्रमुपलभ्यते ।

व्यस्य इवर्णस्य स्थाने स्थानतः स्वासन्नतालव्यो यकारो भवति। ओष्ठ्यस्य उवर्णस्य स्थाने दंत्योष्ठ्यो वकारो भवति। मूर्द्धन्यस्य ऋवर्णस्य स्थाने मूर्द्धन्यो रेफो भवति। दंत्यस्य लृवर्णस्य स्थाने दंत्यो लकारो भवति। इति नियमे कृते "यरो ङितो वा ङे" इति प्रस्तुत्य 'शरो द्वे' इति 'अचो ह्रो ऽद्वचः' इति चाधिकृत्य—

८। [1]अग्रचः। ५। ४। अदीसंज्ञकादचः परस्य रेफहकाराद्वर्जितस्य वर्णस्य स्थाने द्वे रूपे वा भवतः। इति द्वित्वे कृते–

९। [2]झलो जश् झशि। ५। ४। झलो वर्णस्य जश् भवति झशि परतः। इति पूर्वस्य धकारस्य दकारे कृते 'अनच्कं शब्दरूपं परं वर्णमाश्रयेदिति' सन्निकर्षे च कृते-दद्ध्यशान, दध्यशान। शम्म्यत्र, शम्यत्र। मद्ध्वपनय, मध्वपनय। वद्ध्वाननं, वध्वाननं। पित्त्रर्थः, पित्रर्थः। लाकृतिः। इति च सिद्धं॥ त्रि अंबकः। गौरी आश्रयः। वायु अंबरं। भू आदि इति स्थिते-इको यण्भ्यः व्यवधानमित्येके[3]। तेषां त्वाचार्याणां अचीको यणित्यत्र इक इति कानिर्देशस्ततोऽयमर्थः। इकः परो यण् भवति अस्वेऽचि परतः। इति इको मध्ये यणि सति त्रियंबकः। गौरीयाश्रयः। वायुवंबरं। भूवादिः। यणादेशे

---

१ अस्य स्थाने महावृत्तौ—अनचि। ५। ४। १३१। इति सूत्रं वृत्तिरपि भिन्नैवोपलभ्यते। २ अस्य स्थाने महावृत्तौ-झलां जश् झशि। ५। ४। १२८। इति सूत्रं वर्तते। ३ "भूवादीनां वकारोऽयं लक्षणार्थः प्रयुज्यते। इको यण्भिर्व्यवधानमेकेषामिति संग्रहः॥" इति महावृत्तौ।

च पूर्ववत् त्र्यंबकः इत्यादिः ॥ ने अनं । लो अनं । रै औ । नौ औ इति स्थिते अचीको यणित्यतः अचीति वर्त्तते—

१० । [1]**एचोऽयवायाव्** । ४ । ३ । एचः स्थाने अचि परतः अय् अव् आय् आव् इत्यते आदेशाः भवंति ।

११ । **यथासंख्यं समाः** । १ । २ । यदा उद्देशिनोऽनुद्देशिनश्च समा भवंति तत्र संख्यामनुक्रम्य परिपाद्या भवंति । इति प्रथमसंख्यस्य एकारस्य स्थाने प्रथमसंख्यो अय् भवति । एवं सर्वत्र । ओकारस्य अव् । ऐकारस्य आय् । औकारस्य आव् इति कृते—नयनं, लवनं, रायौ, नावौ । एच इति किं? त्वमत्र । अचीति किं गोकुलं ।

१२ । [2]**गव्यूतिरध्वमाने** । ४ । ३ । गोशब्दस्य एचो अवादेशो निपात्यते अध्वपरिमाणेऽर्थे । गवां यूतिः गव्यूतिः । अध्वपरिमाण इति किं? गोयूतिः ॥ देव इंद्रः । माला इयं । आ-इहि । गंध उदकं । बाला ऊढा । अर्द्ध ऋचः । आ ऋकारः । महा ऋषिः । परम ऋषिः । तव ऌकारः इति स्थिते—अचीत्यनुवर्त्तमाने—

१३ । **आदेप्** । ४ । ३ । अवर्णादचि परतः एप् भवति । क एप् ।

१४ । **अदेङप्** । १ । १ । अकार एकार ओकारश्च प्र-

---

१ । अस्य स्थाने महावृत्तौ—एचो ऽयवायावः । ४ । ३ । ६६ । इति सूत्रं वर्तते । २ अस्य स्थाने महावृत्तौ—गोर्यूतावध्वपरिमाणे इति वार्त्तिकमुपलभ्यते ।

त्येकमेप् इति संज्ञो भवति। कस्येविति शंकायां-

१५। द्वयोरेकः। ४। ३। द्वयोः पूर्वपरयोः स्थाने एक एव भवति। तदैडिः पर इत्यत्र परग्रहणस्य पूर्वापेक्षत्वात्परस्य स्वासन्न एव विधिर्भवति।

१६। रंतोऽणुः। १। १। उः स्थाने अण् शिष्यमाण एव रपरो भवति। 'शरो द्वे' इत्याधिकृत्य-

१७। [1]अचो ह्रोऽह्रचः। ५। ४। अचः परौ यौ रेफहकारौ ताभ्यां परस्य रेफहकाराद्वर्जितस्य वर्णस्य द्वे रूपे वा भवतः। न स्फेऽचीत्यनुवर्तमाने-

१८। [2]शरः। ५। ४। शरोऽचि परे द्वे रूपे न भवतः। ऋवर्णऌवर्णयोरेकत्वप्रतिज्ञानात् ऌकारे शिष्यमाणस्य रेफस्य

१९। डश्चार्फिडादीनां[3]। ५। ३। ऋफिडादीनां डकारस्य रेफस्य च लत्वं भवति। इति लकारः। देवेंद्रः। मालेयं। एहि। गंधोदकं। बालोढा। अर्धर्च्चः, अर्द्धर्चः। अक्कारः, अर्कारः। परमार्षिः। महर्षिः। तवल्कारः। इति सिद्धं॥ तव एषः। महा ऐरावणः। दिव्या ओषधिः। परम औपगवः इति व्यव-

---

१। अस्य स्थाने-अचो रहाद् द्वे। ५। ४। १२६ इति सूत्रमस्ति। २। अस्य स्थाने-'शरोऽचि द्वित्वं न' इति वार्तिकमेवास्ति। ३ अस्य स्थाने नास्ति किमपि सूत्रं परं विभाषाचि। ४। ३। ३९। इति सूत्रस्थितेन "डलयोः समानविषयत्वं स्मर्यते" इति वार्तिकेन कार्यं कृतं, एवं च "र अ" इति प्रत्याहारं रंतोणुरित्यस्मिन् सूत्रे प्रश्लिष्य लत्वं कृतं।

स्थिते—आदेबित्येतस्मादादित्यनुवर्त्तमाने—

२०। **एच्यैप्**। ४। ३। अवर्णादेचि परतो द्वयोः पूर्वपरयोः स्थाने एकः परस्य स्वासन्नः ऐप् भवति। कः ऐप्—

२१। **आदैगैप्**। १। १। अकारैकारौकाराणां त्रयाणां ऐबित्येषा संज्ञा भवति। तवैषः। महैरावणः। दिव्यौषधिः। परमौपगवः। अक्ष ऊहिणी इति स्थिते—

२२। **अक्षादूहिण्यां**[1]। ४। ३। अक्षशब्दादूहिण्यामैप् निपात्यते। अक्षाणामूहोऽस्यामस्तीति अक्षौहिणी सेना॥ स्व ईरी। स्व ईरिणी। स्व ईरः। इति स्थिते—

२३। [2]**स्वादीरीरे**। ४। ३। स्वशब्दात् ईरी ईर इत्येतयोरैप् भवति। स्वैरी। स्वैरिणी। स्वैरः॥ प्र ऊहः। प्र ऊढः। प्र ऊढिः। प्र एषः। प्र एष्यः। इति स्थिते—

२४। [3]**प्रादूहोढोढ्येषैष्ये**। ४। ३। प्रशब्दादैप् भवति ऊहादिषु परतः। प्रौहः। प्रौढः। प्रौढिः। प्रैषः। प्रैष्यः॥ खट्वा ऋश्यः। महा ऋषिः। इति स्थिते—

२५। **ऋत्यकः**। ४। ३। अकः ऋकारे ऌकारे च प्रादेशो वा भवति। खट्व ऋश्यः। खट्वर्श्यः। मह ऋषिः। महर्षिः। एवं सर्वत्रोदाहर्यं॥ प्र ऋणं। दश ऋणं। ऋण ऋणं। कंबल ऋणं। वसन ऋणं। वत्सतर ऋणं। इति स्थिते—

---

१ अस्य स्थाने "अक्षादूहिण्यामैबुवक्तव्यः" इति वार्तिकं।

२ अस्य स्थाने "स्वादीरेरिणोः" इति वार्तिकं।

३। अस्य स्थाने "प्रादूहोढोढ्येषैष्येषु" इति वार्तिकं।

२६। [१]**प्रदशार्णकंबलवसनवत्सतरादृणे** । ४।३। प्रादेरैप् भवति ऋणपरे। द्वयोरेकः। प्रार्णं। दशार्णं। ऋणार्णं। कंबलार्णं। वसनार्णं। वत्सतरार्णं॥ ऐपं बाधते पुनः प्रादेशः। तेन प्र ऋणं। दश ऋणं। इत्यादि॥ सुख ऋतः। दुःख ऋतः। इति स्थिते–

२७। [२]**ऋते भासे**। ४। ३। अवर्णांताद् ऋतशब्दे परतो द्वयोरेकः परस्य स्वासन्नः ऐप् भवति तौ चेन्निमित्तनैमित्तकौ भासे भवतः। सुखार्त्तः। दुःखार्त्तः। सुखार्तः। दुःखार्तः। भासे इति किम्? सुखेनर्तः। दुःखेनर्तः॥ इह एव तिष्ठ। अद्य एव दृश्यते इति स्थिते--'एङि परे' इति वर्तमाने—

२८। [३]**एवेऽनियोगे**। ४। ३। अवर्णांतादेवशब्दे परतो द्वयोरेकः परोजादेशो भवत्यानियोगे। न चेत् स एव शब्दो नियोगविषयेऽवधारणे वर्तते। इहेव तिष्ठ। अद्येव दृश्यते। अनियोगे इति किं? इहैवास्व। अत्रैव तिष्ठ माद्य गाः॥ बिंब ओष्ठी। स्थूल ओतुः।

२९। **वौष्ठौतौ से**[४]। ४। ३। अवर्णांतादोष्ठोत्वोः परयोः परोऽजादेशो वा भवति द्वयोरेकः। बिंबोष्ठी। बिंबौष्ठी। स्थूलोतुः। स्थूलौतुः। से इति किं? पश्यौष्ठं देवदत्त। पश्यौतुं

१ अस्य स्थाने "ऋणदशप्रवत्सतरकंबलवसनानामृणे" इति वार्तिकं। २। अस्य स्थाने महावृत्तौ–एतादृशमेव वार्तिकं वर्तते न तु सूत्रं॥ ३ अस्य स्थाने महावृत्तौ–"एवे चानियोगे पररूपं" इति वार्तिकं। ४ अस्य स्थाने "ओत्वोष्ठयोः से वा पररूपं" इति वार्तिकं।

विजृंभितं ।

३० । सीमंतः केशेषु[1] । ४ । ३ । सीमंत इति निपात्यते केशविषये । सीमोंतः । सीमंतः । अन्यत्र सीमांतो-ग्रामः ॥ तव ओंकारः । अद्य आ ऋकारः । अद्य आ ऋश्यताम् । अप एहि । अद्य ओढा ।

३१ । ओमाङोः । ४ । ३ । अवर्णांतादोम्शब्दे आङादेशेऽचि परे द्वयोरेकः परोजादेशो भवति । तवोंकारः । अद्यर्कारः । अद्यर्श्यात् । अपेहि । अद्योढा ॥ लोक अग्रं । विद्या अंतं । दधि इदं । नदी ईहते । मधु उदकं । वधू उदरं । पितृ ऋषभः । पितृ ऋकारः । पितृ ऌकारः । इति स्थिते–

३२ । स्वेऽको दीः । ४ । ३ । स्वेऽचि परतः अकः स्थाने द्वयोरेको दीर्भवति । लोकाग्रं । विद्यांतं । दधीदं । नदीहते । मधूदकं । वधूदरं । पितृषभः । पितृकारः ॥ मुने अत्र । साधो अत्र । मुने अनघ । साधो अनघ । पूर्वोऽमीत्यनुवर्तमाने–

३३ । पदेत्येङः[2] । ४ । ३ । पदांतादेङो ऽकारादौ पदे परतः परः पूर्वो भवति । द्वयोरेकः । मुनेऽत्र । साधोऽत्र । मुनेऽनघ । साधोऽनघ । तकारः किं ? तयाहुः । पटवास्व । पदे इति किं ? नयनं । लवनं ॥ गो अग्रं इति त्रिः स्थिते–

३३ । गोर्वैङ्[3] । ४ । ३ । गोरेङोऽति परतः एजादेशो

---

१ । अस्य स्थाने "सीमंतः केशवेशे" इति वार्तिकं । २ । अस्य स्थाने "एङोऽति पदांतात्" ४ । ३ । ९६ । इति सूत्रं । ३ । ४ अनयोः स्थाने—विभाषाऽन्यत्र । ४ । ३ । १०२ । इति सूत्रं ।

वा भवति । पक्षे अवोऽनक्षेचि, इति अवादेशो वा । गोऽग्रं । गवाग्रं । गो अग्रं । गो ईश्वरः । गो एषः । इति द्विःस्थिते-

३५ । **अवोऽनक्षेऽचि**[४] । ४ । ३ । गो शब्दस्य एङोऽक्षशब्दवर्जितेऽचि परतोऽवादेशो वा भवति । गवाग्रं । गोऽग्रं । गवेश्वरः । गवीश्वरः । गवैषः गवेषः ॥ गो इंद्रः । गो इंद्रदत्तः ।

३६ । [१]**इंद्रे** । ४ । ३ । गो शब्दस्य एङोऽव इत्ययमादेशो भवति इंद्रशब्दे परे । पृथक् सूत्रकरणात् नित्यं । गवेंद्रः । गवेंद्रदत्तः ॥ गो अक्षः ।

३७ । [२]**वातायनेऽक्षे** । ४ । ३ । गोशब्दस्य एङोऽक्षस्थेऽचि परतो नित्यमवादेशो भवति वातायनेऽर्थे । गवाक्षः । वातायन इति किं ? गोऽक्षः ।

इति स्वरसंधिः ॥ २ ॥

अथ प्रकृतिसंधिः ।

एवं संधाविति प्रसक्ते प्रतिषेधोयमुच्यते--

३८ । [३]**पात्रानितौ** । ४ । ३ । पसंज्ञकादितिशब्दवर्जितेऽचि परतो द्वयोरेको यो विधिः प्राप्नोति स न भवति । कस्य पः ।

---

१ अस्य स्थाने "गोरिंद्रेऽवङ्" ४ । ३ । १०१ । इति सूत्रं । २ अस्य स्थाने न किमपि सूत्रं परं, विभाषाऽन्यत्र । ४ । ३ । १०२ । अत्रस्थव्यवस्थितविभाषामवलंब्य कार्यं कृतं । ३ अस्य स्थाने "प्रकृत्याचि दिपाः । ४ । ३ । १०३ इति सूत्रं ।

३९ । **वाक्यटेः पः** । ५ । ४ । वाक्यस्य टेः पो भवति । इत्यधिकृत्य–

४० । **भोश्च प्रत्यभिवादेऽस्त्रीशूद्रे वा**[१] ।५।३। स्त्रीशूद्रविषयवर्जिते प्रत्यभिवादे वर्तमानस्य वाक्यस्य टेः पो वा भवति, भोशब्दस्य च । कः टिः ।

४१ । **अंत्यादचः**[२] । ५ । ३ । अचां मध्ये योऽ-त्योऽच् तदादि शब्दरूपं टिसंज्ञं भवति । अभिवादये देवदत्तोऽहं भोः । आयुष्मान् एधि देवदत्त ३ अतिचिरं । पक्षे संधिः ।

४२ । **दूराद्धूते** । ५ । ३ । दूराद् विप्रकृष्टाद्धूते आ-ह्वूयमाने यद्वाक्यं वर्तते तस्य वाक्यस्य टेः पो वा भवति । आगच्छ भो माणवक देवदत्ता ३ अत्र । आव्रज विश्वभूते३अत्र । पान्नानितावित्यतो नेति वर्तते ।

४३ । **दिः**[३] । ४ । ३ । दिसंज्ञकादचि परत यत्प्राप्नोति तन्न भवति । को दिः–

४४ । **ईदूदेद्द्विर्दिः** । १ । १ । ईकार ऊकार एकार इत्येतदंतो यो द्विः स दिसंज्ञो भवति । मुनी आसाते । पटू इह । अधीयेते आगमं ।

४५ । **मः** । १ । १ । अदसो दकारस्य स्थाने यः कृतो मकार-स्तस्मात्परौ यौ ईदूतौ तौ दिसंज्ञौ भवतः । अमी अश्वाः । अमू इमौ॥

---

१ । अस्य स्थाने "प्रत्यभिवादेऽशूद्रस्त्रियसूयके । ५ । ३ । ९१। इति सूत्रं । २ अस्य स्थाने "अंत्यादचाष्टिः । १ । १ । ६५ । इति सूत्रं ।३ । अस्य स्थाने-प्रकृत्याचि दिपाः । ४ । ३ । १०३ इति सूत्रं ।

४६ । न्यजनाङ्[1] **। १ । १ ।** निसंज्ञको योऽच् आङ्-वर्जितः स दिसंज्ञको भवति । अ अपेहि । इ इंद्रं पश्य । उ उत्तिष्ठ । आ एवं किल तत् । आ एवमनुमन्यसे ।

ईषदर्थे क्रियायोगे, मर्यादाभिविधौ च यः ।
एतमाङं ङितं विद्यात् वाक्यस्मरणयोराङित् ॥ १ ॥

ईषदर्थे—आ उष्णं । ओष्णं । क्रियायोगे—आ इहि । एहि । मर्यादायां—आ उदकांतात् । ओदकांतात् । अभिविधौ—आ आर्येभ्यः । आर्येभ्यः यशोगतं समंतभद्रीयं ।

४७ । ओत् । १ । १ । ओकारांतो यो निः स दिसंज्ञको भवति । अहो इति । उताहो इति । नौ इंद्रीयं ।

४८ । वेकोऽसेऽस्वे प्रः[2] **। ४ । ३ ।** इकः स्थानेऽस्वेऽचि परतः प्रादेशो वा भवति, न चेत् ताविगचौ एकत्र से भवतः । दधि अत्र । दध्यत्र । शमि अत्र । शम्यत्र । प्रादेश-सामर्थ्यादत्र यण् न भवति । अस इति किं ? नद्युदकं । वध्वा-ननं । अस्व इति किं ? दधीदं । नदीयं ।

इति प्रकृतिसंधिः ॥ ३ ॥

अथ व्यंजनसंधिः ।

पिति कृति तुगित्यनुवर्तमाने—

---

१ अस्य स्थाने "निरेकाजनाङ्" । १ । १ । २२ । इति सूत्रं ।
२ । अस्य स्थाने "विभाषेकोऽस्वे प्रश्च" । ४ । ३ । १०४ । इति सूत्र महावृत्तौ ।

४६ । छे च[1] । ४ । ३ । छकारे परतोऽजंतस्य तुगागमो भवति । "स्तोः श्चुना श्चुः" इति तुकश्चुत्वं । देवच्छत्रं । इच्छति । म्लेच्छति ॥

५० । यो वा पदस्य[2] । ४ । ३ । पदसंबंधिनो यश्छे परतस्तुगागमो वा भवति । कन्याच्छत्रं । कन्याछत्रं । मुनीच्छाया । मुनीछाया । य इति किं ? श्वेतच्छत्रं । पदस्येति किं ? ह्रीच्छति ॥ अच् आश्रितं । ककुप् अंतरं । सुवाक् आचार्यः । मधुलिट् भ्रमरः । तत्त्वविद् याति मोक्षं । इति स्थिते--पदस्येत्यधिकृत्य--

५१ । झलो जश्[3] । ५ । ४ । झलः पदांते वर्तमानस्य जश् भवति । अजाश्रितं । ककुबंतरं । सुवागाचार्यः । मधुलिड्भ्रमरः । तत्त्वविद्याति मोक्षं ॥ अज् मात्रं । ककुप मंडलं । वाक् मधुरा । षट् नयाः । तत् नयनं । इति द्विःस्थिते-पदस्येत्यधिकृत्य--

५२ । [4]यरो ङो वा ङे । ५ । ४ । यरः पदांते वर्तमानस्य ङो भवति वा ङे परतः । स्वासन्नः । कः पुनर्ङः ।

५३ । नासिक्यो ङः । १ । १ । नासिकाकृतमनुरागमापद्यमाना वर्णाः अमङणनाः ङसंज्ञा भवंति । पक्षे-

---

१ अस्य स्थाने "छे । ४ । ३ । ६१ । इति सूत्रं । २ । अस्य स्थाने "यः । ४ । ३ । ६३ ।" "वा पदस्य । ४ । ३ । ६४ । इति सूत्रद्वयं । ४ । अस्य स्थाने "यरो ङो विभाषा ङे । ५ । ४ । १२५ ।" इति सूत्रं ।

जश्त्वं । अब्मात्र । अज्मात्रं । ककुम्मंडलं । ककुब्मंडलं । वाङ् मधुरा । वाग्मधुरा । षण्नयाः । षड्नयाः ।तन्नयनं । तद्नयनं ॥ वाक् मयं । मधुलिट् मानं । इति स्थिते–

५४ । त्ये[1] । ५ । ४ । यरः पदांते वर्तमानस्य ङो भवति ङसंज्ञादौ त्ये परतः । पुनर्वचनं नित्यार्थं । वाङ्मयं । मधुलिण्मानं ॥ अज् हलौ । त्रिष्टुप् हुतं । वाक् हरति । षड् हलानि । तत् हितं । इति द्विः स्थिते यय्यं परस्वमित्यधिकृत्य-"स्थास्थंभोः पूर्वस्योदः" इति च प्रस्तुत्य–

५५ । झयो हः । ५ । ४ । अतीतसूत्रं चतुष्टयविधानं समंतभद्रस्याचार्यस्य मतेन विकल्पो भवति नान्येषां । स्वासन्न इति महाप्राणस्योष्मणो हकारस्य स्थाने तादृश एव तद्गुणवर्ग-चतुर्थो भवति । अज्झलौ । अज्हलौ । त्रिष्टुब्भुतं । त्रिष्टुब् हुतं । वाग्घरति । वाग्हरति । षड्ढलानि । षड्हलानि । तद्धितं । तद्हितं ॥ सुवाक् शोभते । ककुप् श्रूयते । मधुलिड् श्यामः । तत्श्वेतं । तत्श्लोकः । तत् श्मशानं । इति द्विः स्थिते-झयः पदांतादित्यधिकृत्य -

५६ । शश्छोऽमि । ५ । ४ । झयः पदांतादुत्तरस्य शकारस्य छकारो भवति अमि परतः । चतुष्टयं समन्तभद्रस्य-

---

१ । अस्य स्थाने नास्ति किमपि सूत्रं परं 'यरो ङो विभाषा ङे । ५ । ४ । १२५ ।" इति सूत्रे विभाषापदग्रहणसामर्थ्यात् कार्यमस्य कृतं ।

स्येत्यनेन विकल्पो भवति । सुवाक्छोभते । सुवाक् शोभते । ककुब्च्छूयते। ककुब् श्रूयते। मधुलिड्छ्यामः। मधुलिड् श्यामः। तच्छ्वेतं । तद् श्वेतं । तच्छ्लोकः । तत् श्लोकः । तच्छ्मशानं । अमीति किं? वाक्श्च्योतति ॥ क्रुङ् शेते। सुगण् शेते। इति त्रिः स्थिते-

५७ । ङ्णोः कुक् टुक् शरि वा[1] । ५ । ४ । ङकारणकारयोः पदांते वर्तमानयोः यथासंख्यं कुक् टुक् इत्येतावागमौ वा भवतः शरि परतः । उकार उच्चारणार्थः । ककार आदेशविध्यर्थः । तौ च किदंत इति अंते भवतः । क्रुङ्क्शेते । क्रुङ्क्छेते । क्रुङ्शेते । सुगण्ट्छेते । सुगण्ट्शेते । सुगण्शेते ॥ भवान् शूर इति त्रिः स्थिते--

५८ । नश्शि तुक् । ५ । ४ । नकारस्य पदांते वर्तमानस्य शकारे परे वा तुगागमो भवति । पूर्ववदुकारककारौ । स्तोः श्चुना श्चुरिति तुकश्चुत्वं ।

५९ । [2]नश्चापदांते झलि । ५ । ४ । नकारस्य मकारस्य चापदांते वर्तमानस्य अं इति अनुस्वारो भवति झलि परतः । इति नकारस्यानुस्वारः । तस्य च--

६० । [3]यय्यं परस्वं । ५ । ४ । अं इति अनुस्वारो ययि परतः परस्वं भवति । इति परस्वत्वं । भवाञ्च्छूरः । भवाञ्च्

---

१ अस्मिन् सूत्रे वा इति पदं महावृत्तौ न वर्तते ।

२ अस्य स्थाने-नश्चापदांतस्य झलि । ५ । ४ । ८ । इति सूत्रं ।

३ । अस्य स्थाने-यय्यनुस्वारस्य परस्वं । ५ । ४ । १३२ । इति सूत्रं महावृत्तौ ।

शूरः । भवान् शूरः ॥ भवान् छादयति । भवान् ठकारीयति । भवान् थुडति । भवान् चरति । भवान् टीकते । भवान् तरति । इति द्विः स्थिते-पुमः खय्यं परे सिसुगिति प्रस्तुत्य-

६१ । नश्छव्यप्रशान् । ५ । १ । प्रशान्वर्जितस्य नकारांतस्य पदस्य अम् परे छवि परतः सिगादेशः सुग्चागमः पर्यायेण भवतः । ककारोऽतविध्यर्थः । उकार उच्चारणार्थः । इकारो रिस्योरिति विशेषणार्थः ।

६२ । रिस्योः[1] **। ५ । ४ ।** पदांते वर्तमानयोः रेफसका-रयोरिदितोः परयोर्यः पूर्वस्तस्य स्वासन्नङादेशो भवति । नकार-स्यान्यत्रानुस्वारः । सकारस्य श्चुत्वे शकारः । ष्टुत्वे षकारः । भवाँश्छादयति । भवांश्छादयति । भवाँष्ठकारीयति । भवांष्ठकारीय-ति । भवाँस्थुडति । भवांस्थुडति । भवाँश्चरति । भवांश्चरति । भवाँष्टीकते । भवांष्टीकते । भवास्तँरति । भवांस्तरति ॥ अप्रशा-निति किं ? प्रशान् चिनोति । नकारस्य श्चुत्वे ञकारः । प्रशा-ञ्चिनोति ॥ मयो वोच्युञ इत्यधिकृत्य-

६३ । ङ्मो ङ्मुट् तु प्रात्[2] **। ५ । ४ ।** प्रात् परो यो ङम् तदंताद् पदात् परस्याचो यथासंख्यं ङमुडागमो भवति । उकार उच्चारणार्थः । टकारो देशविध्यर्थः । तु शब्दो नित्यार्थः । प्रत्यङ्ङास्ते । सुगण्णिह । पचन्नयं । प्रादिति किं ? प्राङास्ते ।

---

१ । अस्य स्थाने नास्ति पृथक् सूत्रं परं नकारस्य स्थाने ऽनुस्वारपूर्व एव सकारो विधीयते ।

२ । अस्य स्थाने ङमो नित्यं ङ्मट् प्रात् । ५ । ४ । १६ इति ।

अचीति किं ? प्रत्यङ् शेते। अत्र पदादूग्रहणे नटणादि अनीश्वर इत्यादौ द्विर्भावो न स्यात् । कुतः संज्ञापूर्वविधेरसत्यत्वात् । हलीति अधिकृत्य--

६४ । नुग्मोऽं[1] । ५ ४ । नुको मकारस्य च पदांते वर्तमानस्य अं इति अनुस्वारो भवति हलि परतः । स चैको बिंदुः ॥ अकार उच्चारणार्थः । रंरंम्यते। पापं हंति । व्रतं रक्षति । धर्मं शृणोति । स्वर्गं साधयति ॥ हलीति किं ? इदमत्र । यय्यं परस्वमित्यधिकृत्य--

६५ । वा [2]नुक् पदांतस्य । ५ । ४ । नुकः पदांते वर्तमानस्य मकारस्य च अं इति अनुस्वारस्य वा परस्वं भवति ययि परतः । चङ्क्रम्यते । चंक्रम्यते । दंद्रम्यते । दन्द्रम्यते । यंयम्यते । यँय्यम्यते । त्वङ्करोषि । त्वंकरोषि । त्वञ्चरसि । त्वं चरसि । त्वण्टीकसे । त्वंटीकसे । त्वन्तरति । त्वं तरति । त्वम्पचसि । त्वंपचसि । त्वंयासि । त्वँय्यासि । त्वँव्वहसि । त्वं वहसि ॥ यय्यं परस्वमित्यधिकृत्य--

---

१ । अस्य स्थाने-माऽनुस्वारः । ५ । ४ । ७ इति, एवं च तनो नुट् । ५ । २ । १७० । अस्मिन् सूत्रे नुगिति पूर्वांतकरण कृतदीत्वस्यानुवर्तमानस्य चस्य विशेषणे तत इति पदस्याभावेऽपि कार्यसिद्धौ नुडिति परादिकरणं ज्ञापयति "अस्मिन् प्रकरणे पूर्वांतः आगमः स्वनिमित्तमंतरेणापि विक्रियते" तेनाझलादापिप्यनुस्वारः । यंयम्यते रंरम्यते इति महावृत्तौ ॥

२ । महावृत्तौ-अस्मिन् सूत्रे नुक्ग्रहणं नास्ति ।

६६ । **तोर्लि** । ५ । ४ । तवर्गस्य पदांतस्य लकारे परतः परस्वं भवति । तडिल्लोला । विद्युल्लता । भवाँल्लिखति विद्वाँल्लोकेशः ॥ रोरीत्याधिकृत्य अंतेऽरिति वर्तमाने खरीति कुप्वोरिति च प्रस्तुत्य-

६७ । **≍ क ≍ पौ च** । ५ । ४ । खरभूतयोः कवर्गपवर्गयोः परतो रेफस्य ≍ क ≍ प इत्येतावादेशौ भवतः अः इति विसर्जनीयश्च । क ≍ करोति । कः करोति । क ≍ खनति । कः खनति । क ≍ पठति । कः पठति । क ≍ फलति । कः फलति ॥ रोरीत्यधिकृत्य अंतेऽरिति च प्रस्तुत्य-

६८ । **शरि सश्च** । ५ ४ । रेफस्य सकारादेशो भवति शरि परतः अः इति विसर्जनीयश्च । कश्शेते । कः शेते । कष्षंढः । कःषंढः । कस्सरति । कः सरति ॥ रोरीत्याधिकृत्य--

६९ **छवि** । ५ । ४ । रेफस्य सकारादेशो भवति छवि परतः । कच्छादयति । कष्ठकारीयति । कस्थुडति । कश्चरति । कष्टीकते । कस्तरति ॥ कुप्वोस्तिभ्कोस्सिरित्यधिकृत्य-

७० । [१]**इसुसोऽपेक्षायां** ।५।४। इसंतस्य उसंतस्य च पदस्य संबंधिनो रेफस्य कुप्वोः परतः सिरित्ययमादेशो भवति वा स्थानिनिमित्तपदे चेदन्योऽन्यापेक्षाविषये भवतः । ईकारः क्विणोः ससेः ष इति विशेषणार्थः । क्विणोः ससेः षः । नुम् शर् इति च प्रस्तुत्य-

---

२ । अस्य स्थाने-इसुसोऽसामर्थ्ये ।५।४। ३२ इति सूत्रं महावृत्तौ ।

७१ । **स्यादेशयोः** । ५ । ४ । त्यसकारस्य आदेशसकारस्य च कवर्गादिषणंताच्च नुमःशरश्च परस्य षत्वं भवति । इति सेः षत्वं । सर्पि ⁓ करोति । सर्पिः करोति । सर्पिष्करोति सर्पिष्पिबति । सर्पि ⁓ पिबति । सर्पिः पिबति । धनुष्खंडयति । धनुः खंडयति । धनु ⁓ खंडयति । धनुष्फलति । धनु ⁓ फलति । धनुः फलति । अपेक्षायामिति किं ? तिष्ठतु सर्पिः ⁓ पिब त्वमुदकं । तिष्ठतु सर्पिः पिब त्वमुदकं ।

७२ । **स्तोः श्चुना श्चुः** । ५ । ४ । सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ भवतः । सकारस्य शकार चवर्गाभ्यां योगे शकारो भवति । तवर्गस्य शकारचवर्गाभ्यां योगे चवर्गो भवति । कश्शोभते । काश्छिनात्ति । मरुच्चरति । मरच्छिरति । धर्मविज्जयति । मज्जति । भृज्जति । बृहज्झषः । महाञ्झषः । तञ्ञकारेण । तञ्जुजवे । स्तोःश्चुना श्चुरित्यनुवर्तमाने-

७३ । **ष्टुना ष्टुः** । ५ । ४ । स्तोः सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ भवतः । सकारस्य षकारटवर्गाभ्यां योगे षकारो भवति । तवर्गस्य षकारटवर्गाभ्यां योगे टवर्गो भवति । कण्षण्ढः । कष्टीकते । कष्ठकारीयति । तट्टीकते । तट्ठकारेण । तड्डीकते । तड्ढौकते । तण्णकारेण । पदस्येत्याधिकृत्य—

७४ । **न तोष्षि** । ५ । ४ । पदांतस्य तवर्गस्य षकारे परतः टुत्वं न भवति । तीर्थकृत् षोडशः । महान्षंढः । तोरिति किं ? कण्फडिकः । न तोरित्यधिकृत्य--

७५। **शात्** । ५ । ४ । शकारात् परस्य तोश्चुत्वं न भवति । प्रश्नः । क्लिश्नाति ॥ यशस् भ्रमति । तेजस् दहति । इति स्थिते-पदस्येत्यधिकृत्य-,

७६ । **ससजुषो रिः** । ५ । ४ । सकारस्य पदांतस्य सजुःशब्दस्य च रिर्भवति । इकारो हशि रेरिति विशेषणार्थः । "ऋत उः" स्यत्योऽतः,, इति चानुवर्तमाने--

७७ । [१]**हशि रेः** । ४ । ३ । अकारादुत्तरस्य रेफस्य उत्वं भवति हशि परतः । पूर्ववदेपि कृते यशो भ्रमति । तेजो दहति ॥ यशस् अत्र । तेजस् अत्र । पूर्ववद् रित्वे कृते-ऋत उः, स्यत्योऽतः, हशि रेरिति वर्तमाने--

७८। [२]**अति** । ४ । ३ । अकारादुत्तरस्य रेरुत्वं भवति अति अकारे परतः । पदे त्ये इत्यकारस्य पूर्वत्वे यशोऽत्र । तेजोऽत्र ॥ हे भगोर् अत्र । हे भोर् अत्र । हे अघोर् अत्र । देवार् आसते । धार्मिकार् आयान्ति । इति स्थिते-भगवद्भवत्वघवतो रिः काववस्यौ,, इत्यनुवर्तमाने--

७९ । **ओदाद् योऽशि**[३] ५ । ४ । ओकारादनंतादवर्णाच्च परस्य रेर्यकारादेशो भवति अशि परतः । हे भगोयत्र । हे भोयत्र । हे अघोयत्र । देवायासते । धार्मिकायायांति । ओदादिति किं ? मुनेरत्र । साधुरागतः । अशीति किं ? भोःकरोति ।

१ । २ । अनयोः स्थाने रेरुद्धशोः । ४ । ३ । १०० इति ।
३ । अस्य स्थाने ओदपूर्वस्य योऽशि । ५ । ४ । ४ । इति सूत्रं ।

कः स्वनति ॥ भगोय् अत्र। भोय् अत्र। पटव् उ। असाव् उ। तय् उ। तस्माय् उ। इति द्विः स्थिते--

८०। [1]व्योऽस्पष्टः खं। ५। ४। अकृतादोकारादवर्णाच्च परस्य वकारस्य यकारस्य चास्पष्टोऽव्यक्तश्रुतिरीषत्स्पृष्टकरणः प्रशिथिलस्थानकरणः खं चादेशौ भवतोऽशि परतः। अशि हलि नित्यमुत्तरत्र खवचनादिहापि विकल्पः। किं खं।

८१। नाशः खं। १। १। नाशशब्देन प्रतिपाद्यमानस्यार्थस्य खमित्येषा संज्ञा भवति। इति खे कृते--

८२। पूर्वत्रासिद्धं। ५। ३। पूर्वस्मिन् शास्त्रे कर्तव्ये परं शास्त्रं असिद्धं भवति। इति यकारवकारयोरसिद्धत्वात् अयवादिर्न भवति। भगोयँत्र। भगो अत्र। भोयँत्र। भो अत्र। पटवुँ। पट उ। असावुँ। असा उ। अर्थादचीति किं? वृक्षवृश्चमाचक्षाणो वृक्षव् हसति ॥ पटव् इह। असाव् इंदुः। तय् आहुः। तस्माय् आसनम्। इति त्रिःस्थिते--

८३। वाऽनुञ्यात्। ५। ४। अवर्णात्परस्य वकारस्य यकारस्य चास्पष्टः खं चादेशौ वा भवतः उञि वर्जिते अशि परतः। पक्षे तदवस्थाता। पटविँह। पट इह। पटविह। असाविँदुः। असा इंदुः। असाविंदुः। तयाँहुः। त आहुः। तयाहुः। तस्मायाँसनं। तस्मायासनं। तस्मा आसनम्। अनुञीति किं? पटवुँ। पटउ। द्विरूपमेव॥ भगोय् हसति। भोय् देहि। देवाय् यांति। वाताय् वांति। इति स्थिते--

---

१। अस्य स्थाने व्योः खं वा। ५। ४। ५। इति सूत्रं महावृत्तौ।

८४ । **हलि** । ५ । ४ । अशि यो हल् तस्मिन् हलि परतः व्योः खं भवति । नित्यार्थं वचनं । भगो हसति । भो देहि । देवा यांति । वाता वांति । अशीति विशेषणं हलः किं ? वृक्षव् करोति ॥ पुनर् रात्रः । पटुर् राजा । इति स्थिते-ढो ढि खमित्यनुवर्तमाने--

८५ । **रो रि** । ५ । ४ । रेफस्य रिपरतः खं भवति ।

८६ । **ढ्रिखेऽणः**[1] । ४ । ३ । ढकारस्य रेफस्य च खे सति पूर्वस्याणो दीर्भवति । इति दीत्वे कृते । पुना रात्रः । पटू राजा ॥ एषस् हसाति । सस् जयति । इति स्थिते-दिवो हल्युदिति वर्तमाने-

८७ । **तोऽनञ्से सात्सोः खं**[2] । ४ । ३ । तकारस्य स्थाने यः कृतः सकारस्तस्मात् परस्य सोः खं भवति हलि परतः न चेत् स तकारस्थानिसकारो नञ्से वर्तमानः । एष हसति । स जयति जिनः । अनञ्से इति किं ? अनेषो हसति । असो जयति ।

इति व्यंजनसंधिः ।

इति जैनेंद्रप्रक्रियायां प्रथमः संधिः समाप्त ॥ १ ॥

---

१ । अस्य स्थाने ढ्रखे पूर्वस्याणो दीः । ४ । ३ । २१६ । इति ।
२ । अस्य स्थाने-हल्येतत्तदोरनञ्से ऽकोः सुखं । ४।३ ।१०९ इति ।

अथ नामनिर्णयमनुवर्णयिष्यामः ।

तत्र अजंताः पुंलिंगाः ।

तद्यथा—संव्यवहारप्रसिद्ध्यर्थं पुरुषैः संकेतितः शब्दो नाम । तत् द्विविधं। अजंतं हलंतं चेति । तदष्टविधमपि संभवति। पुंल्लिंगं स्त्रीलिंगं नपुंसकलिंगं स्त्रीपुंसकलिंगं पुन्नपुंसकलिंगं स्त्रीनपुंसकलिंगं स्त्रीपुंनपुंसकलिंगं अलिंगं चेति । तत्र अजंतेषु पुलिंगेषु प्रथममकारांतः पुंलिंगो धर्म इत्येष शब्दः स्वभावादेवैकत्वादिवृत्तिमान् । अव्युत्पत्तिपक्षे--

८८ । अधु मृत् । १ । १ । धुवर्जितमर्थवच्छब्दरूपं मृत् संज्ञं भवति । इति मृत्संज्ञां लभते। व्युत्पत्तिपक्षे पुनः—

८९ । कृत्वृत्साः । १ । १ । कृदंतं त्वदंतं ससंज्ञकं च मृत्संज्ञं भवति । इति लब्धमृत्संज्ञकादतः त्यः पर इत्यधिकृत्य-ङ्याम्मृद इति च प्रस्तुत्य—

९० । स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप्। ३ । १ । ङ्यंतादाबंतान्मृद्रूपाच्च परास्त्यसंज्ञाभूत्वा स्वादयो भवंति । इति विधानादविशेषेण सर्वस्वादिप्रसंगे प्राप्ते 'मिङैकार्थे वाः' इत्येवमादिना लक्षणेन स्वादीनां नियमः क्रियते । कथं--मिङस्त्रिशोऽसद्युष्मदन्या, ङति सुपश्चेति चानुवर्तमाने—

९१ । [1]आप्परा विभक्तीहलच । १ । २ । अर्थ-

१ । अस्य स्थाने तासामाप्परास्तद्धल ... १

वशात् विभक्तीपरिणाम इति सुपश्चेत्येतत्प्राप्तं संपद्यते। सुपां त्रिशो भूत्वा स्थितानां विभक्तीशब्दस्य हलोऽचश्च यथासंख्यमाप्परा: अकारपरा: पकारपराश्च संतः संज्ञा भवंति। इति तासां सुपां सप्तविशेषसंज्ञा: क्रियंते। सु औ जस् इति वा:। अम् औट् शस् इति इप्। टा भ्याम् भिस् इति भा। ङे भ्याम् भ्यस् इति अप्। ङसि भ्याम् भ्यस् इति का। ङस् ओस् आम् इति ता। ङि ओस् सुबिति ईप्।

९२। मिङैकार्थे वा:। १। ४। मिङ्तेन पदेनैकार्थे समानार्थे वर्तमानात् ङ्यंतादाबंतान्मृद्रूपाच्च वा विभक्ती भवति। तस्याश्चावयवानां त्रयाणामपि 'एको द्विर्बहुश्चैकश:' इत्यनुवर्तमाने-

९३। सुपश्च। १। २। सुपां त्रीणि त्रीणि वचनानि एकश: एको द्विर्बहुरित्येवं संज्ञकानि भवंति। इत्येकद्विबहुसंज्ञका विधीयंते। तेषां चावयवानां त्रयाणामपि संकरेण प्राप्तौ सत्यां नियम: क्रियते।

९४। साधने स्वार्थे। १। २। एकार्थे साधने स्वार्थे एक: सुर्भवति। द्वित्वविशिष्टेऽर्थे साधने द्विरौ भवति। बहुत्वविशिष्टेऽर्थे साधने बहुर्जस् भवति। एवं सर्वत्र। उकारजकारयो: "अप्रयोगीदिति' इत्संज्ञा। कार्यार्थमनयोरुपादानं, न प्रयोगे श्रवणार्थमिति निवृत्तिः। सकारादीनां प्रयोगे श्रवणार्थमुपादानमिति नेत्संज्ञा। उकार: 'साबनडुह:' इति विशेषणार्थ:। जकारो जसीति विशेषणार्थ:। धर्म स् इति स्थिते—

९५ । सुप्मिङंतं पदं । १ । २ । सुबंतं मिङंतं च यच्छ-ब्दरूपं तत्पदसंज्ञं भवति । इति पदसंज्ञायां पदस्येत्यधिकृत्य-'ससजुषो रिरिति रिरादेशः । इकारो 'हशि रेः, इति विशेषणार्थः । रोरीत्यधिकृत्य—

९६ । अंतेऽः[1] । ५ । ४ । अंते विरामे अवसाने वर्तमानस्य रेफस्य अः इति विसर्जनीयो भवति । इति विसर्जनीयः । अकार उच्चारणार्थः । धर्मः तिष्ठति इत्यादि मिङंतं पदमभिसंबंधनीयं । एवमुत्तरत्रापि । धर्म औ इति स्थिते आदेबिति वर्तमाने–

९७ । एच्यैप् । ४ । ३ । द्वयोरेकः परस्य स्वासन्न ऐप् भवति । धर्मौ । धर्म अस् इति स्थिते 'तदैचि परः, उस्यपदे' इति चाधिकृत्य—

९८ । एप्यत[2]ः । ४ । ३ । अकारस्य द्वयोरेकः परो भव-त्यपद एपि परतः । इति पररूपे प्राप्ते 'यञ्यतो दीः' इति अनु-वर्तमाने—

९९ । [3]जसि । ५ । ३ गोरकारांतस्य दीर्भवति जसि परतः इति दीत्वं भवति । स्वेको दीरिति पुनर्दीत्वं । पूर्ववद् रित्वं विसर्जनीयश्च । धर्माः । तथा संबोधनार्थविवक्षायां मिङ्कार्थे वाः इति वाः भवति । तस्याः—

---

१ । अस्य स्थाने—विरामे विसर्जनीयः ५ । ४ । १८९ । इति सूत्रं वर्त्तते । २ । अस्मिन् सूत्रे 'अपदे' इति पदमधिकं महावृत्तौ ३ । अस्य स्थाने—सुटि पूर्वस्वं । ४ । ३ । ८९ । नेच्यात् । ४ । ३ । ९२ । इति सूत्रद्वयं प्रक्रियाभेदश्च वर्त्तते ।

१००। संबोधने बोध्यं । १ । ४। संबोधनेऽर्थे विहितायाः वायाः बोध्यमिति संज्ञा । प्रसिद्धतत्संबंधस्य व्यापारांतरं प्रत्यभि-मुखीकरणं आमंत्रणं संबोधनं तत् द्योतनार्थं हे भोः प्रभृतयः शब्दाः प्रागुपादीयंते । हे धर्म सु इति स्थिते–

१०१। [४]सुष्किः । १ । ४ । बोध्यस्यैकवचनं सुः किसंज्ञा भवति। इति किसंज्ञा । 'व्योः खं वल्कौ, हल् ङ्याप्भ्यः सुसिप्त्यनच् 'केरेङः' इति चानुवर्तमाने---

१०२ । प्रात् । ४ । ३ । प्रादुत्तरस्य केरनचः खं भवति । द्विबह्वोः पूर्ववत् । हे धर्म । हे धर्मौ । हे धर्माः । किं तिष्ठसि । किं तिष्ठथः । किं तिष्ठथ इति गम्यते । धर्म इति त्रिः स्थिते--

१०३। कर्मणीप् । १ । ४। कर्मणि कारके इप् भवति। किं कर्म?

१०४। कर्त्राप्यम् । १ । २ । कर्त्रा यदाप्यत्वेन विवक्षित-मीप्सितानीप्सितोदासीनविकल्पं तत् कर्मसंज्ञं भवति । इत्ये-वमादि लक्षणो विहितः । तस्या एकोऽम् । द्विरौट् । बहुः शस्। टकारशकारयोरित्संज्ञा। टकारः सुडिति प्रत्याहारार्थः । शकारः शासिति विशेषणार्थः । सुटीदुतः प्राक् स्वमित्यधिकृत्य--

१०५ । पूर्वोऽमि । ४ । ३ । सुब्यमि परतः परः पूर्वो भवति द्वयोरेकः । औटि पूर्ववत् । 'स्वेको दीः', सुटीदुतः प्राक् स्वं, इति चाधिकृत्य--

---

४ । अस्य स्थाने—एकः किः । १ । ४ । ५६ । इति सूत्रं वर्त्तते ।

१०६ । **शसि** । ४ । ३ । शसि परतः प्राचोऽकः स्वं दीर्भवति द्वयोरेकः । इति दीर्त्वे कृते--

१०७ ।[1]**न्पुंसि** । ४ । ३ । शसो नकारादेशो भवति पुंसि पुंलिंगे गम्यमाने ।

१०८ । **षो नो णोऽभिन्ने**[2] । ५ ।४। षकाररेफाभ्यां परस्य नकारस्य णत्वं भवत्यभिन्ने । इति णत्वं प्राप्तं । नांतरोयनन्नोदेशे इति चाधिकृत्य–

१०९ । **तुभ्नाद्यंतेषु**[3] । ५।४ । क्षुभ्नादीनां पदस्यांत्ये च वर्तमानस्य नकारस्य णत्वं न भवति । इति निषिद्धं । धर्मम् । धर्मौ । धर्मान् । पश्येत्यादि क्रियासंबंधः । धर्म इति त्रिः स्थिते-संज्ञो भा वेरित्यनुवर्तमाने–

११० ।[4]**कर्तृकरणे** । १।४। कर्तरि करणे च कारके वर्तमानात् ङ्याम्मृदः परा भा विभक्ती भवति । कः कर्ता । किं वा करणं

१११ । **स्वतंत्रः कर्ता** ।१।२। इतरेषां कारकाणां साध्यसिद्धिं प्रति प्रवर्तमानानां स्वातंत्र्येण प्राधान्येन यत् कारकं विवक्षितं तत् कर्तृसंज्ञं भवति ।

११२ । **साधकतमं करणः** ।१।२। सिद्धेषु कारकेषु सत्स्वपि साध्यायाः क्रियायाः साधकत्वं प्रकर्षेण यद्विवक्षितं तत् कारकं

---

१ । अस्य स्थाने-नश्च पुंसि । ४ । ३ । ९१ । इति । २ । अस्य स्थाने-षो नो णः समाने । ५ ४ । ८५ । इति । ३ । अस्य स्थाने क्षुभ्नादिषु । ५ । ४ । ११७ । अंतस्य । ५ । ४ । ११५ । इति ।
४ । अस्मिन् भेति पदमधिकं महावृत्तौ ।

करणसंज्ञं भवति । तस्याः भाया एकष्टा द्विभ्याम् बहुभिस् । टकारः इत्संज्ञः स्येनात् ङष्टाङसीति विशेषणार्थः । स्वंको दीः रिति दीत्वे प्राप्ते गोरित्यधिकृत्य-भिसोऽत ऐसिति चानुवर्त्य--

११३ । **स्येनान्ङष्टाङसेः** ।५।१। अकारांतस्य गोर्निमि-त्तभूतानां ङस् टा ङासि इत्येतेषां यथासंख्यं स्य इन् आत् इत्येते आदेशा भवंति । इति टा इत्येतस्य इन इत्ययमादेशो भवति । को गुः ?

११४ । **यत्त्ये तदादि गुः** । १।२। यस्य त्यः यत्त्यस्तस्मिन् यत्त्ये परतः तदादि शब्दरूपं गुसंज्ञं भवति । पूर्ववदेप् । णो नो णोऽभिन्ने इति णत्वं । भ्यामि-यञ्यतो दीरित्यधिकृत्य--

११५ । **सुपि** । ५ । २ । गोरकारांतस्य दीर्भवति यञादौ सुपि परतः ।

११६ । **भिसोऽत ऐस्** । ५ ।१ । अकारांतस्य गोर्निमित्त-भूतस्य भिस ऐसित्ययमादेशो भवति । पूर्ववैदप् । रित्वविसर्जनीयौ च । धर्मेण । धर्माभ्यां । धर्मैः । कर्तरि प्रयोगे स्फीयते इत्यादिः करणे त्ववाप्य इत्यादिका क्रिया संबध्यते । धर्म इति त्रिः स्थिते--

११७ । **संप्रदानेऽप्** । १ ।४ । संप्रदाने कारके वर्तमानात् ङ्याम्मृदो अप् विभक्ती भवति । किं संप्रदानम् ।

११८ । **कर्मणोपेयं संप्रदानं** । १ ।२। कर्मणा करणभूतेन कर्ताप्येण गवादिना पारिभाषिकेण लौकिकेन वा परिस्पंदात्मकेन यदुपेयत्वेन विवक्षितं तत्कारकं संप्रदानसंज्ञं भवति । तस्या एको ङे ।

द्विर्भ्यौ । बहुर्भ्यस् । ङकार इत्संज्ञो ङेर्यः । इति विशेषणार्थः । गोरिति भिसोऽत ऐसिति च प्रस्तुत्य--

११९ । **ङेर्यः । ५।१** । अकारांतस्य गोर्निमित्तभूतस्य ङे इत्येतस्य य इत्ययमादेशो भवति । सान्निपातपरिभाषाया अनित्यत्वात्सुपीति दीत्वं । भ्यामि पूर्ववद् । भ्यासि सुपीति दीत्वं प्राप्तं ।

१२० । **बहौ झल्येत् । ५।२** । गोरकारांतस्य झलादौ बहुवचने परत एकारादेशो भवति । इति एत्वं च प्राप्तं । सुपीति दीत्वं प्राप्तं तयोरुभयोरन्यत्र सावकाशयोरेकत्र समुदितयोस्तुल्यवलयोः स्पर्द्धे सति परत्वविधिर्भवति । पूर्ववत् रित्वविसर्जनीयौ । धर्माय । धर्माभ्याम् । धर्मेभ्यः । दीयते इत्यादि क्रियाभिगमः । धर्म इति त्रिः स्थिते--

१२१ । **काऽपादाने । १ । ४** । अपादाने कारके वर्तमानात् ङ्याम्मृदः का भवति । किमपादानं--

१२२ । **ध्यपाये ध्रुवमपादानं । १ । २** । धियो बुद्धेरपायो विभागो ध्यपायः । तस्मिन् ध्यपाये सति यत् ध्रौव्येन विवक्षितं तत्कारकं अपादानसञ्ज्ञं भवति । तस्या एको ङसिः । द्विर्भ्याम् । वहुर्भ्यस् । ङकारेकारावित्संज्ञौ । ङकारः सोर्ङितीति विशेषणार्थः । इकारो ङ्यसेः स्मिस्मादिति विशेषणार्थः । स्येनान्ङटाङसेरिति ङसेरदादेशो भवति । स्वेको दीरिति दीत्वं । भ्यामि भ्यासि च पूर्ववत् । धर्मात् । धर्म्माभ्याम् । धर्म्मेभ्यः । अक्रोहतीत्यादि क्रियाऽवसीयते । धर्म इति त्रिः स्थिते--

१२३। **ता शेषे। १। ४।** शेषे विवक्षिते ङ्याम्मृदः ता विभक्ती भवति। कर्मादीनामविवक्षा ततोऽन्यः स्वस्वाम्यादिः शेषः। तस्या एको ङस्। द्विरोस्। बहुराम्। ङकारो ङस्ङ स्योरिति विशेषणार्थः। स्येनान् ङस्टाङसेरिति ङसः स्य इत्यय-मादेशो भवति। बहौ झल्येदिति वर्तमाने--

१२४। **ओसि। ५। २।** अकारांतस्य गोरेत्वं भवत्योसि परतः। इत्येत्वमयादेशो रित्वविसर्जनीयौ च। आम्यात्स्मेः सुडिति वर्तमाने--

१२५। **प्रेल्म्वाप्चतुरो नुट्। ५। १।** प्र इल् मु इत्येवं संज्ञेभ्यः आवंताच्चतुःशब्दाच्च नुडागमो भवत्यामि परतः। ङकारटकारयोरित्संज्ञायामुकारउच्चारणार्थः। टकारः टिदादि-रिति विशेषणार्थः। स्वचिह्नस्याविष्टाष्टपञ्चभिन्नछिन्नाछिद्र-श्रुवश्वस्वास्तिकस्य दीरिति गोरिति च प्रस्तुत्य—

१२६। **नाम्यतिसृचतसृ॥** गोरंतस्य दीर्भवति नामि परतः तिसृ चतसृ इत्येतौ शब्दौ वर्जयित्वा पूर्ववत् नकारस्य णत्वम्। धर्मस्य। धर्मयोः। धर्माणाम्। फलमित्यादिशब्दप्रयोगः धर्म इति त्रिः स्थिते—

१२७। **ईबाधारे च**[1]**। १। ४।** आधारे च कारके वर्तमा-नात् ङ्याम्मृद ईप विभक्ती भवति। कः पुनराधारः।

१२८। **आधारोऽधिकरणम्।१।२।** आश्रिते क्रियाऽसि-

१। अस्य स्थाने ईबधिकरणे च। १। ४। ४४। इति।

मित्याधारः । कर्तृसमवायिन्याः शयनादिक्रियायाः कर्मसमवायिन्याश्च पचनादिक्रियायाः अधिकरणत्वेन योऽर्थो विवक्षितः स आधारसंज्ञो भवति । तस्याः एको ङिः । द्विरोस् । बहुः सुप् । ङकारपकारयोरित्संज्ञायां ङकारो "न्याम्मोर्ङेराम्" इति विशेषणार्थः । पकारः सुबिति प्रत्याहारार्थः । पूर्ववदेप् । ओसि च ओसीति एत्वम् । सुपि बहौ झल्येदित्येत्वं । क्विणोः ससेष्षः । नुम्शर इति च प्रस्तुत्य-

१२६ । त्यादेशयोः । ५ । ४ ।४३ । त्यसकारस्यादेशसकारस्य च कवर्गादिणंताच्च नुम्शर्परादुत्तरस्य षत्वं भवति । इति षत्वं । धर्मे । धर्मयोः । धर्मेषु । चित्तं निधेहि इत्यादि क्रियाभिसंबंधः कार्यः । एवमकारांताः पुंलिंगाः शब्दाः सप्तविभक्ती क्रियाभिसंबंधो योज्यः । परमस्ति प्रक्रियाविशेषः सर्वादिषु । तथाहि । सर्व । विश्व । उभ । उभयट् । अन्य । अन्यतर । इतर । डतर । डतम । त्व । त्वत् । नेम । सम । सिम । पूर्व । पर । अवर । दक्षिण । उत्तर । अपर । अधर । स्व । अंतर । त्यत् । तत् । यत् । अदस् । इदम् । एतद् । एक । द्वि । युष्मद् । भवत् । अस्मद् । किम् । इति सर्वादयः । तेषां युष्मदस्मद्वर्जितानां अभिधेयवत् लिंगं भवति । तत्त्रिलिंगं । तत्र यदा पुलिंगास्तदा योज्यंते विशेष्यंते च जसिङस्ङिङस्यामिष्वेव नान्यत्र धर्मादिभ्यः । सर्वः । सर्वौ । जसि सर्व असिति स्थिते-गोरिति भिसोत ऐसिति ङेः स्मैः इति च वर्तमाने—

१३० । जशः शी । ५ । १ । १४ । ह्मिसंज्ञकस्याकारस्य गोर्निमित्तभूतस्य जसः स्थाने शीत्ययमादेशो भवति । शकार इत्संज्ञः शित्सर्वस्येति विशेषणार्थः । कः ह्मिः ।

१३१ । स्निः सर्वादिः[1] । १ । १ । ४० । सर्वादयः स्निसंज्ञा भवंति । इति स्निसंज्ञायां "आदेप्" सर्वे । सर्वादीनामपि संबोधनमस्तीत्येके । हे सर्व । हे सर्वौ । हे सर्वे । सर्वम् । सर्वौ । सर्वान् । सर्वेण । सर्वाभ्याम् । सर्वैः । सर्व ए इति स्थिते-"ङेर्यः" इत्यधिकृत्य—

१३२ । स्नेः स्मैः[2] । ५ । १ । १२ । स्निसंज्ञकस्याकारांतस्य गोर्निमित्तभूतस्य ङे इत्यस्य स्मै इत्ययमादेशो भवति । सर्वस्मै । सर्वाभ्यां । सर्वेभ्यः । ङसि-

१३३ । ङ्यसेःस्मिन् स्मात्[3] । ५ । १ । १३ । स्नेरकारांतस्य गोर्निमित्तभूतयोः ङि असि इत्येतयोः यथासंख्यं स्मिन् स्मात् इत्येतावादेशौ भवतः । इति ङसेः स्मात् । सर्वस्मात् । सर्वाभ्याम् । सर्वेभ्यः । सर्वस्य । सर्वयोः । आमि—

१३४ । आम्यात्स्नेः सुट्[4] । ५ । १ । ३४ । स्नेरवर्णांताद् गोरामि परतः सुट् भवति । पूर्ववदेत्वं षत्वं च । सर्वेषाम् । सर्वस्मिन् । सर्वयोः । सर्वेषु । एवं विश्वोभोभयडन्यान्यतरेतर-

---

१ । अस्य स्थाने-सर्वादिः सर्वनाम । १ । १ । ३५ । इति सूत्रम् ।

२ अस्य स्थाने-सर्वनाम्नः स्मैः । ५ । १ । १२ । इति ।

३ । अस्य स्थाने-ङसिङ्योः स्मात्स्मिनौ । ५ । १ । १३ । इति ।

४ । अस्य स्थाने-आम्यात्सर्वनाम्नः सुट् । ५ । १ । ३४ । इति

शब्दाः । टकारः स्त्रियां ङ्यर्थः । डतरडतमौ त्यौ, तेन तदंतानां कतरयतरततरैकतरकतमप्रभृतीनां ग्रहणं । तेषां त्वनेमासिम शब्दानां च सर्ववद् प्रक्रिया ।

१३५ । [1]**समं सर्वयुक्ते** । १ । १ ।४१ । सर्वार्थे युक्तार्थे च समशब्दः सर्वादिर्भवति । स च सर्ववद् ।

१३६ । [2]**पूर्वपरावरदक्षिणोत्तरापराधराण्यस्वौ व्यवस्थायां** । १ । १ । ४२ । स्वाभिधेयापेक्षावधिनियमो व्यवस्था । तत्रैतानि असंज्ञायां सर्वादीनि भवंति ।

१३७ । [3]**स्वमज्ञातिधनाख्यायां** । १ । १ । ४३ । स्वशब्दः सर्वादिर्भवति, न चेत् ज्ञातिधनपर्यायः ।

१३८ । [4]**बहिर्योगोपसंव्यानेऽपुर्यंतरं** । १ । १ ।४४ । बहिर्भावेन बहिष्ठेन बाह्येन वा वस्तुना योगे उपसंव्याने उपसंवियमाने च वर्तमाने अंतरशब्दः सर्वादिर्भवति न पुरि बहिर्योगेऽपि ।

१३९ । **पूर्वादिरद् ङ्यस्योर्वा**[5] । १ । १ । ४५ । पूर्वादयो नवाकारांता ङिङस्योः परतः सर्वादयो वा भवंति ।

१४० । [6]**जसि** । १ । १ ।४६। जसि च विकल्पः । इति

---

१ । २ । ३। ४ इमे योगाः गणपाठस्थाः न तु सूत्रपाठस्थाः महावृत्तौ ।

५ । ङिङस्योरतः । १ । १ । ४३ । इति सूत्रमस्य स्थाने ।

६ । अस्य स्थाने-पूर्वादयो नव । १ । १ । ४२ इति ।

जस्ङासीङिष्वेव विशेषोऽन्यत्र सर्वशब्दवत् । पूर्वे पूर्वाः । पूर्वस्मात् पूर्वात् । पूर्वस्मिन् पूर्वे । एवं परादयोऽपि नेयाः । त्यदादीनां सप्तानां अत्वस्य किमः कादेशस्य च विधानादकारांतत्वं । त्यद् इति स्थिते पूर्ववत्स्वादिः इतां च निवृत्तिः ।
"सुप्याष्ट्नः" इत्यधिकृत्य-

१४१ । त्यदादेरः । ५ । १ । १७७ । त्यदादीनामकारांतादेशो भवति सुपि परतः । तास्थानेऽतेऽल इति दकारस्यात्वं । एप्यत इति पररूपं । त्यदादेर इति प्रस्तुत्य-

१४२ । तोः[1] सोऽनंते सौ । ५ । १ । १८० । त्यदादीनां तवर्गस्यानंते वर्तमानस्य सकारादेशो भवति सौ परतः । सर्वशब्दवदन्यत् । स्यः । त्यौ । त्ये । हे स्य । हे त्यौ । हे त्ये । त्यं, त्यौ, त्यान् । त्येन, त्याभ्यां, त्यैः । त्यस्मै, त्याभ्यां, त्येभ्यः । त्यस्मात्, त्याभ्यां, त्येभ्यः । त्यस्य, त्ययोः, त्येषां । त्यस्मिन्, त्ययोः, त्येषु । एवं तदादयोऽपि योज्याः । अदस् शब्दस्य तु विशेषः । अदस् इति स्थिते पूर्ववत् स्वादिरितां च निवृत्तिः । तोस्सोऽनंते साविति अधिकृत्य—

१४३ । असौ । ५ । १ । १८१ । असावित्यदसः सकारस्य औकारादेशो भवति । अत्वापवादः । सोश्च खं निपात्यते । तोस्सोऽनंते साविति दकारस्य च सकारः । एच्यैप् । असौ । अदस् औ इति स्थिते-त्यदाद्यत्वे पररूपे ऐपि च कृते-

---

१ । अस्य स्थाने-तोः सः सावनन्ते । ५ । १ । १६४ इति सूत्रं

१४४। **दादुर्दोमोऽदसोऽसेः** । ५ । ३ । ११६ । अदसोऽकारीभूतसकारांतस्य दकारात्परस्य वर्णमात्रस्य च उत्वं दकारस्य च मत्वमिति कर्तव्यं । स्वस्याभाव्योऽत्परः इति प्रथक् नञ्निर्देशात् भाव्योऽपि स्वस्य ग्राहको भवतीति स्वासन्न इति द्विमात्रस्याकारस्य द्विमात्र ऊकारो भवति । अमू । जसि अदे इति स्थिते—

१४५ । **बहुत्वेरीः**[1] । ५ । ३ । ११८ । अदसो बहुत्वे निष्पन्नस्य एकारस्य ईकारो भवति । उत्वापवादो दस्य च मत्वं । अमी । संबोधनेऽप्यविशेषः । अमि पूर्ववदत्वमत्वमुत्वं च । अमुं । औटि पूर्ववद् । अमू । शसि दीत्वं न्पुंसीति नत्वं । पूर्ववदन्यत् । अमून् । टा सुपि-अमु आ इति स्थिते -

१४६ । **टो नाऽस्त्रियां**[2] । ५ । २ । १२६ । सोः परस्य अस्त्रियां विहितस्य टा इत्येतस्य ना इत्यादेशो भवति । इति नाभावे कर्तव्ये मुभावस्यासिद्धत्वादप्राप्ते सुलक्षणे नाभावे—

१४७ । **न मु टाविधौ** । ५ । ३ । ३७ । टा इत्येतस्य विधिष्टाविधिस्तस्मिन् कर्तव्ये न मुभावोऽसिद्धः । इति नाभावे कृते पुनर्मुत्वस्यासिद्धत्वात् सुपीति दीत्वे प्राप्ते टा इत्येतास्मिन् विधिस्तस्मिन्निति च विग्रहे मुभावस्य सिद्धत्वात् दीत्वं न भवति । अमुना । भ्यामि सुपीति दीत्वे सत्युत्वं मत्वं च । अमूभ्यां ।

---

१ । अस्य स्थाने—बहावीरेतः ५।३।८९। इति सूत्रं
२ । अस्य स्थाने—आङो नाऽस्त्रियां । ५ । २ । ११३ । इति सूत्रं ।

१४८ । **नेदमदसोऽकः**[1] । ५ । १ । १९ । इदमदसित्येवाभ्यामकाराभ्यां परस्य भिसो न ऐस् भवति । भिस ऐस्भावाभावादेत्वमीत्वं च । अमीभिः । ङयि उत्वमत्वयोरसिद्धत्वात् स्मैभावः षत्वं च । अमुष्मै । अमूभ्यां । अमीभ्यः । अमुष्मात् । अमूभ्यां । अमीभ्यः । अमुष्य । ओसि एत्वे अयादेशे च कृते उत्वं मत्वं च, अमुयोः । अमीषां । अमुस्मिन् । अमुयोः । अमीषु । इदम् शब्दस्य तु भेदः । इदमिति स्थिते पूर्ववद् स्वादिविधिः । सौ–

१४९ । **इदमो मः** । ५ । १ । १८३ । इदमः सौ सुपि परतो मकारादेशो भवति । अत्वापवादः ।

१५० । **पुंसीदोऽय्** । ५ । १ । १८६ । पुंसि वर्तमानस्य इदम इद्रूपस्य अय् इत्ययमादेशो भवति । टा यत्वापवादः । हल्ङ्यादिना सोः खं । अयं । त्यदाद्यत्वमन्यत्र ।

१५१ । **दः** । ५ । १ । १८४ । इदमो दकारस्य मकारादेशो भवति सुपि परतः । इमौ । इमे । संबोधनेप्येवं । इमं । इमौ । इमान् । टायां--

१५२ । **टौस्यनोऽकः**[2] । ५ । १ । १८७ । इदमः ककारवर्जितस्य इद्रूपस्य अन इत्ययमादेशो भवति टा ओसि सुपि परतः । अनेन ।

१५३ । **हलि खं** । ५ । १ । १८७ । इदम इद्रूपस्य हलादौ सुपि परतः खं भवति । ततो दीत्वं । आभ्यां । भिसि पूर्ववद् ऐस्

---

१ । अस्य स्थाने—इदमदसोः सकोः । ५ । १ । ९ । इति ।

२ । अस्य स्थाने—अनाप्यकः । ५ । १ । १७० । इति सूत्रं ।

भावे निषिद्धे पुनरेत्वं । एभिः । अस्मै । आभ्यां । एभ्यः । अस्मात् । आभ्यां । एभ्यः । अस्य । अनयोः । एषां। अस्मिन्। अनयोः । एषु । इदम इत्यन्वादेशे इति चाधिकृत्य—

१५४ । **टौसिप्येतदश्चैनत्**[1] । ५ । १ । १६० । इदम एतदश्च टा ओस् इप् इत्येतेषु परतः एनदित्ययमादेशो भवति अन्वादेशे कथितानुकथने । पूर्ववदत्वे पररूपत्वे च कृतेऽयमादेशः । एनेन । एनयोः । एनयोः । एनं । एनौ । एनान् । एतच्छब्दस्य एषः। एतौ । एते । इत्यादि नेयं । एकशब्दस्य एकः, एकौ, एके इत्यादि सर्वशब्दवत् । यद्येकशब्दः एकत्वसंख्यायां वर्तते तदैकवचनमेव सर्वासां । एकः । एकं । एकेन । इत्यादि । द्विशब्दस्य द्वित्ववाचित्वात् द्विवचनमेवात्वं च । द्वौ । द्वौ । द्वाभ्यां । द्वाभ्यां । द्वाभ्यां। द्वयोः । द्वयोः। किम् शब्दस्य—

१५५ । **किमः कः** । ५। १ । १७८। किमः क इत्ययमादेशो भवति त्यदादिसंबंधिनि सुपि परतः । कः, कौ, के इत्यादि नेयं । त्वद् युष्मद् भवद् अस्मद् शब्दानां अत्वाभावात् उत्तरत्र निश्चयः । सर्वादीनि असंज्ञायां सर्वादीनि भवंति संज्ञायां तु न भवति । सर्वनामा कश्चित् तस्मै सर्वायेत्यादि भवति । प्रथमादीनां जसि विशेषोऽन्यत्र सर्वशब्दवत्—

१५६ । **प्रथमचरमतयाल्पार्द्धकतिपयनेमाः** । १ । १ । ४७। प्रथमादीनां तयांतस्य च तत्संबंधिनि जसि स्रि संज्ञा

---

१ । अस्य स्थाने—टौसिप्येनदेतदश्च । ४ । ३ । ११९ । इति सूत्रं ।

वा भवति। यदा क्षिसंज्ञा तदा जसः शीभावः। प्रथमे प्रथमाः। चरमे चरमाः। द्वितये द्वितयाः। अल्पे अल्पाः। अर्द्धे अर्द्धाः। कतिपये कतिपयाः।नेमे नेमाः। नेमशब्दस्य सर्वादित्वादन्यत्र सर्वशब्दवत्। तीयत्यांतस्य ङेङसिङसिङिषु विशेषोऽन्यत्र धर्मशब्दवत्।

१५७। [1]**तीयो ङिति**। १।१।५३। तीयित्यांतः शब्दो ङिति कार्ये कर्तव्ये क्षि संज्ञो वा भवति। इति विकल्पेन स्मायादिः। द्वितीयस्मै द्वितीयाय। द्वितीयस्मात् द्वितीयात्। द्वितीयस्मिन् द्वितीये। एवं तृतीयशब्दः इति। आकारांतः क्षीरपाशब्दास्त्रिलिंगस्तत्र पुलिंगो नीयते। पा पाने। पा इत्येषा प्रकृतिः पानार्थे वर्तते। इत्युक्तार्थत्वात् पानशब्दस्य निवृत्तिः। पा इति स्थिते। तस्याः—

१५८। भूवादयो धुः। १। २। १। भू इत्येवमादीनां चुरादिपर्य्यंतानां पाठतोऽर्थतश्च परिच्छिन्नानां[2] धुसंज्ञा भवति। धुसंज्ञायां सत्यां क्षीरमित्युपपदं। ततः कर्मणीत्यम्। क्षीरं पिबति इति विग्रहे—त्यः पर इति धोरिति कर्मणीति क्वचिदिति चानुवर्तमाने—

१६९। **क्विप्**। २। २। ७४। कर्मणि वाचि धोः क्वचित् क्विबित्ययं त्यः परो भवति। स च—

१६०। **कृत्[3] कर्तर्यझिः**। २। ४। ४७ झिवर्जितः

१। अस्य स्थाने तीयस्य ङित्ति। १। १। ४४। इति सूत्रं।
२। अस्य स्थाने "परीतात्मनां" इति पाठः। (क) पुस्तके वर्तते।
३। अस्य स्थाने कर्तरि कृत्। २। ४। ५२। इति सूत्रं।

कृत्संज्ञस्त्यः कर्तरि भवति । क्विप् पुनः कृत् ।

१६१ । कृदमिङ् । २ । १ । ६६ । मिङ्वर्जितो घोर्विहितस्त्यः कृत्संज्ञो भवति । इति कर्तरि भवति । स सर्वोऽप्रयोगीत् । ककारः क्ङितीति विशेषणार्थः । वकारः प्राक्त्केर्वाऽसम इति सति साम्ये बाधनार्थः । इकारः उच्चारणार्थः । पकारः पिति कृति तुगिति विशेषणार्थः । ततः कृदंतस्य मृत्संज्ञायां स्वादिविधिः प्राप्तः । क्षीर अम् पा इति स्थिते सुप् सुपेत्याधिकृत्य–

१६२ । वागमिङ् । १ । ३ । ८५ । मिङ्वर्जितं वाक्संज्ञं कृदंतेनोत्तरपदेन सह नित्यं षसो भवति । अमिङिति प्रतिषेधवचनं ज्ञापकं तिवाक्कारकाणां कृद्भिः सह सुबुत्पत्तेः प्राक् एव सो भवतीति । किं वाग्संज्ञं ।

१६३ । ईपा वाक्[1] । २ । १ । ६७ । तत्र घोरधिकारे ईपा निर्दिष्टस्य वाक् संज्ञा भवति । इति वाक् संज्ञा ।

१६४ । सुपो धुमृदोः । १ । ४ । १६७ । धुमृदोरवयवभूतस्य सुप उप् भवति । इति सुप उप् ।

१६५ । [2]वोक्तं पूर्वं । १ । ३ । १०६ । साधिकारे वया विभक्त्योक्तं पूर्वं प्रयोक्तव्यं । इति क्षीरशब्दस्य पूर्वनिपातः । क्षीरपा इत्येतस्मात् स्वादिविधिः सुटि नास्ति विशेषः । क्षीरपाः, क्षीरपौ, क्षीरपाः । संबोधनेप्येवं । क्षीरपां, क्षीरपौ । शसादा-

---

१ । अस्य स्थाने-ईपात्र वाक् । २ । १ । ७९ इति सूत्रं ।

२ । अस्य स्थाने-वोक्तं न्यक् । १ । ३ । ९३ । इति सूत्रं ।

वजादौ । भस्येत्यनोखमंवस्फादित्यधिकृत्य—

१६६ । **आतो ऽनापः**[1] । ४ । ४ । १३८ । भसंज्ञकस्याकारांतस्य खं भवति आपं वर्जयित्वा । कः पुनर्भः—

१६७ । **यचि भः** । १ । २ । १२० । यकारादावजादौ च भवर्जिते स्वादौ परतः पूर्वं भसंज्ञं भवति । इति भसंज्ञायां क्षीरपः, क्षीरपा । हलादावविशेषः । क्षीरपाभ्यां, क्षीरपाभिः । क्षीरपे, क्षीरपाभ्यां, क्षीरपाभ्यः । क्षीरपः, क्षीरपाभ्यां, क्षीरपाभ्यः । क्षीरपः, क्षीरपोः, क्षीरपां । क्षीरपि, क्षीरपोः, क्षीरपासु । स्त्रियामप्येवं रूपं । तथा सोमपादयः । इकारांतः पुल्लिंगो मुनिशब्दः । मुनि इति स्थिते स्वादयः । सोरित्वविसर्जनीयौ । मुनिः । औकारयोः ।

१६८ । [2]**सुटीदुतः प्राक्स्वं** । ४ । ३ । १०६ । प्राचः पूर्वस्येकारस्योकारस्य च स्वं दीर्भवति अजादौ सुटि परतः । द्वयोरेकः । इति दीत्वं । मुनी । जसि । प्रस्यैप् कावित्यधिकृत्य—

१६९ । **जसि** । ५ । २ । ११६ । प्रांतस्य गोरेब् भवति जसि परतः । मुनयः । संबोधने कौ ।

१७० । **प्रस्यैप् कौ** । ५ । २ । ११५ । प्रांतस्य गोरेब् भवति कौ परतः । "व्योः खं वल्काविति" "हल्ङ्याब्भ्यः सुसिप्त्यनच्" इति प्रस्तुत्य—

---

१ । अस्य स्थाने "आतो धोः" इति सूत्रं । २ । अत्र प्रक्रियाभेदस्तावत् स्थानिसूत्राणि तु "सुटि पूर्वस्वं । ४ । ३ । ८९ । नेच्यात् । ४ । ३ । ९२ । धौ जसि च । ४ । ३ । ९३ ।" इति महावृत्तौ

१७१। केरेङः। ४। ३। ६५। एङंतात्परस्य केरनचः खं भवति। इति सोः खं। द्विबह्वोः पूर्ववत्। हे मुने। हे मुनी। हे मुनयः। अमि पूर्ववत्। मुनीं। मुनी। शसि दीत्वनत्वे-मुनीन्। टायां-टो नाऽस्त्रियामिति नाभावः। मुनिना। हलादावविशेषः। मुनिभ्यां। मुनिभिः। ङेङसिङस्सु भस्यैवित्यधिकृत्य—

१७२। सोर्ङिति[1]। ५। २। ११८। स्वन्तस्य गोरेब् भवति ङादौ सुपि परतः। किं नाम सु। "य्वौ स्त्र्याख्यौ सुः" "ङिति प्रश्चेति च प्रस्तुत्य--

१७३। [2]स्वसखिपति। १। २। ११०। य्वोर्यः प्रःस सुसंज्ञो भवति सखिपतिशब्दौ वर्जयित्वा। इति सुसंज्ञा। मुनये। मुनिभ्यां। मुनिभ्यः। "पदेत्येङः" इत्यधिकृत्य—

१७४। [3]ङस्ङस्योः। ४। ३। १११। एङः परयोः ङस् ङसीत्येतयोरति परतः परः पूर्वो भवति द्वयोरेकः। मुनेः। मुनिभ्यां। मुनिभ्यः। मुनेः। मुन्योः। मुनीनां। न्याम्मोर्ङेरामित्यनुवर्तमाने—

१७५। [4]सोर्डौ। ५। २। १२५ स्वन्तात् गोः परस्य ङेर्डावित्ययमादेशो भवति। डकाराष्टिखार्थः। भस्येति खमिति चानुवर्तमाने—

१। 'सोर्ङि' इति पाठो मद्रासीयसूत्रपाठे शब्दार्णवचांद्रिकायां चवर्त्तते।

२। अस्य स्थाने-"स्वसखि। १। २। ९६। पतिः से। १। २। ९७" इति सूत्रद्वयं।

३। अस्य स्थाने "ङसिङसोः। ४। ३। ९७ इति सूत्रं।

४। अस्य स्थाने-"औदच्च सोः। ५। २। ११२। इति सूत्रं।

१७६ । ङिति टेः [1] । ४ । ४ । १३।६१। गोर्भस्य टेः खं भवति ङिति परतः । इति टिखं । मुनौ । मुन्योः । मुनिषु । एवं रविकाविकलिवालिकेलिवन्ह्यग्निवृष्टिकमिध्वनिदधिकपिप्रभृतयः । सखिशब्दस्याभिधेयालिंगस्य विशेषः । सखि इति स्थिते स्वादिविधिः । सखितोऽकावित्यधिकृत्य—

१७७ । [2]ङन्सौ । ५ । १ । ७४। सखिशब्दस्य गोर्निमित्तभूते किवर्जिते सौ परतो ङन्नित्ययमादेशो भवति ।

१७८ । [3]तास्थानेऽतेलः। १ । १ । ५४। तायाः स्थाने विधिरुच्यमानोऽते वर्तमानस्यालः स्थाने भवति । इति अंतेलः स्थाने विज्ञाते पुनरनेकवर्णः सर्वस्य इति सर्वस्य प्राप्ते—

१७९ । ङित् । १ । १ ।५५ । ङिदेवानेकाल् अंत्यस्यालः स्थाने भवत्यतोऽन्यः सर्वस्य । इति नियमेन अंत्यस्य इकारस्य स्थाने भवति । ङकारोऽप्रयोगीत्संज्ञायां ङिदिति विशेषणार्थः । हल्ङ्यादिना सोः खं । दीः इति गोः इति "नोङः" इति च प्रस्तुत्य—

१८० । घेऽकौ। ४ । ४ । ६। किवर्जिते घे परतो गोर्नोङो दीर्भवति । त्यखे त्याश्रयमिति सुबंतं पदं । पदस्येत्यधिकृत्य—

१८१ ।[4] नो मृंदृते खं। ५ । ३ । ४३। मृदः परस्यांतेऽवयवे वर्तमानस्य नकारस्य खं भवति । सखा । सुटि "ओतो णित्" इत्यनुवर्तमाने—

---

१ । अस्य स्थाने-"टेः । ४ । ४ । १२७ ।" इति सूत्रं ।
२ । अस्य स्थाने "अनङ् सौ । ५ । १ । ७० । इति सूत्रं ।
३ । अस्य स्थाने एतादृशमेव सूत्रद्वयं ।
४ । अस्य स्थाने नखं मृदंतस्याकौ । ५ । ३ । ३० इति सूत्रं ।

१८२। [1]सखितोऽकौ। ५। १। ७३। सखिशब्दात्परं घं किवर्जितं णित् भवति। मृजेरैक्त्यधिकृत्य—

१८३। ञ्णित्यचः। ५। २। ३। गोरजंतस्य अकारणकारानुबंधे त्ये परत ऐब् भवति। आयादेशः। सखायौ। सखायः। संबोधनेऽप्येवं। अकाविति प्रतिषेधात् ङन्न भवति। ततः प्रस्यैप् कावित्येप् केश्च खं। द्विबह्वोः पूर्ववत्। हे सखे। हे सखायौ। हे सखायः। सखायं। सखायौ। शसि पूर्ववत् सखीन्। टायां स्वसखिपतीति सुसंज्ञाप्रतिषेधान्न नाभावः। सख्या। हलादावविशेषः। सखिभ्यां। सखिभिः। ङेऽपि सुसंज्ञाविरहात् एब् न भवति। सख्ये। सखिभ्यां। सखिभ्यः। ङसिङसोः "ङसृङस्योरिति" "अत उत्" इति च प्रस्तुत्य—

१८४। ख्यत्योऽतः[2]। ४। ३। ११३। ख्य त्य इत्येताभ्यां अनजकाभ्यां परस्य ङसृङस्योरकारस्य उत् भवति। अत इति स्थानिनिर्देशात् द्वयोरेक इति निवृत्तः। सख्युः। सखिभ्यां। सखिभ्यः। सख्युः। सख्योः। सखीनां। ङौ "न्याम्मोर्ङेरामिति "इदुतः" इति च प्रस्तुत्य—

१८५। औः[3]। ५। २। १२४। इदुद्भ्यां परस्य ङेरौकारो भवति। सख्यौ। सख्योः। सखिषु। पति शब्दस्य सुटि मुनि

१। अस्य स्थाने-"सख्युरकौ। ५। १। ७९। इति सूत्रं।
२। अस्य स्थाने-"ख्यत्यादतः। ४। ३। ९९। इति सूत्रं।
३। अस्यापि कार्यं "औदच्च सोः। ५। २। ११२।" इति योगेनैव कृतं।

शब्दवदन्यत्र सखिशब्दवत् । पतिः । पती । पतयः । हे पते । हे पती । हे पतयः । पतिं । पती । पतीन् । पत्या । पतिभ्यां । पतिभिः । पत्ये । पतिभ्यां । पतिभ्यः । पत्युः । पतिभ्यां । पतिभ्यः । पत्युः । पत्योः । पतीनां । पत्यौ । पत्योः । पतिषु । त्रिशब्दोऽभिधेयलिङ्गः । अतो बहुवचनमेव आदशभ्यः संख्याबहुविषये त्यविधानात् । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः । त्रिभ्यः । आमि–

१८६ । त्रेस्त्रयः । ५ । १ । ३५ । त्रिशब्दस्य त्रय इत्ययमादेशो भवति आमि परतः । पूर्ववद् नुट् दीत्वं णत्वं च । त्रयाणां । त्रिषु । कतिशब्दस्याऽव्यक्तलिंगस्य विशेषः । किमस् इति स्थिते का संख्या मानमेषां इति विगृह्य–

१८७ । किमश्च स्येडतिश्च[1] । ३ । ४ । २१० । स्यिः संख्या यन्मानं तद्वाचिनः किम् शब्दात् तदिति वासमर्थात् यद् तद्भ्यां च अस्येति तार्थे डतिस्त्यो भवति धतुश्च । डकारष्टिखार्थः। सुपो धुमृदोरिति सुबुप् । बहुविषयत्वाद्बहुवचनमेव भवति । जस्शसोः शिरिति वर्तमाने—

१८८ । उबिलः । ५ । १ । १६ । गोरिल्संज्ञकात् परयोर्जस्शसोः उब्भवति । क उप् ।

१८९ । ष्णांता चेल्[2] । १ । १ । ३६ । षकारांता नकारांता च या संख्या डातित्यांताश्च इल् संज्ञा भवंति । इति इल् संज्ञा ।

---

१ । अस्य स्थाने-"किमः । ३ । ४ । १६३ । संख्या परिमाणे डतिश्च । ३ । ४ । १६४ ' इति च सूत्रं ।

२ , अस्मिन् सूत्रे चेति पदं नास्ति महावृत्तौ

कति तिष्ठंति । कति पश्य । कतिभिः । कतिभ्यः । कतिभ्यः । कतीनां । कतिषु । एवं यत्तदोर्यतितंतिशब्दौ तन्नेयौ । ईकारांतोऽभिधेयलिंगो ग्रामणीशब्दः । णीञ् प्रापणे । इति णीञ् अकारोऽप्रयोगीत् ञितः फलेशे इति विशेषणार्थः । पूर्ववद् धुसंज्ञायां—

१६० । ध्वादेः षणोऽष्टयाष्ठिवष्वस्कः स्नं [1] ४।३।६२ ष्टयाष्ठिवष्वष्कवर्जितस्य धोरादिभूतस्य षकारस्य णकारस्य च यथासंख्यं सकारो नकारश्चादेशो भवति । ग्रामशब्दात्कर्मणीप् । ग्रामं नयतीति विगृह्य—"क्वचित् क्विबिति" क्विप् । स च प्रतिलब्धकृत्संज्ञः कर्तरि भवति । पूर्ववदप्रयोगीत् प्रयोजयति । वागमिङिति सविधिः । सुपो धुमृदोरिति सुबुप्, वोक्तं पूर्वमिति ग्रामशब्दस्य पूर्वनिपातश्च ।

१६१ । ग्रामाग्राण्णीः ।५।४।१०५। ग्राम अग्र शब्दाभ्यां परस्य नीनकारस्य णत्वं भवति । इति णत्वं । पूर्ववद् स्वादिविधिः सोरित्वविसर्जनीयौ । अजादौ-यणीञ् इत्यधिकृत्य—

१६२ । एर्गिवाक्चादुकोऽसुधियः । ४ । ४ । ८२ । गिनाक्चाद् परो यो उङ् तस्मात्परस्य इवर्णस्य यणादेशो भवति सुधिशब्दं वर्जयित्वा । हलादावविशेषः । ग्रामणीः । ग्रामण्यौ । ग्रामण्यः । संबोधनेऽप्येवं । ग्रामण्यं । ग्रामण्यौ । ग्रामण्यः । ग्रामण्या । ग्रामणीभ्यां । ग्रामणीभिः । ग्रामण्ये । ग्रामणीभ्यां । ग्रामणी-

---

१ । अस्य स्थाने "ध्वादेः षः सः । ४ । ५ । ३ । णो नः । ४ ३ । ५४ । 'ष्ठीवातिष्वष्कातिष्टयतीनां प्रतिषेधो वक्तव्यः" इति वार्तिकं च ।

भ्यः । ग्रामण्यः । ग्रामणीभ्यां । ग्रामणीभ्यः । ग्रामण्यः । ग्रामण्योः । ग्रामण्यां । कौ —

१६३ । **न्याम्मोर्केराम्**[1] । ५ । २ । ११६ । नीइत्येतस्मात् आबंतात् मुसंज्ञकाच्च परस्य केः आमित्ययमादेशो भवति । ग्रामण्यां । ग्रामण्योः । ग्रामणीषु । एवं अग्रणी प्रभृतयोऽपि योज्याः । स्त्रीलिंगेप्प्येवमेव । उन्नीशब्दस्य भेदः । णीञ् इति स्थिते नत्वं तस्य गिना योगः । को गिः । प्रादिरिति वर्तमाने—

१६४ । **क्रियायोगे गिः** । १ । २ । १५७ । क्रियायां ध्वर्थेन योगे संबंधे सति प्रादयो गिसंज्ञा भवंति । के पुनः प्रादयः । प्रपराऽपसमन्ववनिर्दुर्व्याङ्न्यधयोऽप्यतिसूदभयश्च । प्रतिना सह लक्षयितव्याः पर्युपयोरपि लक्षणमत्र ॥१॥ इति विंशति प्रादयः ।

१६५ । **तिः** । १ । २ । १५८ प्रादयः तिसंज्ञाश्च भवंति ।

१६६ । **प्राग् धोस्ते** । १ । २ । १७५ । ते गितिसंज्ञाः शब्दाः धोः प्राग् प्रयुज्यंते । इति पूर्वप्रयोगनियमः । तत्तम्सा-त्राशःकृत्वसूसुष्वद्धामूत्त्कांतुमुसुम्मिङाभवित्यन्यकुस्वरादयो झि-रित्युच्छब्दस्य झिसंज्ञायां सत्यां सुपो झिरित्युप्वचनसामर्थ्यात् सुः तत उप् । नयतीति विगृह्य-पूर्ववद् क्विबादिः । उत् स् नी इति स्थिते—

१६७ । **तिक्वाङ्दुः**[2] । १ । ३ । ८२ । तिसंज्ञाः कुः आङ् दुस् इत्येते च शब्दाः समस्यंते नित्यं षसो भवति । पूर्ववद्

१ । अस्य स्थाने "ङेराम् म्याम्नीभ्यः । ५ । २ । ११०" इति सूत्रं । २ । अस्य स्थाने "तिकुप्रादय । १ ।३।८१" इति महावृत्तौ

सुसुप् पूर्वनिपातश्च । वसो णो वा के इति नकारस्य नत्वं । उन्नी इत्यतः पुनः स्वादयः । उन्नीः । उन्न्यौ । उन्न्यः । ग्रामणीशब्द-वत् । स्त्रीलिंगेऽप्येवं रूपं । नीशब्दस्य भेदः । णीञ् इति पूर्ववन्नत्वे क्विबिधिः । नी इत्यतः स्वादयो हलादावविशेषः । अजादौ तु—

१९८ । [1]हलश्नुधुभ्रुवोऽच्यीयुव्योः । ४ । ४ । ७५ । हलः परः श्नु धु भ्रु इत्येतेषां इवर्णोवर्णयोरचि परतः इय् उव् इत्येतौ आदेशौ भवतः । नीः । नियौ । नियः । संबोधनेऽप्येवं । नियं । नियौ । नियः । निया । नीभ्यां । नीभिः । निये । नीभ्यां । नीभ्यः । नियः । नीभ्यां । नीभ्यः । नियः । नियोः । नियां । नियां । नियोः । नीषु । स्त्रीलिंगेऽपि समानं रूपं । सुधी-शब्दस्य विशेषः । ध्यै स्मै चिंतायां । डुधाञ् धारणे च । डुकारञकारयोरप्रयोगीत्वात् डुकारो ड्वितः क्त्रिरिति विशेष-णार्थः । ञकारो दविध्यर्थः । प्राक् सुशब्दः प्रयुज्यते । सुध्या-यति सुद्धातीति वा सुधीः । अत एवाऽसुधिय इति निपातनात् रूपसिद्धिः । सुधीः । सुधियौ । सुधियः । इत्यादि नीशब्दवत् । एवं सुभ्र्यादयः ।

उकारांतः पुंलिंगः कारुशब्दः स च मुनिशब्दवत् । कारुः । कारू । कारवः । इत्यादि । एवं बाहुभानुकेतुकंतुतंतुपटुप्रभृतयो नेयाः । क्रोष्टुशब्दस्य विशेषः । क्रोष्टु इति स्थिते स्वादयः ।

---

[1] । अस्य स्थाने 'श्नुधुभ्रुवां य्वोरचीयुवौ । ४ । ४ । ७१ । इति सूत्रं ।

"एर्वे" इति "सखितोऽक्काविति" चाधिकृत्य--

१९९। [1]तृज्वत्क्रोष्टुः। ५। १। ७१। क्रोष्टुशब्दः तृजंत इव भवति किवर्जिते घे परतः। इति तृज्वद्भावे सति "ङन्सौ" इत्यधिकृत्य--

२००। ऋदुशनस्पुरुदंशोऽनेहसां। ५। १। ७५। ऋकारांतानां उशनस् पुरुदंशस् अनेहस् इत्येतेषां च किवर्जिते सौ परतः ङकादेशो भवति। "तास्थानेऽतेल:" इति सिद्धे ङिदिति नियमेन अंत्यस्य भवति। पूर्ववद् ङकारस्य निवृत्तिः। सोश्च खं। घेऽकाविति दीत्वं। नो मृदंते खमिति नखं। क्रोष्टा। औटि। "प्रस्यैप् कौ" इत्यनुवर्तमाने--

२०१। ऋतो ङिघे। ५। २। ११४। ऋकारांतस्य गोरेब् भवति ङौ घे च परतः। रंतोऽणुरिति रपरत्वं। "दीर्गो-र्नेङि:" घेऽकाविति प्रस्तुत्य--

२०२। स्वसृनप्तृनेतृत्वष्टृक्षतृहोतृपोतृप्रशास्तृणां। ४। ४। ८। स्वस्रादीनां तृन् तृच् इत्येवमंतानां अप् शब्दस्य च किवर्जिते घे परतो गोरुङो दीर्भवति। क्रोष्टारौ। क्रोष्टारः। किसंबोधने तृज्वद्भावाभावात् प्रस्यैप् का वित्येप्। हे क्रोष्टो। हे क्रोष्टारौ। हे क्रोष्टारः। क्रोष्टारं। क्रोष्टारौ। शसि न्पुंसीति दीत्वनत्वे। क्रोष्टून्। टादावजादौ--

---

१। अस्य स्थाने नास्ति सूत्रं, परं क्रोष्टुशब्दस्याभिधानवशात् किवर्जिते घे न भवंति रूपाणि, एवं च क्रोष्टृशब्दस्यापि किशस्भिस्भ्यामाम्सुप्सु नास्ति प्रयोगः। अन्यत्तु द्वयोरपि भवति।

२०३ । वाऽन्यानि । ५ । १ । ७८ । क्रोष्टुशब्दस्य तृज्वद्भावो वा भवति तृतीयादावचि परतः । हलादावविशेषः । यदा ऽतिदेशस्तदा यथादेशोऽन्यत्र शास्त्रवत् । क्रोष्ट्रा । क्रोष्टुना । क्रोष्टुभ्यां । क्रोष्टुभ्यः । ङसिङसोरित्यधिकृत्य—

२०४ । ऋत उत्[1] । ६ । १ । १११ । ऋकारांतात् परयोः ङसिङसोरति परत उकारादेशो भवति । इयोरेकः । उरण्रपर इति रपरत्वं ।

२०५ । रात्सः । ५ । ३ । २५ । रेफात्परस्य सकारस्य सं भवति । इति सत्वं । क्रोष्टुः । क्रोष्टुभ्यां । क्रोष्टुभ्यः । क्रोष्टुः । क्रोष्ट्रोः । क्रोष्ट्वोः । नित्यत्वादामि नुटा तृज्वद्भावो बाध्यते । क्रोष्टूनां । क्रोष्टरि । क्रोष्टौ । क्रोष्ट्वोः । क्रोष्टुषु ॥ ऊकारांतः खलपूशब्दोऽभिधेयलिंगः । पूञ् पवने । पूञः ञकारो दाविध्यर्थः । घुसंज्ञायां सत्यां खलशब्दात् अम् । खलं पुनातीति विगृह्य क्विबादिविधिः । आगमिकीति सविधिः । सुप उत् । मृत्संज्ञायां स्वादयः । खलपूः । सुप्यजादौ । "यचिरः" एर्गिनाभ्यादुङोऽसुधियः" इत्यनुवर्तमाने-

२०६ । सुप्योः । ४ । ४ । ६३ । गि वाम् चपूर्वादुकः परस्य उवर्णस्य यणादेशो भवति अजादौ सुपि परतः । खलप्वौ । खलप्वः । हे खलपूः । हे खलप्वौ । हे खलप्वः । खलप्वं । खलप्वौ । खलप्वः । खलप्वा । हलादावविशेषः । खलपूभ्यां । खलपूभिः । इत्यादि नीशब्दवज्ज्ञेयं । एवं यवोत्पूर्वस्य लूञ् छेदने इत्यस्य

---

१ । अस्मिन् सूत्रे उदिति पाठो महाकृतो ।

यवलूउल्लूशब्दौ । लूशब्दात्पुउवादेशः । लूः । लुवौ । लुवः । इत्यादि । प्रतिपूर्वाद् भू सत्तायामित्यस्मात् क्विबादिः स्वाद्यश्च । "इन्करपुनर्वर्षाभ्यो भुवः" इति नियमादजादौ सुपि यणादेशो न भवति । हलादावविशेषः । प्रतिभूः । प्रतिभुवौ । प्रतिभुवः । हे प्रतिभूः । हे प्रतिभुवौ । हे प्रतिभुवः इत्यादि । एवं स्वयंभूमित्रभूप्रभृतयो नेयाः । स्त्रीलिंगेप्येतेषामेवं रूपं ।

ऋकारांतः पुलिंगः पितृशब्दः । पितृ इति स्थिते पूर्ववद् स्वादयः । सौ ऋदुशनस्पुरुदंशोऽनेहसामिति ङन् । अन्यत् पूर्ववत् । स्वसृनप्तृ इत्यादिना नियमेन दीत्वं न भवति । पिता । पितरौ । पितरः । संबोधने कौ ङन भवति । प्रस्यैप् काविति एप् । हे पितः । हे पितरौ । हे पितरः । पितरं । पितरौ । शसि दीत्वनत्वे पितॄन् । टादौ यणादेशः । पित्रा । पितृभ्यां । पितृभिः । पित्रे । पितृभ्यां । पितृभ्यः । ङस्ङस्योः "ऋत उ." इत्युत्वं । पितुः । पितृभ्यां । पितृभ्यः । पितुः । पित्रोः । आमि नुण्णत्वदीत्वानि । पितॄणां । कथमत्र णत्वं षकाररेफाभावादिति चेदुच्यते ऋवर्णे रेफभागोऽस्तीति प्रतिज्ञानात् । तच्च धिन्विकृण्व्योरिति निर्देशात् तृप्नातेः क्षुभ्नादिषु णत्वप्रतिषेधाच्च ज्ञायते । पितरि । पित्रोः । पितृषु । एवं मातृजामातृप्रभृतयः । नृशब्दस्य पुनरामि विशेषः । अन्यत्र पितृशब्दवत् । वेर्गोरित्यधिकृत्य--

२०७ । नुर्वा । ४ । ४ । ४ । नृशब्दस्य गोर्दीर्भवति वा नामि परतः । नृणां पतिः । नॄणां पतिः । तृचत्यांतस्य मातृश-

स्यस्य भेदः। माङ् माने। ङकारो दविभ्यर्थः। मा इति स्थिते निर्मीत इति विगृह्य—

२०८। [1]ण्वुतृचौ।२।१।१२६। धोः ण्वु तृच् इत्येतौ त्यौ भवतः। इति तृच्। स च "कृत् कर्तर्यशिरिति कर्तरि भवति। चकारः ण्वुतृज्भ्यामिति विशेषणार्थः। मातृ इत्यतः स्वादयः। क्रोष्टुशब्दवत् प्रक्रिया। माता। मातारौ। मातारः। हे मातः। हे मातारौ। हे मातारः। मातारं। मातारौ। मातॄन्। मात्रा। मातृभ्यां। मातृभिः। मात्रे। मातृभ्यां। मातृभ्यः। मातुः। मातृभ्यां। मातृभ्यः। मातुः। मात्रोः। मातॄणां। मातरि। मात्रोः। मातृषु। कर्तृशब्दस्य भेदः। डुकृञ् करणे। डुशब्द-ञकारावितौ पूर्ववद् प्रयोजयतः। कृ इत्येतस्य धुसंज्ञायां सत्यां करोतीति विगृह्य पूर्ववद् तृच्। यस्ये तदादि गुरिति पूर्वस्य गुसंज्ञायां—

२०९। शेषोऽग एव। २।४।८९। धोर्विहितो मिङ्-शिद्भ्यामन्ये ये त्यास्ते अग संज्ञा एव भवंति। इत्यगसंज्ञा "गोः" मिदेरेविति च वर्तमाने—

२१०। गाऽगयोः। ५। ३। ६१। गे चागे च परतो गोरेब्भवति। कस्य स्थाने—

२११। इकस्तौ। १। १। १७। तौ एबैपौ अनिर्दिष्टस्था-निनौ इक एव स्थाने भवतः। इति इकः स्थाने भवति। रंतत्वं

१। ण्वुतृचौ। २। १। १५०॥ इति सूत्रस्य स्थाने।

[illegible] त्रित्वं । कर्तृ इत्यतः स्वादयः । कर्ता । कर्तारौ । कर्तारः ।
इत्यादि मातृशब्दवत्। एवं भर्तृहर्तृप्रभृतयस्तृप्रत्यांताः। ऋकारांतो
वाच्यलिंगः प्रियगृ शब्दः । उभाभ्यां सुः । प्रियो गृरस्य इति
विगृह्य-सुप्सुपा, अवाम्यार्थेनैकं वमिति वर्तमाने—

२१२ । एकार्थं । १ । ३ । ९० । एकः समानोऽर्थो
द्रव्यमधिकरणं यस्य तदेकार्थं समानाधिकरणं अनेकं सुबंतं सुबंतेन
सह समस्यते बसंज्ञः सो भवति । सुब्लुप् ।

। २१३ । गुणस्निस्थि बे । १ । ३ । १११ । गुणःवि-
शेषणं स्निः सर्वादिः स्थिः संख्या च बसे पूर्वं प्रयोक्तव्यं । इति
प्रियशब्दस्य पूर्वनिपातः। प्रियगृ इत्यतः स्वादयः। ऋदुशनसित्यत्र
ऋतो ङिधे इत्यत्र च तकारान्तं कनृप्पौ भवतः । प्रियगृः ।
प्रियग्रौ । प्रियग्रः । हे प्रियगृः । हे प्रियग्रौ । हे प्रियग्रः ।
इत्यादि । लृकारलृकारौ चाप्रासिद्धौ । एकारांतोऽभिधेयलिंगोऽ-
तिहेशब्दः । अतिशब्दात्सुः । हे शब्दादम् । कथमत्र अम् ।
अनुकरणशब्दोऽनुकार्ये हेशब्दे वर्तयति । अतिक्रमणक्रियायाः
हेशब्दः कर्म भवति इति अतिक्रांतो हेशब्दं इति विगृह्य-प्रात्यव
परिनिःप्रत्यादयो गतक्रांतक्रुष्टगोवक्तान्तस्थितादिषु वेप्भाप्के-
प्भ्यरिति अतिशब्दः क्रांतेर्थे वर्तमानो वांतो हेशब्देनेबंतेन
सह षसो भवति । सुब्लुप् । अतिहे इत्यतः स्वादयः । अतिहेः ।
अतिहयौ । अतिहयः । हे अतिहेः । हे अतिहयौ । हे अति-
हयः । अतिहयं । अतिहयौ । अतिहयः । अतिहया । अति-
हेभ्यां । अतिहेभिः । अतिहये । अतिहेभ्यां । अतिहेभ्यः ।

अतिहेः । अतिहेभ्यां । अतिहेभ्यः । अतिहेः । अतिह्योः । अतिह्यां । अतिह्यि । अतिह्योः । अतिहेषु । एवं सेपरमोशब्दौ । ओकारांतः उभयलिंगो गोशब्दः । ततः स्वादयः । एवें इत्यधिकृत्य--

२१४ । ओतो णित्[1] । ५ । १ । ७१ । ओकारात्परं घं णिद्वद् भवति । णिद्वद्भावस्य प्रयोजनं ञ्णित्यच इत्यैप् । गौः । गावौ । गावः । हे गौः । हे गावौ । हेगावः । वाम्शसोरिति च प्रस्तुत्य—

२१५ । ओतः । ४ । ४ । ७९ । ओकारांतस्य गोराकारांतादेशो भवति अम्शसोः परतः । गां । गावौ । गाः । गवा । गोभ्यां । गोभिः । गवे । गोभ्यां । गोभ्यः । गोः । गोभ्यां । गोभ्यः । गोः । गवोः । गवां । गवि । गवोः । गोषु । एवं द्योशब्दः । ऐकारांतः पुलिंगो रैशब्दः । ततः स्वादयः । "सुप्याण्ट्न" इत्यधिकृत्य—

२१६ । रायः स्भि[2] । ५ । १ । ५९ । रैशब्दस्य गोराकारो भवति सकारादौ भकारादौ च सुपि परतः । राः । रायौ । रायः । रायं । रायौ । रायः । राया । राभ्यां । राभिः । राये । राभ्यां । राभ्यः । रायः । राभ्यां । राभ्यः । रायः । रायोः । रायां । रायि । रायोः । रासु । औकारांतः पुलिंगो ग्लौशब्दः । ततः स्वादयः ।

---

१ । अस्य स्थाने-गोर्णित् । ५ । १ । ६७ । इति सूत्रं ।
२ । अस्य स्थाने "रायो हलि । ५ । १ । १४४ । इति सूत्रं ।

हलादावविशेषोऽजादावबादेशः । गौः । गावौ । गावः । इत्यादि नेयं ।

इत्यजंताः पुंलिंगाः ॥

अथाजंताः स्त्रीलिंगा उच्यंते । तत्राकारांतोऽप्रसिद्धः । तत्राकारांतस्तु दयाशब्दः । ङ्याम्मृदः स्त्रियामित्यधिकृत्य-

२१७ । [1]**अजाद्यतां टाप्** ।३।१।४। अज इत्येवमादिना-मकारांतानां च स्त्रियामभिधेयायां ये मृदस्ततष्टाप् भवति । इति दय इत्यतष्टाप् । टपकारयोरित्संज्ञा । टकारष्टाप्डापोः सामान्यग्रहणाविघातार्थः । पकारः सामान्यग्रहणार्थः । स्वेऽको दीः । द्वयोरेकः । दया इति स्थिते स्वादयः ।

२१८ । [2]**हल्ङ्याब्भ्यः सुसिप्त्यनच्** । ४ । ३ । ६२ । हलंताद् ङी चाप् च यो दीस्तदंताच्च परेषां सुसिप्तीनां अनचां खं भवति । दया । औकारयोः "जसःशी" इति वर्तमाने-

२१९ ।**आप औतः**[3] । ५ । १ । १५ । गोराबंतात् उत्तरस्य औकारस्य शीत्ययमादेशो भवति । शकारः शीम्वोरिति विशेषणार्थः । आदेप् । दये । जसि स्वेको दीः । दयाः । किंसंबोधने- "बहौ झल्येत्" "टि चापः" इति च प्रस्तुत्य-

२२० । **कौ** । ५।२ । १०८ । आबंतस्य गोरेब् भवति कौ

---

१ । अस्य स्थाने "अजाद्यतष्टाप् । ३ । १ । ४ । इति सूत्रं ।

२ अस्मिन् सूत्रे "हल्ङ्यापो" इति पाठो महावृत्तौ ।

३ । अत्र "ओतः स्थाने औतो वर्तते महावृत्तौ

परतः । केरेकः इति केश्च स्वं । हे दये । हे दये । हे दयाः ।
पूर्वोऽमीति पूर्वत्वं । दयां । दये । शसीति दीत्वं । दयाः ।

२२१ । टि चापः । ५ । २ । १०७ । टा सुपि ओसि च परतः गोराबंतस्य एत्वं भवति । इति एत्वमयादेशः । दयया । हलाद्यावविशेषः । दयाभ्यां । दयाभिः । ङित्सु वचनेषु सोर्बीति वर्तमाने-

२२२ । याडापः । ५ । २ । ११७ । आबंतस्य गोर्निमित्तभूतस्य ङितः सुपो याडागमो भवति स च टिदादिरिति परस्यादौ भवति । टकार आदेशविघ्यर्थः । एच्यैप् । दयायै । दयाभ्यां । दयाभ्यः । दयायाः । दयाभ्यां । दयाभ्यः । दयायाः । "टि चापः" इति एत्वमयादेशः । दययोः । आमि प्रेलुम्वामित्यादिना नुट् । दयानां । दयायां । दययोः । दयासु । एवं शालामालाशुक्लादयो नेयाः । जराशब्दस्याजादौ विशेषः । अन्यत्र दयाशब्दवत् । "रोच्युः" "वास्येद्र्योंटीति" च वर्तमाने—

२२३ । जराया ङस्[1] । ५ । १ । १७६ । जराशब्दस्य गोर्निमित्तभूतेऽजादौ सुपि परतो वा ङसादेशो भवति । ङकारोऽत्यविघ्यर्थः । जरा । जरसौ, जरे । जरसः, जराः । हे जरे । हे जरे, हे जरसे । हे जराः, हे जरसः । जरसं, जरां । जरसौ, जरे । जरसः, जराः । जरसा, जरया । जराभ्यां । जराभिः । जरसे, जरायै । जराभ्यां । जराभ्यः । जरसः,

---

१ । अस्य स्थाने "जराया वाऽसङ् । ५ । १ । १६० । इति सूत्रं

जराभ्याः । जराभ्यां । जराभ्यः । जरसः, जरायाः । जरसोः, जरयोः । जरसां, जरायां । जरसि, जरायां । जरसोः, जरयोः । जरासु । सर्वादेरपि टापि कृते दयाशब्दवदन्यत्राप्राप्तिः । सर्वा । सर्वे । सर्वाः । हे सर्वे । हे सर्वे । हे सर्वाः । सर्वाम् । सर्वे । सर्वाः । सर्वया । सर्वाभ्यां । सर्वाभिः । किंतु—"स्नोर्ङि", "याडाप." इति च प्रस्तुत्य—

२२४ । [1]स्नेः स्याट् प्रश्च । ५ । २ । ११८ । स्निसंज्ञकादाबंतात् उत्तरस्य ङितः स्याडागमो भवति प्रावेशश्च पूर्वस्यापः । सर्वस्यै । सर्वाभ्यां । सर्वाभ्यः । सर्वस्याः । सर्वाभ्यां । सर्वाभ्यः । सर्वस्याः । सर्वयोः । आमि । आम्यात्स्नेः सुडिति सुट् । सर्वासां । सर्वस्यां । सर्वयोः । सर्वासु । एवं विश्वादीनामुभयशब्दवर्जितानां उत्तरशब्दपर्यंतानां रूपं नेयं । त्यदादीनां तु स्वादौ त्यदाद्यत्वे पररूपत्वे टापि च कृते सर्वाशब्दवत् योज्यं । स्या । त्ये । स्याः । इत्यादि । सा । ते । ताः । इत्यादि । अदसः पूर्ववदौत्वादिनिपातनं । असौ । अन्यत्र त्यदादित्वादत्वे कृते सर्वाशब्दवत् । अमू । अमूः । हे असौ । हे अमू । हे अमूः । अमूं । अमू । अमूः । अमुया । अमूभ्यां । अमूभिः । अमुष्यै । अमूभ्यां अमूभ्यः । अमुष्याः । अमूभ्यां । अमूभ्यः । अमुष्याः । अमुयोः अमूषां । अमुष्यां । अमुयोः । अमूषु । इदमः स्वादयः । सौ— "इदमो मः" इति मकारस्य मकारादेशः ।

---

[1] । अत्र स्नेः स्थाने सर्वनाम्नः इति । तुल्यमन्यत् ।

२२५। यः सौ। ४। १। १८४। इदमो दकारस्य यकारादेशो भवति सौ परतः। इयम्। एवमन्यत्र त्यदाद्यत्वे मत्वे च कृते टाप्। इमे। इमाः। हे इयं। हे इमे। हे इमाः। इमां। इमे। इमाः। अनया। आभ्यां। आभिः। अस्यै। आभ्यां। आभ्यः। अस्याः। आभ्यां। आभ्यः। अस्याः। अनयोः। आसां। अस्यां। अनयोः। आसु। एतदः। एषा। एते। एताः। हे एषे। हे एते। हे एताः इत्यादि। एकस्य-एका। एके। एकाः। इत्यादि। द्विशब्दस्य-द्वे। द्वे। द्वाभ्याम्। द्वाभ्यां। द्वाभ्यां। द्वयोः। द्वयोः। किमः कादेशे कृते टाप्। का। के। काः। हे के। इत्यादि। प्रथमादीनां दयाशब्दवत् रूपसिद्धिः। प्रथमा। प्रथमे। प्रथमाः। इत्यादि। तीयस्यांतस्य किन्तु "तीयो ङितीति विकल्पेन सर्वादित्वाद् तत्रैव भेदोऽन्यत्र दयाशब्दवत्। द्वितीयस्यै, द्वितीयायै। द्वितीयस्याः, द्वितीयायाः। द्वितीयस्याः, द्वितीयायाः। द्वितीयस्यां, द्वितीयायां। एवं तृतीय शब्दः। इकारांतः स्त्रीलिंगो मतिशब्दः। ततः स्वादयः। सुटि मुनिशब्दवत्। मतिः। मती। मतयः। हे मते। हे मती। हे मतयः। मतिं। मती। मतीः। अस्त्रियामिति प्रतिषेधान्नाभावः। मत्या। मतिभ्यां। मतिभिः। "य्वौ स्त्र्याख्यौ मुः" वेति च प्रस्तुत्य—

२२६। ङिति प्रश्च।१।२। १०८। य्वोर्यः प्रः स्त्र्याख्यः इयुवोश्च स्थानिनौ यौ य्वौ स्त्र्याख्यौ तेषां मुसंज्ञा वा भवति ङिति परतः। "सोङीति" च प्रस्तुत्य—

२२७। आटम्बोः। ५।२।११६। म्यंतात्परस्य ङितः सुपो अडागमो भवति स च टिदादिः। आटश्चेति एच्यैप् यणादेशश्च। मत्यै। मुसंज्ञाविरहपक्षे सुसंज्ञायां मुनिशब्दवत्। मतये। मतिभ्यां। मतिभ्यः। मत्याः, मतेः। मतिभ्यां। मतिभ्यः। मत्याः, मतेः। मत्योः। मतीनां। मत्यां, मतौ। मत्योः। मतिषु। एवं शुचिरुचिकृतियुवतिहानिप्रभृतयः। विंशत्यादयः संख्यामेवोपाददते संख्येयेषु च स्वलिंगं स्त्रीत्वमेकत्वे चोपादायैव वर्तंते तस्मादेकवचनांता एव। विंशतिः। विंशतिं। विंशत्या। विंशत्यै, विंशतये। विंशत्याः, विंशतेः। विंशत्यां, विंशतौ। विंशतेर्द्वित्वबहुत्वाभिविवक्षायां द्विवचनबहुवचनेऽपि भवतः। एवं षष्टिसप्तत्यशीतिनवतयोऽपि शब्दाः। त्रिशब्दस्य विशेषः।

२२८। त्रिचतुरः स्त्रियां तिसृचतसृ।५।१।१७। त्रिचतुरित्येतयोः स्त्रीलिंगेऽर्थे वर्तमानयोः यथासंख्यं तिसृ चतसृ इत्येतावादेशौ भवतः सुपि परतः।

२२९। रोऽचि।५।१।१७२। तिसृ चतसृ इत्येतयोः ऋकारस्य रेफादेशो भवति अजादौ सुपि परतः। तिस्रः तिष्ठंति। तिस्रः पश्य। तिसृभिः। तिसृभ्यः। तिसृभ्यः। "नाम्यातिसृचतसृ" इति प्रतिषेधान्नीत्वं न भवति। तिसृणां। तिसृषु॥ ईकारांतः स्त्रीलिंगो लक्ष्मीशब्दः लक्षम् दर्शनांकनयोः। ततो "लक्षेर्मुट् चेति ईकारस्त्यो मुट् चागमः। ततः स्वादयः। नायं ईकारो ङीत्य इति मुखं न भवति। लक्ष्मीः। लक्ष्म्यौ। लक्ष्म्यः।

२३०। य्वौ स्त्र्याख्यौ मुः। १। २। १०४। यौ ईकारो-कारौ स्त्रियमाचक्षाणौ तौ मुसंज्ञौ भवतः। इति मुसंज्ञायां—"कौ" प्रोऽम्बार्थयोश्च; इति प्रस्तुत्य—

२३१। [1]म्वोः। ५। २। ११०। म्वंतस्य प्रादेशो भवति कौ परतः। प्रादिति केः खम्। हे लक्ष्मि। हे लक्ष्म्यौ। हे लक्ष्म्यः। लक्ष्मीं। लक्ष्म्यौ। लक्ष्मीः। लक्ष्म्या। लक्ष्मीभ्यां। लक्ष्मीभिः। किन्तु मुसंज्ञायां-लक्ष्म्यै। लक्ष्मीभ्यां। लक्ष्मीभ्यः। लक्ष्म्याः। लक्ष्मीभ्यां। लक्ष्मीभ्यः। लक्ष्म्याः। लक्ष्म्योः। प्रेल्म्वादिना नुट्। लक्ष्मीणां। लक्ष्म्यां। लक्ष्म्योः। लक्ष्मीषु। एवं तंत्री-प्रभृतयः। उभयट् टकारः स्त्रियां ङ्यर्थः। उभय इति स्थिते-इञ्टिड्ढाणञ्ठण्ठ इति टित्त्वादतो ङीः। ङकारो हल्ङ्याब्भ्यः इति विशेषणार्थः। टिखं। ऐरिति चानुवर्तमाने-

२३२। [2]ङ्याम्। ४। ४। १५१। मोरवर्णांतस्य इवर्णांतस्य भस्य खं भवति ङीत्ये परतः। ततः स्वादयः। उभयी। उभय्यौ। उभय्यः। हे उभयि। हे उभय्यौ। हे उभय्यः। उभयीं। उभय्यौ। उभयीः। उभय्या। उभयीभ्यां। उभयीभिः। उभय्यै। उभयीभ्यां। उभयीभ्यः। उभय्याः। उभयीभ्यां। उभयीभ्यः। उभय्याः। उभय्योः। उभयीनां। उभय्यां। उभय्योः। उभयीषु। कर्तृशब्दस्य भेदः। "ङ्याम्मृदः" स्त्रियामिति चाधिकृत्य—

१। अस्य स्थाने-"प्रोम्बार्थम्वोः। ५। २। १०२। इति।
२। अस्य स्थाने-यस्य ङ्यां च। ४। ४। १३४। इति।

२३३ । [1]क्युगिदृदन्नञ्चोः । ३ । १ । ४ । उगिदंताद् ऋकारांतान्नकारांताद्‌चुत्यांताच्च मृदः स्त्रियां वर्तमानाद् ङीत्यो भवति । यणादेशः । ततः स्वादयः । कर्त्री । कर्त्र्यौ । कर्त्र्यः । हे कर्त्रि । इत्यादि उभयीशब्दवन्नेयं । एवं मातृप्रभृतयः । भवतु इति स्थिते उकार उगित्कार्यार्थः । क्युगिदृन्नञ्चोरिति ङीः । ततः स्वादयः । भवती । भवत्यौ । भवत्यः इत्यादि उभयीशब्दवत् । या प्रापणे । या इति स्थिते घुसंज्ञायां "त्यः" "परः" घोः" लडिति च प्रस्तुत्य–

२३४ । [2]सति । २।२।११६ । सति भवति वर्तमाने काले घोः परो लडित्ययं त्यो भवति । टकारः "टिद्‌टेरे:"इति विशेषणार्थः । अकार उच्चारणार्थः । "लटोऽवानितौ शतृशानाविति वर्तमाने–

२३५ । [3]सल्लटः । २।२। ११७ । सति काले यो लट् तस्य स्थाने शतृशानावित्येतावादेशौ भवतः । शकारो मिङ्शिद्ध इति विशेषणार्थः । ऋकार उगिद्‌कार्यार्थः । गे यगित्यनुवर्तमाने–

२३६ । कर्तरि शप् । २ । १ । ८१ । कर्तृवाचिनि गे परतः शबित्ययं त्यो भवति । विकरणत्वान्मध्ये भवति । शकारः "एचोऽश्या"इति विशेषणार्थः । पकारो गोऽपिदिति विशेषणार्थः ।

---

१ । अस्य स्थाने उगिदृन्नान्ङीः । ३ । १ । ६ इति

२ । अस्य स्थाने "संप्रति । २ । २ । १०१ । इति सूत्रं ।

३ । अस्य स्थाने "तस्य शतृशानावप्रैकार्थे । २।२। १०२ ॥ इति ।

२३७। ह्वादेरुजुप्[1]। ह्वादिभ्योऽदादिभ्यश्च परस्य कर्तरि यथासंख्यं उच् उप् इत्येतावादेशौ भवतः। इति शप उप्। यात् इत्यस्मादुगित्वान्ङीः। "इद्धोनुर्म्" "विदेः शतुर्वसुः" "वा नपः" इति च वर्तमाने—

२३८। शीम्वोरात्। ५।१।६२। गोरवर्णीतात्परस्य शतुर्वा नुमागमो भवति शीम्वो परतः। मकार आदेशविध्यर्थः। उकार उच्चारणार्थः। नुगकोऽमित्यनुवर्तमाने नश्चापदांते झलीत्यनुस्वारः। "यय्यं परस्वमिति परस्वं। ततः स्वादयः। यांती। यांत्यौ। यांत्यः। हे यांति। हे यांत्यौ। हे यांत्यः। इत्यादि। नुमभावपक्षे-याती। यात्यौ। यात्यः। हे याति। हे यात्यौ। हे यात्यः। इत्यादि। भू सत्तायां। धुसंज्ञायां पूर्ववल्लटः शत्रादेशे शपि च शिति गागयोरिति एवादेशः। पररूपं। भवदित्येतस्मादुगित्वान्ङीः।

२३९। शप्श्यात्[2]। **५।१।६३।** शबंताद् गोः श्यांताच्च परस्य शतुर्नित्यं नुम् भवति शीम्वोः परतः। पूर्ववदितो निवृत्तिः। ततः स्वादयः। भवंती। भवंत्यौ। भवंत्यः। हे भवंति। इत्यादि। दिवु क्रीडाजयेच्छापणद्युतिगतिषु। दिव् उकारो वोदित इति विशेषणार्थः। धुत्वे लटः शत्रादेशे च सति—

१। अस्य स्थाने "शपोऽदादिभ्यः। १।४।१४३। "जुहोत्यादिभ्यः। १।४।१४५। इति सूत्रं।

२। अस्य स्थाने "श्यशपः।५।१।५९। इति सूत्रं।

२४०। दिवादेः श्यः । २ । १ । ८३ । दिवादिभ्यो धुभ्यः कर्तृवाचिनि गे परतः श्य इत्ययं त्यो मध्ये भवति । दीर्वोरिगुङः इति च वर्तमाने—

२४१।हल्यभकुर्छुरः । ५।३। ११४ । हलि परौ यौ रेफव कारौ तदंतस्य भ कुर् छुर् वर्जितस्य घोरिगुङो दीर्भवति । इति दीत्वे दीव्यदित्युगित्त्वात् ङीः । शप्श्यादिति नुम् । ततः स्वादयः । दीव्यंती । दीव्यंत्यौ । दीव्यंत्यः । हे दीव्यंति । इत्यादि नेयं। स्त्रीशब्दस्य स्तिणातेरिः । स्त्यायतेर्वा ड्रिप् । ङीश्चेति उणादिषु निष्पन्नस्य विशेषः । ततः स्वादयः । स्त्रीतिनिर्दे-शात्सोःखं । स्त्री । ''हल्श्नुधुभ्रुवोऽचीयुण्योः''इति वर्तमाने—

२४२ । स्त्रियाः । ४ । ४ । ७७ । स्त्रीशब्दसंबंधिनः इवर्णस्य गोनिमित्तभूतेऽजादौ इयादेशो भवति । स्त्रियौ । स्त्रियः । संबो-धने स्त्रीति मुसंज्ञायां मोः प्रादेशः । प्रादिति केः खं । हे स्त्रि । हे स्त्रियौ । हे स्त्रियः ।

२४३ । वाऽम्शसोः । ४ । ४ । ७८ । स्त्रीशब्दस्येवर्णस्य अम्शसोरियादेशो वा भवति । स्त्रीं । स्त्रियं। स्त्रियौ । स्त्रियः । स्त्रीः । स्त्रिया । स्त्रीभ्यां । स्त्रीभिः । स्त्रियै । स्त्रीभ्यां । स्त्रीभ्यः । स्त्रियाः । स्त्रीभ्यां । स्त्रीभ्यः । स्त्रियाः । स्त्रियोः । आमीयुवोः वेति च नियमे विकल्पे च प्राप्ते सति स्त्रीति मुसंज्ञायां प्रेल्म्वा-दिना नुट् । स्त्रीणां । स्त्रियां । स्त्रियोः । स्त्रीषु । अनड्वाह् ।

अनडुह् इति गौरादिषु उभयथा पाठात् ङीत्यः । ततः स्वादयः । अनड्वाही । अनड्वाह्यौ । अनड्वाह्यः । हे अनड्वाहि । इत्यादि। तथा-अनडुही । अनडुह्यौ । अनडुह्यः । हे अनडुहि । इत्यादि नेयं । श्रीशब्दस्य भेदः । श्रिञ् सेवायां । श्रिञ् ञकारो दविध्यर्थः। धुसंज्ञायां-क्वचिदिति वर्तमाने—

२४४ । **क्विप्। २। २। ७३।** क्विप् च क्वचिद् दृश्यते । स च अप्रयोगी प्रतीयते । क्वचिदित्येतस्य बहुलार्थत्वात् क्वचिदन्यथैवेति वचनात् दीत्वम्। श्री इत्यतः स्वादयः । श्रीः । भूतपूर्वगत्या क्व्यंतो धुत्वं न जहाति इति वा धुत्वात् हल्श्नुधुभ्रुवोऽचीयुव्योरिति अजादौ इयादेशः । श्रियौ । श्रियः । किंसंबोधने आमि युवोरिति नियमात् अमुसंज्ञायां-हे श्रीः । हे श्रियौ । हे श्रियः । श्रियं । श्रियौ । श्रियः । श्रिया । श्रीभ्यां । श्रीभिः । ङिद्वचनेषु — आमि युवोः, वेति च प्रस्तुत्य—

२४५ । **ङिति प्रश्च। १ । २ । १०८।** य्वोर्यः प्रः स्त्र्याख्यौ यौ च य्वावियुवोः स्थानिनौ स्त्र्याख्यौ तेषां तत्संबंधिनि अन्यसंबंधिनि वा ङिति वा मुसंज्ञा भवति । इति मुसंज्ञायां अडागमोऽन्यत्र इयादेशः । श्रियै । श्रिये । श्रीभ्यां । श्रीभ्यः। श्रियाः । श्रियः । श्रीभ्यां । श्रीभ्यः । श्रियाः । श्रियः । श्रियोः । "आमि युवोरिति" वर्तमाने—

२४६ । **वा । १ । २ । १०७।** यावियुवोः स्थानिनौ य्वौ स्त्र्याख्यौ तौ आमि वा मुसंज्ञौ भवतः । श्रीणां । श्रियाम् । श्रियि ।

श्रियोः । श्रीषु । एवं ह्रीप्रभृतयः । उकारान्तः स्त्रीलिंगस्तनु शब्दः । शरीरवाची स्त्रीलिंगः । स्तोकार्थस्तु त्रिलिंगः । तस्य मतिशब्दवत् प्रक्रिया । तनुः । तनू । तनवः । हे तनो । हे तनू । हे तनवः । तनुं । तनू । तनूः । तन्वा । तनुभ्यां । तनुभिः । तन्वै । तनवे । तनुभ्यां । तनुभ्यः । तन्वाः । तनोः । तनुभ्यां । तनुभ्यः । तन्वाः । तनोः । तन्वोः । तनूनां । तन्वां । तनौ । तन्वोः । तनुषु । एवं कुकुकाकुस्नायुधेनुप्रभृतयः । ऊकारांतः स्त्रीलिंगो बधूशब्दः । स च लक्ष्मीशब्दवन्नेयः । वधूः । वध्वौ । वध्वः । हे वधु । हे वध्वौ । हे वध्वः । वधूं । वध्वौ । वधूः । वध्वा । वधूभ्यां । वधूभिः । वध्वै । वधूभ्यां । वधूभ्यः । वध्वाः । वधूभ्यां । वधूभ्यः । वध्वाः । वध्वोः । वधूनां । वध्वां । वध्वोः । वधूषु । एवं चमूजमूयवागूप्रभृतयः । भ्रूशब्दस्य तु भेदः । भ्रमु चलने । उकारो "वोदितः" इति विशेषणार्थः । भ्रमेश्च डूरिति डूः । डित्वाट्टेः खं । ततः स्वादयः । भ्रू इति स्थिते श्रीशब्दवत्प्रक्रिया । भ्रूः । भ्रुवौ । भ्रुवः । हे भ्रोरित्यादि नेयं । एवं स्वयंभू प्रभृतयः । दृन्भू शब्दस्य तु भेदः । दृन्भवतीति विगृह्य "क्वचित्" इति क्विप् । वाक्सन्निधिः । दृन्हभू इति स्थिते—

२४७ । **दृन्हः** । ४ । ४ । १२६ । क्विबंतवाचो हकारस्य स्फांतस्य खं । ततः स्वादयः । दृन्भूः । अजादौ सुपि—

२४८ । **दृन्करपुनर्वर्षाभ्योभ्वः** । ४ । ४ । ८४ । दृन् कर पुनर् वर्षा इत्येतेभ्य एव परस्य भू इत्येतस्य क्विबंतस्य

३ । अस्य स्थाने दृन्कारपुनर्वर्षाभ्योऽभुवः । ४ । ४ । ७९ इतिसूत्रं ।

सुप्यजादौ यणादेशः । दृन्भ्वौ । दृन्भ्वः । हे दृन्भोरित्यादि । एवं करभूकारभूपुनर्भूवर्षाभूशब्दाः । ऋकारांतः स्त्रीलिंगो मातृशब्दः । स च पितृशब्दवन्नेयः शसि नत्वं वर्जयित्वा । माता । मातरौ । मातरः । हे मातः । हे मातरौ । हे मातरः । इत्यादि । एवं स्वसृदुहितृप्रभृतयः । ॠकारांतः प्रियगॄशब्दः स च पुलिंगवन्नेयः । लृकारांतो लॄकारांतश्चाप्रसिद्धः । एकारांतो अतिहे शब्दः स च पूर्ववन्नेयः । ओकारांतः स्त्रीलिंगो गोशब्दः । सोऽपि पूर्ववत् । ऐकारांतः सुरैशब्दः स च शोभनो राः यस्याः सा सुराः । सुरायौ । सुरायः । इत्यादि रैशब्दवन्नेयः । औकारांतो नौशब्दः । तस्य ग्लौ शब्दवन्नीतिः ।

इति अजंताः स्त्रीलिंगाः ।

अथाजंताः नपुंसकलिंगाः ।

अकारांतो नपुंसकलिंगो दानशब्दः । ततः स्वादयः । नपः स्वमोरित्युपि प्राप्ते–

२४९ । **अतोऽम्** । ५ । १ । २३ । अकारांतस्य नपुंसकलिंगस्य गोर्निमित्तभूतयोः स्वमोरमादेशो भवति । पूर्वोऽमीति अकारस्य पूर्वत्वं । " जसः शी " " आप औतः " इति च प्रस्तुत्य–

२५० । **नपः** । ५ । १ । १६ । नपुंसकलिंगस्य गोर्निमित्तभूतस्य औकारस्य शीभावो भवति । आदेप् । दाने । "नपः" इति वर्तमाने—

२५१। जस्‌शसोः । ५ । १ । १७। नपुंसकलिंगात् परयोः जस्‌शसोः शिरित्ययमादेशो भवति । "तास्थानेऽन्तेऽलः" इति प्राप्ते—शित्सर्वस्य भवति। "इदिद्वोर्नुम्" "उगिदचां धेऽम्वादेः" इति च प्रस्तुत्य—

२५२ । नपोऽचः[1] । ५ । १ । ५३। नपुंसकलिंगस्य गोरजंतस्य नुमागमो भवति धे परतः । उकार उच्चारणार्थः । मकार आदेशविध्यर्थः । "नोङः" इति वर्तमाने—

२५३ । धेऽकौ । ४ । ४ । ६४। किवर्जिते धे परतो नोङो दीर्भवति । दानानि । किसंबोधने पूर्ववदमि सति "केरेङः"—

२५४ । प्रात् । ४ । ३ । ६५ । केरनचः प्रात्परस्य खं भवति । इति मकारस्य खं । एकदेशविकृतस्यानन्यत्वात् अमः पूर्वत्वं । द्विबह्वोः पूर्ववत् । हे दान । हे दाने । हे दानानि । इप्यप्येवं रूपाणि। दानं । दाने । दानानि । शेषः पुंवन्नेयः । दानेन । दानाभ्यां । दानैः । दानाय । दानाभ्यां । दानेभ्यः । दानात् । दानाभ्यां । दानेभ्यः । दानस्य । दानयोः । दानानां। दाने । दानयोः । दानेषु। एवं शुक्लवस्त्रवदननयनादयः । सर्वादयोऽप्येवं नेतव्याः । अन्यादीनां पुनः पंचानां भेदोऽस्ति । अन्य इत्यतः स्वादयः—

२५५ । [2]पंचतोऽनैकतरस्यान्यादेर्दुक् । ५ । १ । २४। नपुंसकलिंगानां अन्यादीनां पंचानां एकतरवर्जितानां दुगागमो

१ । अस्य स्थाने-नपोऽज्झलः । ५ । १ । ५१। इति सूत्रं।
२ । अस्य स्थाने-डतरादेः पंचकस्य दुक् । ५ । १ । २२ । इति ।

भवति स्वमोः परतः । उकार उच्चारणार्थः । ककार आदेशवि-
ध्यर्थः । "झलो जश् झशि" इति "चर्खरि" इति च वर्तमाने—

२५६ । [1]वांऽन्ते । ५ । ४ । १५४ । अंतेऽवसाने विरामे
वर्तमानानां झलां वा चर्भवति । अचच इति द्वित्वं । अन्यत् ।
अन्यत् । अन्यद् । अन्यद्द् । अन्ये । अन्यानि । हे अन्यद्द्
हे अन्यद् । हे अन्यत् । हे अन्यत् । हे अन्ये । हे अन्यानि ।
पुनरपि-अन्यत्त् । अन्यत् । अन्यद् । अन्यद्द् । अन्ये । अ-
न्यानि । पुंलिंगवद् यथा । एवं अन्येतरेतरकतमादयः । अनेक-
तरस्येति किं ? एकतरं । एकतरे । एकतराणि । इत्यादि ।
त्यदादीनां तु स्वमोर्विशेषोऽस्ति । त्यद् इत्यतः स्वादयः । त्य-
दाद्यत्वात् प्रागेव नित्यत्वात्—

२५७ । नपः स्वमोः । ५ । १ । २० । नपुंसकलिंगात्परयोः
स्वमोरुब्भवति । त्यखे त्याश्रयमिति पुनरत्वे प्राप्ते—

२५८ । नोमता गोः । १ । १ । ७१ । उमता वचनेन
लुप्तत्यमाश्रित्य यत् कार्यं प्राप्तं गोरधिकारे तन्न भवति । पूर्वव-
च्चर्त्वे द्वित्वं च । त्यत् । त्यत्त् । त्यद् । त्यद्द् । त्ये । त्यानि ।
इत्यादि । तत् । तत् । तद् । तद्द् । ते । तानि । इत्यादि । यत् ।
यत् । यद्द् । यद् । ये । यानि । इत्यादि । अदसः सोरुप् । नोमता
गोरिति प्रतिषेधात् असाविति निपातनं न भवति । रित्वविसर्ज-
नीयौ । अदः । अन्यत्र त्यदाद्यत्वादि कार्यं कृत्वा पश्चादुत्व-
मत्वे । अमू । अमूनि । हे अदः । इत्यादि । इदमः-इदं । इमे ।

---

१ । अस्य स्थाने-"विरामे वा । ५ । ४ । १३१ । इति सूत्रं ।

इमानि। एतदः–एतत्। एतत्। एतद्। एतद्द्। एते। एतानि। इत्यादि। एकशब्दस्य-एकम्। एके। एकानि। द्विशब्दस्य–द्वे। द्वे। इत्यादि। किमः-किं। के। कानि। इत्यादि। आकारांतो नपुंसकलिंगो क्षीरपाशब्दः–

२५९। **प्रो नपि**। १। १। १०। नपुंसकलिंगे वर्तमानस्य मृदः प्रो भवति। इति प्रादेशे कृते दानशब्दवन्नेयः। क्षीरपं। क्षीरपे। क्षीरपाणि। इत्यादि। केचिच्चतुर्थ्येकवचने क्षीरपायेत्यत्र आतो नाप इत्यातः खे क्षीरपे इति भवतीति मन्वते। तदन्ये सन्निपातपरिभाषया न भवतीत्याहुः। एवं सोमपा अम्बुपादयः। इकारांतो नपुंसकलिंगो वारिशब्दः। ततः स्वादयः। नपः स्वमोरित्युप्। वारि। औकारयोः। "आप औतः" इति वर्तमाने "नपः", इति शीः। " इदिद्वोर्नुम् " इत्यधिकृत्य–

२६०। **सुपीकोऽचि**। ५। १। ५६। गोरिगंतस्य नपुंसकलिंगस्य नुमागमो भवत्यजादौ सुपि परतः। पूर्ववदितो निवृत्तिर्णत्वं। वारिणी। जस्शसोः शिर्नुम्। दीत्वं। णत्वं च। वारीणि। किसंबोधने "नपः स्वमोः" "जरसो वा" इति च प्रस्तुत्य-

२६१। **इकश्स्वम्**। ५। १। २२। गोरिगंतात् नपुंसकलिंगात्परयोः स्वमोर्वा श्स्वं भवति। पक्षे—उप्च। शित्करणं अमः सर्वादेशार्थं। यदा श्स्वं तदा प्रस्यैप् कावित्येप् भवति, नोपि। नोमता गोरिति निषेधात्–हेवारे। हे वारि। हे वारिणी। हे वारीणि। पुनरपि-वारि। वारिणी। वारीणि। वारिणा। वारिभ्यां। वारिभिः। वारिणे। वारिभ्यां। वारिभ्यः। वारिणः।

वारिभ्यां । वारिभ्यः । वारिणः । वारिणोः । आमि-प्रेल्भ्वाप् चतुरो नुडिति नुड् । नामि-सुम्मिङंतं पदमित्यधिकृत्य-

२६२ । **स्वादावघे** । १ । २ । ११८ । घवर्जिते स्वादौ पूर्वं पदसंज्ञं भवति । पदस्येत्यधिकृत्य नो मृदन्ते खमिति नखं । ततो नाम्यतिसृचतसृ इति दीत्वेन खस्यासिद्धत्वाद् -

२६३ । **नोङः** । ४।४ ।५। नकारांतस्य गोरुङो दीर्भवति नामि परतः । इत्युङो दीत्वं । वारीणां । वारिणि । वारिणोः । वारिषु । एवं सक्थिअस्थिदध्यक्षिशब्दानां रूपसिद्धिः । टादा-वजादौ तु विशेषः । भादाविति वर्तमाने—

२६४ । [1]**सक्थ्यस्थिदध्यक्ष्णोऽनङ्** । ५ । १ । ५८ ।सक्थि अस्थि दधि अक्षि इत्येतेषामिगंतानां नपुंसकलिंगानां अनङा-देशो भवति भादावजादौ परतः । ङकारोंत्याविध्यर्थः ।नकारेऽ-कार उच्चारणार्थः । भस्येत्यधिकृत्य—

२६५ । **अनो खमम्वस्फात्** । ४ । ४ । १३४ । भसंज्ञ-कावयवस्य अन्नित्येतस्याकारस्य खं भवति न चेत् सोऽन्शब्दो मकारवकारांतात् स्फात् परो भवति । सक्थ्ना । सक्थिभ्यां । सक्थिभिः । सक्थ्ने । सक्थिभ्यां । सक्थिभ्यः । सक्थ्नः । सक्थि-भ्यां । सक्थिभ्यः । सक्थ्नः । सक्थ्नोः । सक्थ्नाम् । भस्य अनोखमम्वस्फादित्याधिकृत्य—

२६६ । **वा ङिश्योः** । ४ । ४ । १३६ । भसंज्ञावयवस्यान्नि-

१ । अस्य स्थाने सक्थ्यस्थिदध्यक्ष्णामनङ् । ५ । १ । ५४ । इति ।

स्येतस्य अकारस्य खं भवति वा ङि डौ शिशब्दे च परतः न चेत्सोऽन् शब्दो म्वस्मात् परो भवति । सक्थ्नि । सक्थनि । सक्थ्नोः । सक्थिषु । एवं अस्थिदध्यक्ष्णामपि रूपं नेयं । त्रिशब्दस्य जस्शसोः शिः । नुम् । णत्वं दीत्वं च । त्रीणि । त्रीणि । पुंवदन्यत्र । शुचिशब्दस्य वेपोर्वारिशब्दवत् । शुचि । शुचिनी । शुचीनि । इत्यादि । टादावजादौ तु ।

२६७ । **भादौ वोक्तपुस्कं पुंवद् । ५ । १ । ५७ ।** भादौ अजादौ उक्तपुंस्कं नपुंसकलिंगं वा पुंवद् भवति । पुंभावस्य नुम्प्रादेशयोरभावः प्रयोजनं । तत्र मुनिशब्दवादितरत्र वारिशब्दवत् । शुचिना । शुचिभ्यां । शुचिभिः । शुचये, शुचिने । शुचिभ्यां । शुचिभ्यः । शुचेः, शुचिनः । शुचिभ्यां शुचिभ्यः । शुचेः, शुचिनः । शुचिनोः, शुच्योः । शुचीनां । शुचौ, शुचिनि । शुच्योः, शुचिनोः । शुचिषु । एवं सखिपत्यादयः । ईकारांतो ग्रामणीशब्दः । तस्य "प्रो नपि" इति प्रादेशः । ततः स्वादयः । ग्रामणि । ग्रामणिनी । ग्रामणीनि । हे ग्रामणि । हे ग्रामणिनी । हे ग्रामणीनि । इत्यादि शुचिशब्दवत् । एवं नी उन्नीत्यादयः । उकारांतास्त्रिपुशब्दः । ततः स्वादयः । त्रपु । त्रपुणी । त्रपूणि । हे त्रपो । हे त्रपु । इत्यादि वारिशब्दवत् । अतुमृदुलघुप्रभृतीनां शुचिशब्दवत् नीतिः । ऊकारांतः खलपूशब्दः । तस्यापि प्रादेशे खलपु । खलपुनी । खलपूनि । हे खलपो । हे खलपु । हे खलपू इत्यादि ग्रामणीशब्दवत् । एवं लूलूप्रभृतयः । ऋकारांतः कर्तृशब्दः । कर्तृ । कर्तृणी । कर्तॄणि ।

हे कर्तः । हे कर्तृ इत्यादि नेयं । एवं मातृप्रभृतयः ग्रामणी शब्दवत् । ऋकारांतः प्रियगृशब्दः तस्यापि प्रादेशः प्रियगृ । प्रियगृणी । प्रियगृणि । हे प्रियगृ । हे प्रियग्र इत्यादि कर्तृशब्दवत् । लृकारांतलॄकारांतावप्रोसद्धौ । एकारांतो अतिहेशब्दः । तस्यापि प्रादेशे– अतिहि । अतिहिनी । अतिहीनि । हे अतिहे । हे अतिहि । इत्यादि शुचिशब्दवत् । ओकारान्त उपगोशब्दः। तस्यापि प्रादेशः। उपगु । उपगुनी। उपगूनि । हे उपगो, हे उपगु । इत्यादि जतुशब्दवत् । ऐकारांतोऽतिरैशब्दः । तस्यापि प्रादेशे अतिरि । अतिरिणी । अतिरीणि । पुनरपि अतिरि । अतिरिणी । अतिरीणि । अतिरिणा, अतिराया । एकदेशविकृतस्यानन्यत्वात् रायःस्भिरिति आत्वं । अतिराभ्यां । अतिराभिः । अतिरिणे, अतिराये । अतिराभ्यां । अतिराभ्यः । अतिरिणः, अतिरायः । अतिराभ्यां । अतिराभ्य । अतिरिणः, अतिरायः । अतिरिणोः, अतिरायोः । अतिरिणां । अतिरिणि, अतिरायां । अतिरिणोः, अतिरायोः । अतिरासु । इत्यादि शुचिशब्दवत् । औकारांतोऽतिनौशब्दः । तस्यापि प्रादेशे-- अतिनु । अतिनुनी । अतिनूनि । इत्यादि मृदुशब्दवत् ।

इत्यजंताः नपुंसकलिंगाः ।

अथ हलंताः पुंल्लिंगाः ।

दुहौञ् रक्षणे । अकारो दविध्यर्थः । औकारोऽनिडर्थः । गां दोग्धीति विगृह्य क्वचित् क्विप् । स च सर्वोऽप्रयोगीत् ।

वाक्सः । सुबुप्च । गोदुह इति स्थिते-ततः स्वादयः । सोः खं । हो ढ इवि ढत्वे प्राप्ते तदपवादः ।

२६८ । **दादेर्घोघः** । ५ । ३ । ६७ । दकारादेर्घोरवयवस्य हकारस्य घकारादेशो भवति पदान्ते झलि परतः ।

२६९ । **एकाचो बशो भष् झषः स्ध्वोः** ।५। ३ । ७३ । झषन्तस्यैकाच्शब्दरूपस्य योऽवयवो बश् तस्य भष् भवति सकारे ध्वशब्दे पदान्ते च । इति दकारस्य भष्टं । जश्त्वं चर्त्वं। पक्षे द्वित्वं च । गोधुग् । गोधुक् । गोधुग्ग् । गोधुक्क् । संहितैवा· न्यत्र । गोदुहौ । गोदुहः । हे गोधुक् । हे गोधुक्क् । हे गोधुग् हे गोधुग्ग् । हे गोदुहौ । हे गोदुहः । गोदुहम् । गोदुहौ । गोदुहः । गोदुहा । गोधुग्भ्याम् । गोधुग्भ्यः । गोदुहे । गोधुग्भ्याम् । गोधुग्भ्यः । गोदुहः । गोधुग्भ्याम् । गोधुग्भ्यः । गोदुहः । गोदुहोः । गोदुहाम् । गादुहि । गोदुहोः । गोधुक्षु । एवं दण्डदुह् रत्नदुह् कोशदुह् इत्येवमादयः । श्वलिह्शब्दस्य भेदः । लिहॊञ् आस्वादने । पूर्ववदौकारञकारयोः निवृत्तिः । श्वन्शब्दादम् श्वानं लेढीति विगृह्य पूर्ववद् क्विप् वाक्सः । सुबुप् च । नो मृदन्ते खमिवि नखं । श्वलिह् इति स्वादयः ।

२७० । **हो ढः** । ५ । ३ ।६६। हकारस्य ढकारादेशो भवति पदान्ते झलि च । जश्त्वं चर्त्वे द्वित्वं च । श्वलिट् । श्वलिट्ट् । श्वलिड् । श्वलिड्ड् । श्वलिहौ । श्वलिहः । इत्यादि । एवं मधुलिह् अभ्रंलिहादयः । मित्रद्रुह्शब्दस्य भेदः । द्रुहञ् हिंसा-

याम् । "ऊकार ऊदिद्रूञः" इति विशेषणार्थः । मित्रशब्दादम् । मित्रं द्रुह्यतीति विगृह्य क्विप् वाक्सः । सुबुप् स्वादयः ।

२७१। **वा द्रुह्मुह्ष्णुह्ष्णिहां** । ५ । ३ । ६६ । द्रुह् मुह्ष्णुह्ष्णिह् इत्येतेषां हकारस्य घकारादेशो वा भवति झलि पदान्ते च । पक्षे ढत्वं । एकाचो बाशित्यादिना भष्भावः । मित्रस्निक्क् । मित्रध्रुक् । मित्रध्रुग् । मित्रध्रुट् । मित्रध्रुट् । मित्रध्रुड् । मित्रध्रुड् । एवं झलि पदान्ते च रूपद्वयं । अजादौ तु संहितैव । एवं मुह्उष्णिह्उष्णुह् इत्येते शब्दाः । अनडुह्शब्दस्य भेदः । ततः स्वादयः । "एधे" इत्याधिकृत्य—

२७२। **चतुरनडुहोर्वाः** ।५ । १ । ७९ । चतुरनडुहोस्तदन्तस्य च गोरुकारस्य वा इत्ययमादेशो भवति घे परतः ।

२७३। **सावनडुहः** । ५ । १ । ६४ । अनडुहो नुमागमो भवति सौ परतः । सोः खं । हकारस्य स्फांतस्य खं । घेऽकाविति दीत्वं । अनड्वान् । अनड्वाहौ । अनड्वाहः । संबोधने—

२७४। **वः कौ** । ५ । १ । ८० । चतुरनडुहोस्तदन्तस्य च गोरुकारस्य व इत्ययमादेशो भवति कौ परतः । हे अनड्वन् । हे अनड्वाहौ । हे अनड्वाहः । अनड्वाहम् । अनड्वाहौ अनडुहः । अनडुहा । हलादौ—

२७५ । **वसुस्रंसुध्वंस्वनडुहां दः** । ५।३ । १०७। वसु स्रंसु ध्वंसु अनडुह् इत्येतेषां सकारस्य हकारस्य च पदान्तस्य

दकारादेशो भवति । अनडुद्‌भ्याम् । अनडुद्भिरित्यादि नेयं । यकारान्तोऽभिधेयलिंगः समय्शब्दः । अयौ गतौ । औकारो दार्थः । सम्शब्दात्सुः । झोरित्युप् । समयते इति विगृह्य "मन्वन्क्वनिप्‌विचःक्वाचित्" इति विच् । स च अप्रयोगी । चकार एवर्थः । इकार उच्चारणार्थः । वकारोऽसमासिद्ध्यर्थः । प्रादिना सह सः । ततः स्वादयः। समय् । समयौ। समयः। हे समय्। हे समयौ । हे समयः । समयम् । समयौ । समयः । समया । व्योः खं वल्काविति यखं । समभ्यां । समाभिः । इत्यादि नेयं । एवं सुवयादयोऽपि । वकारान्त आश्रयालिंगः सुदिव्शब्दः । शोभना द्यौरस्येति विगृह्य वसः सुदिव् । ततः स्वादयः ।

२७६ । **द्यौः** । ५ । १ । ६५ । दिवित्यस्याव्युत्पन्नस्य मृदः सौ औकारो निपात्यते सोश्चारित्वाविसर्जनीयौ । यणादेशः । सुद्यौः । सुदिवौ । सुदिवः । हे सुद्यौः । हे सुदिवौ । हेसुदिवः । सुदिवम् । सुदिवौ । सुदिवः । सुदिवा । हलादौ--

२७७ । **दिवो हल्युत्** । ४ । ३ ।१२४। दिवः पदस्योदादेशो भवति हलादौ परतः । तकारो विकारानिवृत्यर्थः । सुद्युभ्याम् । सुद्युभिः । इत्यादि नेयं । रेफान्तश्चतुर्शब्दो वाच्यलिंगो बहुवचनान्तः । जसि "चतुरनडुहोर्वाः" इत्युकारस्य वादेशः । चत्वारः । हे चत्वारः । चतुरः । चतुर्भिः । चतुर्भ्यः । चतुर्भ्यः । आमि-प्रेल्म्वाम् चतुरो नुडिति नुड् णत्वं च । चतुर्णाम् । सुपि रेश्च सुपीति नियमात् सत्वविसर्जनीयौ न भवतः । चतुर्षु ।

लकारान्तोऽव्युत्पन्नपक्षेऽप्रासिद्धः । व्युत्पन्नपक्षे तु समयशब्द-वत् प्रज्वलूशब्दः । ज्वल दीप्तौ । अकार उच्चारणार्थः । प्रज्व-लतीति विगृह्य क्विप् । ततः स्वादयः । प्रज्वल् । प्रज्वलौ । प्रज्वलः । इत्यादि । एवं प्रचलादयः । ञकारान्तः सर्वज्ञ्शब्दः । सर्वं जानातीति सर्वज्ञः । स इवाचरतीति कर्तुः क्विरिति क्विः । सर्वज्ञतीति विगृह्य पुनः क्विप् । "अतः" इत्यखं । पूर्ववदन्यत् । सर्वक् । सर्वग् । सर्वञ्ज्ञौ । सर्वज्ञः । इत्यादि । एवमन्येप्यभ्यूह्याः । मकारान्तः प्रशाम्शब्दः । शमु दमु उपशमने । उकारो "वोदितः" इति विशेषणार्थः । धुत्वे प्रादिना सह सः । प्रशाम्यतीति विगृह्य क्विप् ।

२७८ । ङस्य [1]झलक्व्योः क्ङिति । ४ । ४ । १२ । ङसंज्ञा-न्तस्य गोरुङो झलादौ किति ङिति क्वौ च परतः दीर्भवति । ततोऽस्य झित्वात् सुपो झेरित्युक्तवचनसामर्थ्यात् सुप् ।

२७९ । मो नः । ५ । ३ । १११ । पदान्तस्य धोर्मो नो भवति पदान्ते झलि च परतः । इति नत्वस्यासिद्धत्वात् खं न भवति । प्रशान् । प्रदाम्शब्दस्य-प्रदान् । प्रदामौ । प्रदामः । हे प्रदान् । हे प्रदामौ । हे प्रदामः । प्रदामम् । प्रदामौ । प्रदामः । प्रदामा । प्रदान्भ्याम् । प्रदान्भिः । इत्यादि । तमु कांक्षायामि-त्यस्य प्रतानित्यादि । ङकारान्तः सुङ्शब्दः । ङुओ शब्दे । ओकारो दार्थः । सुङवते इति विगृह्य विचि ङवमाचष्टे "मृदो

1 । अत्र महावृत्तौ "क्विझलोः" इति पाठः

ध्वर्थे णिज्वद् बहुलमिति णिच् । चकारः णिङ्णिचोः सामान्य-ग्रहणार्थः । णकार ऐवर्थः । "णाविष्ठवन्मृदः" इति इष्ठवद् भावेन टेरिति टेः खं । सुङ्यतीति विगृह्य-क्विप् । खेरिति णिखं । स्वादयः । सुङ् । सुङौ । सुङः । इत्यादि । सुपि ङ्णोः कुक्टुक् छरीति कुक् षत्वं । सुंक्षु । णकारान्तः सुपण्शब्दः । सुपण् । सुपणौ । सुपणः । इत्यादि । सुपण्ट्सु । नकारान्तो राजन् शब्दः । ततः स्वादयः । नोऽङः इति प्रस्तुत्य घेऽकौ । हल्ङ्यादिना सुखं नो मृदन्ते खमिति नखं । राजा । राजानौ । राजानः । किसम्बोधने "न काविति प्रतिषेधान्नखं न भवति । हे राजन् । हे राजानौ । हे राजानः । राजानम् । राजानौ । शसादौ अजादौ अनो खमम्वम्फादित्यकारस्य खं । चर्त्वे नकारस्य ञकारादेशः । राज्ञः । राज्ञा । हलादौ नो मृदन्ते खमिति न खं ।

२८० [१]न खं सुब्विधिकृत्तुकि । ५ । ३ । ३६ । सुपो विधिः सुपि च विधिः सुब्विधिः । तस्मिन् कृल्लक्षणे च तुकि कर्तव्ये न खमासिद्धं भवति । इति नखस्य सिद्धत्वात् दीर्न भवति । राजभ्याम् । राजभिः । राज्ञे । राजभ्यां । राजाभ्यः । राज्ञः । राजभ्याम् । राजभ्यः । राज्ञः । राज्ञोः । राज्ञाम् । वा ङिश्योरिति विकल्पेनाकारस्य खं । राज्ञि । राजनि । राज्ञोः । राजसु । एवं मूर्द्धाक्षतक्षवृषादयः । दीवन् शब्दस्य सुटि नास्ति विशेषः । असादावजादौ-दीर्वोरिगुङः" इति दीत्वं । दीऽनः । दीऽनेत्यादि

---

१ । अस्य स्थाने-नखं सुब्विधि तुकि कृति । ५ । ३ । २८ । इति

नेयं । एवं प्रतिदीवन्शब्दः । पूषन्शब्दस्य तु भेदः । ततः स्वादयः ।

२८१ । **इन्हन्पूषार्यम्णां शौ**[1] । ४ । ४ । ६ । इन् हन् पूषन् अर्यमन् इत्येतेषामुङः शावेव दीर्भवति । नान्यत्र । इति नियमादप्राप्ते पुनः—

२८२ । **सौ** । ४ । ४ । १० । किवर्जिते सौ एव इन् हन् पूषन् अर्यमन् एतेषामुङो दीर्भवति । पूषा । पूषणौ । पूषणः । हे पूषण् । हे पूषणौ । हे पूषणः । पूषणम् । पूषणौ । शसादौ राजन्वज्ज्ञेयः । पूष्णः । पूष्णा । पूषभ्यामित्यादि । एवं अर्यमन्शब्दः । ब्रह्महन्शब्दस्य भेदः । हनौ गतिहिंसनयोः । औकारोऽनिर्डिर्थः । ब्रह्माणं हतवान् इति विगृह्य-भूते "कर्मणि हनः" इत्याधिकृत्य—

२८३ । **ब्रह्मभ्रूणवृत्रे**[2] **क्विप् घ्नः** । २ । २ । ६८ । ब्रह्म भ्रूण वृत्रेषु कर्मसु वाक्षु भूते काले हन्तेर्धोः क्विप् त्यो भवति । स चाप्रयोगी । ङस्य झल्क्वयोरिति दीत्वं प्राप्तं । इन्हन्निति नियमान्न भवति । वाक्सः । सुबिति मृत्वं च स्वादयः । साविति दीर्नखं च । ब्रह्महा । षो णो नः । प्राक्पदस्थादिति च प्रस्तुत्य—

२८४ । **एकाच्च्यौ णः** । ५ । ४ । ११४ । षकाररेफात् प्राक्पदस्थात् परस्य एकाच्च्यौ मृदन्तनुम्सुब्नकारस्य नित्यं णत्वं

---

१ । अत्र "शौ । ४ । ४ । १० इति भिन्नं सूत्रं । २ । अत्र बहुवचनं महावृत्तौ ।

भवति । ब्रह्महणौ । ब्रह्महणः । हे ब्रह्महन् । हे ब्रह्महणौ । हे ब्रह्महणः । ब्रह्महणम् । ब्रह्महणौ । शसादावजादावनोऽखे कृते "चजोः कुघिण्ये तेऽनिटः" इत्याधिकृत्य–

२८५ । हो घ्नो[1] ञ्णिन्नि । ५ । २ । ६७ । हन्तेर्हकारस्य ञिति णिति त्ये नकारेण च योगे सति कुत्वं भवति ।

२८६ । घि घ्नः[2] । ५ । ४ । १३५ । निमित्तनैमित्तकयोर्मध्ये घकारादेशे सति हन्तेर्नकारस्य णत्वं न भवति । ब्रह्मघ्नः । ब्रह्मघ्ना । ब्रह्महभ्यामित्यत्र–

२८७ । नखं सुब्विधिकृत्तुकि । ५ । ३ । ३६ । सुपः स्थाने सुपि च विधौ कृदाश्रये तुकि कर्तव्ये न खं असिद्धं भवति । इति क्विबाश्रयस्तुक् न भवति तदा ब्रह्महाभिरित्यादि । एवं भ्रूणहन् आदयः । सुधवन्सुपर्वन्शब्दयोर्म्वस्फादिति प्रतिषेधात् अनो खं न भवति । शसादावचि पूर्ववदन्यत् । सुधर्मणः । सुपर्वणः । इत्यादि नेयं । एवं सुचर्मन्यज्वन् प्रभृतयः । श्वन्शब्दस्य सुट्यविशेषः । श्वा । श्वानौ । श्वानः । हे श्वन् । हे श्वानौ । हे श्वानः । श्वानम् । श्वानौ । शसादावचि-वसार्वस्योशिति प्रस्तुत्य–

२८८ । श्वयुवन्मघोनोऽह्रति । ४ । ४ । १३३ । श्वन् युवन् मघवन्नित्येषां भसंज्ञकानां अवयवस्य वकारस्य उशादेशो भवति अह्रति गुनिमित्ते त्ये परतः । शकारः सर्वादेशार्थः ।

---

१ । अत्र "हन्तेः" इति पाठो महावृत्तौ । २ । अस्य स्थाने "हन्तेर्घः । ५ । ४ । १०६ । इति सूत्रं ।

२८९ । **भस्य टे खं । ५ । १ । ६६ ।** पथ्यादीनां भसंज्ञकानां टेः खं भवति । पथः । पथा । पथिभ्याम् । पथिभिरित्यादि । एवं मथिन्ऋभुक्षिन्शब्दौ । अन्नंतानामलिंगानां संख्यावाचिनां भेदोऽस्ति । बहुसंख्येयविषयत्वात् बहुवचनमेव ।

२९० । **उविलः । ५ । १ । १६ ।** इल्संज्ञकात् परयोः जसशसोरुप् भवति । नो मृदंते खं । पंच । हे पंच । पंच । पंचभिः । पंचभ्यः । पंचभ्यः । प्रेलम्वादिना नुट् । नोङः इति दीत्वं । नो मृदंते खं च । पंचानाम् । पंचसु । एवं सप्तन् प्रभृतयः । अष्टनित्यतो जसादयः ।

२९१ । **सुप्या[1]ष्टनः । ५ । १ । १५६ ।** अष्टनित्येतस्य तदन्तस्य वा गोर्निमित्तभूते सुपि परतः आ इत्यादेशो भवति ।

२९२ । **अ[2]ष्ट औश् । ५ । १ । १८ ।** अष्टन्शब्दात्कृताकारात् परयोः जस्शसोरौशादेशो भवति । शकारः शित्कार्यार्थः । एच्यैप् । अष्टौ । शसि आतो नामि इति आत्खं । अष्टौ । अष्टाभिः । अष्टाभ्यः । अष्टाभ्यः । अष्टानाम् । अष्टासु । कृताकारस्याष्टः ङसूवचनमिदं लिंगमात्वविकल्पस्य । तेनात्वाभावपक्षे पंचन्शब्दवत् । अष्ट । हे अष्ट । अष्ट । अष्टभिः । अष्टभ्यः । अष्टभ्यः । अष्टानाम् । अष्टसु । झकारान्तो जलोझ्शब्दः । उज्झ उत्सर्गे । अकार उच्चारणार्थः । जलं उज्झतीति विगृह्य क्विबादिः वाक्सः । ततः स्वादयः । स्फान्तस्य खं । जश्त्वचर्त्वादि ।

---

१ । अस्य स्थाने—विभक्त्यामाष्टनः । ५ । १ । १४३ । इति सूत्रं । २ । अस्य स्थाने "अष्टाभ्य औश् । ५ । १ । १८ । इति सूत्रं ।

जलोत् । जलोद् । जलोज्झौ । जलोज्झः । इत्यादि । भकारांतो गर्दभ्शब्दः । स इवाचरतीति गर्दभतीति पुनः क्विप् । ततः स्वं । ततः स्वादयः । एकाच इत्यादिना भष्भावः । मर्धप् । गर्द्धब्। गर्द्धभौ । गर्द्धभः । एवं प्रक्षुभादयः । घकारान्तः परिघ् शब्दः । परिहन्यतेऽनेनेति परिघः । स इवाचरति परिघतीति पुनः क्विप् । परिक् । परिग् । परिघौ । परिघः । इत्यादि । एवं समुद्घादयः । डकारान्तः प्राड्शब्दः । प्राड इवाचरति । प्राडतीति पुनः क्विप्। प्राट्। प्राड् । प्राडौ। प्राडः । इत्यादि । एवं मुडादयः । धकारान्तस्तत्वबुध्शब्दः। बुधौ ज्ञाने । अकारो दार्थः । औकारोऽनिडर्थः । तत्त्वं बुध्यते इति विगृह्य-क्विप् । भष्भावः । पूर्ववदन्यत् । तत्वभुत् । तत्वभुद् । तत्वबुधौ । तत्वबुधः । इत्यादि । एवं अर्थबुध्सुबुधादयः । जकारान्तो भिषज्शब्दः । भिषज रोगापनयने । अकार उच्चारणार्थः । भिषज्यत इति विगृह्य क्विप् । ततः स्वादयः । सुखं ।

२९३ । **चोः कुः । ५ । ३ । ६५ ।** चवर्गस्य झलि च पदान्ते च कवर्गो भवति । वा चर्त्वे।भिषक् । भिषग् । भिषजौ। भिषजः । हे भिषक् । हे भिषग् । हे भिषजौ । हे भिषजः । भिषजम् । भिषजौ । भिषजः । भिषजा । भिषग्भ्याम् । भिषग्भिः। इत्यादि । एवं पुण्यभाजादयः । युज्शब्दस्य भेदः । युजिर्औ योगे । औकारोऽनिडर्थः । अकारो दार्थः । इर्शब्दो वेरित इति विशेषणार्थः । युनक्ति इति विगृह्य--

२९४ । ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुंचः २ । २ । ७१ । ऋत्विग् दधृग् स्रग् दिग् उष्णिक् इत्येते शब्दाः क्व्यंता निपात्यंते । अंचु युजि क्रुंचि इत्येषां क्विश्चेति क्विर्भवति । स चाप्रयोगी । ततः स्वादयः ।

२९५ । युजिरोऽसे । ५ । १ । ५२ । युजिरित्येतस्य नुम्भवत्यसे धे परतः । सुखं । स्फान्तखं ।

२९६ । क्विन्त्यस्य कुः । ५ । ३ ।१००। क्विन्त्यो यस्य तस्य धोः कुत्वं भवति झलि च पदान्ते च । इति नकारस्य ङकारः । युङ् । नश्चापदांते झलीत्यनुस्वारः । यय्यं परस्वमीति ञकारः । युञ्जौ । युञ्जः। हे युङ् । हे युञ्जौ । हे युञ्जः । युञ्जं । युञ्जौ। युजः । युजा। युग्भ्याम् । युग्भिः । इत्यादि । भ्रस्जौज् पाके। अकरौकारावितौ । धाना भृज्जतीति विगृह्य - क्विप् । लिटीग्यणः साचोर्य्याऽऽज्यं" इत्यधिकृत्य—

२९७ व[1]शिव्यधिव्यचिज्याग्रहिव्रश्चिप्रच्छिभ्रस्जां क्ङिति । ४ । ३ । २५ । वश्यादीनां धूनां किति ङिति च त्ये परतः साचोऽर्थ्यपरस्य यणः इगादेशो भवति । पश्चात् वाक्सः । सकारस्योपदेशसामर्थ्यात् खं । जश्त्वं चुत्वं च न भवति । ततः स्वादयः ।

२९८ । स्फादेः स्कोंते च ।५। ३।५८ । झलि च पदान्ते च यः पदावयवः स्फांतः तस्यादेः सकारस्य ककारस्य च खं भवति ।

---

१ । अस्य स्थाने— ग्रहिज्यावयिव्यधिव्यचिव्रश्चिप्रच्छिभ्रस्जां क्ङिति च । ४ । ३ । १२ । इति सूत्रं मुद्रिते सूत्रपाठे ।

२९९ । **भ्रस्चभ्रस्जस्रजमृजयजराजभ्राजच्छशां षः** । ५ । ३ । ६५ । भ्रस्चादीनां छकारशकारयोश्च षकारादेशो भवति झलि च पदान्ते च । तस्य जश्त्वं छकारश्चर्त्वं । धानाभृट् । धानाभृड् । अपदान्तत्वे श्चुत्वे शकारः । जशत्वे जकारः । धानाभृज्जौ । धानाभृज्जः । हे धानाभृट् । हे धानाभृड् । द्विबहोः पूर्ववद् । धानाभृज्जम् । धानाभृज्जौ । धानाभृज्जः । धानाभृज्जा । धानाभृड्भ्याम् । धानाभृड्भिः । इत्यादि । रज्जुं सृजतीति विगृह्य क्विप् । वाक्सः । ततः स्वादयः । षत्वजश्त्वे रज्जुसृट् । रज्जुसृड् । रज्जुसृजौ । रज्जुसृज इत्यादि । एवं कंसपरिमृड्शब्दः । यजाञ् दानदेवपूजासंगतिकरणेषु । अकाराकारौ अनिडर्थौ ॥ देवान् यजत इति विगृह्य क्विप् ।

३०० । **स्वप्वच्च्व्यादेः किति** । ४ । ३ । २४ । स्वप् वच् इत्येतयोश्च श्वि इत्येवमादीनां च किति स्ये परे साचोऽर्थ्यपरस्य यणः इगादेशो भवति । पूर्वेणेप् । तत स्वादयः । षत्वजश्त्वे । देवेट् । देवेड् । देवेजौ। देवेजः । इत्यादि । राजृञ् दीप्तौ । ऋकारो "अशास्वकल्यृदितः" इति पर्युदासार्थः । अकारो दार्थः । संराजत इति क्विब्विधिः ।

३०१ । **सम्राट्** । ५ । ४ । १३ । समित्येतस्य राजतौ क्व्यंते परेऽनुस्वाराभावो निपात्यते । ततः स्वादयः । सुखषत्वजश्त्वानि । सम्राजौ । सम्राजः इति । एवं विभ्राज्शब्दः । परिव्रजतीति विगृह्य-क्विप् स्वादयः ।

३०२ । **परिव्राट्** । ५ । ३ । ६६ । परिव्राट्शब्दस्य क्विबन्तस्य कृतदीर्घत्वस्य झलि च पदान्ते च षत्वं निपात्यते । परिव्राट् । परिव्राड् । परिव्राजौ । परिव्राजः । इत्यादि । बकारांतः फलतुम्ब्शब्दः । लुबि तुबि अर्थने । इकारः इदितो नुमिति विशेषणार्थः । फलं लुम्बयतीति विगृह्य क्विप् । णेरिति णित्वं । ततः स्वादयः । सुखे स्फान्तखे फल्लुन् । फललुम्बौ । फललुम्बः । इत्यादि । एवं प्रतुम्बादयः । गकारांतः सुरंग शब्दः। रगि गतौ इकारो नुमर्थः। सुरंगतीति विगृह्य- क्विबादिविधिः। सुरन् । सुरंगौ । सुरंगः । इत्यादि एवं सुबंगादयः । डकारांतो विक्रिड्शब्दः । कूड़ विहारे । ऋकारो ऋतो कचीत्यादिना विशेषणार्थः । विक्रुडतीति विगृह्य क्विबादिः । विकूट्। विकूड् । विकूडौ । विकूडः । इत्यादि । एवं विहुडादयः । दकारांतस्तत्वविद्शब्दः । विद ज्ञाने । तत्वं वेत्तीति विगृह्य क्विबादिः । तत्वविद् । तत्ववित् । तत्वविदौ । तत्वविदः । एवं विश्वविद्देवविदादयः । द्विपाद्शब्दस्य भेदः । द्वौ पादौ यस्येति विगृह्य सुरैशब्दवद् बसः । द्विपाद इति स्थिते सं । पादस्याहस्त्यादेरिति वर्तमाने—

३०३ । **सुस्थ्यादेः** । ४ । २। १७२। सुशब्दादेः स्थिसंज्ञादेश्च पादांतस्य खं भवति। ततः स्वादयः। द्विपाद् । द्विपात्। द्विपादौ । द्विपादः । हे द्विपाद् । हे द्विपात् । हे द्विपादौ । हे द्विपादः । द्विपादम् । द्विपादौ । शसादावचि "भस्येत्यधिकृत्य—

३०४ । पादः पत् । ४ । ४ । १३१ । पादान्तस्य गोः भसंज्ञावयवो यः पाच्छब्दस्तस्य पदित्ययमादेशो भवति । द्विपदः । द्विपदा । द्विपाद्भ्याम् । द्विपाद्भिः । इत्यादि । एवं सुपादादयः । खकारान्तः सुदुःख्शब्दः । सुदुःखति सुदुःखायते सुदुःखयतीति वा विगृह्य-क्विबादिः । सुखस्फादिसखचर्त्वानि । सुदुक् । सुदुग् । सुदुःखौ । सुदुःखः । इत्यादि । एवं सुमुखादयः । फकारान्तो दामगुम्फ् शब्दः । दाम गुंफतीति विगृह्य क्विबादिः । दामगुब् । दामगुप् । दामगुंफौ । दामगुंफः । इत्यादि । एवं गिरिगुम्फादयः । छकारातः सुवाञ्छ्शब्दः । सुवाञ्छतीति विगृह्य विचि सुखादिके च कृते । सुवान् । सुवाञ्छौ । सुवाञ्छः । इत्यादि । एवं सुप्रच्छादयः । धर्मप्राच्छ्शब्दस्य भेदः । प्रच्छौ ज्ञीप्सायां । औकारोऽनिडर्थः । धर्मं प्रच्छतीति विगृह्य-क्विपि क्वचिच्छब्दस्य बहुलार्थत्वाद्दीर्घे यणिगभावे च कृते धर्मप्राछ् इति स्थिते -

३०५ । छ्वोः शूड्के च । ४४ । १६ । छकारांतस्य गोरवयवयोः छ्वोर्यथासंख्यं शूठावादेशौ भवतो झलादौ क्ङिति क्वौ के च परतः । व्रश्चेत्यादिना षत्वं जश्त्वचर्त्वेत्यादि । धर्मप्राड् । धर्मप्राट् । धर्मप्राशौ । धर्मप्राशः । हे धर्मप्राड् । हे धर्मप्राट् । हे धर्मप्राशौ । हे धर्मप्राशः । धर्मप्राशम् । धर्मप्राशौ । धर्मप्राशः । धर्मप्राशा । धर्मप्राड्भ्यामित्यादि । ठकारान्तः सुपठ् शब्दः । पठ व्यक्तायां वाचि । सुपठतीति विगृह्य क्विबादिः । सुपट् । सुपठौ । सुपठः इत्यादि । एवं सुवठादयः । थकारान्तोऽग्निमथ्शब्दः । मथे विलोडने । एकारोऽनैवर्थः । अग्निं मथ-

तीति विगृह्य क्विबादिः । जश्त्वचर्त्वे । अग्निमत् । अग्निमद् । अग्निमथौ । अग्निमथः । इत्यादि । एवं गोमथादयः । चकारा-तः सुवाच्शब्दः । शोभना वाक् अस्येति बसः । ततः स्वादयः । चोकुरिति कुत्वं । सुवाक्, सुवाग् । सुवाचौ । सुवाचः । इत्यादि । क्रुंच् शब्दस्य भेदः । क्रुंच् कौटिल्याल्पीभावयोः । क्रुंचतीति विगृह्य ऋत्विगादिना क्विः । निपातनैस्सह निर्देशादेव नखा-भावः । ततः स्वादयः । सुखस्फान्तखे च क्वित्यस्य कुरिति कुत्वं । क्रुङ् । क्रुंचौ । क्रुंचः । सम्बोधनेप्येवं । क्रुंचम् । क्रुंचौ । क्रुंचः । क्रुंचा । क्रुङ्भ्याम् । क्रुङ्भिः । इत्यादि । सुपि "ङ्णोः कुक् टक् छरि वा" इति कुकि-क्रुङ्क्षु । मूलव्रश्च् शब्दस्य तु भेदः । ओव्रश्चू छेदने । ओकारो ओदित इति नत्वार्थः । ऊकारो वेडर्थः । मूलं व्रश्चतीति विगृह्य क्विबादिः । वशिव्यर्धीत्यादिना यणिक् । स्फादेः स्कोन्ते चेति सकारस्यासिद्धे कृते श्चुत्वस्य खं । व्रश्चेत्यादिना षत्वम् । जश्त्वं चर्त्वं । मूलवृड् । मूलवृट् । मूलवृश्चौ । मूलवृश्चः । सम्बोधनेप्येवं । मूलवृश्चम् । मूलवृश्चौ । मूलवृश्चः । मूलवृश्चा । मूलवृड्भ्याम् । मूलवृड्भिः । इत्यादि । सुपि—

३०६ । ड्नो[1] धुट् सोऽश्चः । ५ । ४ । १६ । डका-रान्तान्नकारान्ताच्च परस्य सकारस्य धुडागमो वा भवति श्चोव-यवस्य न स्यात् । निवृत्तिरितोः । चर्त्वम् । मूलवृड्त्सु । मूलवृड्सु ।

---

१ । ड्न धुट् सोऽश्चः, इति पाठः शब्दार्णवचंद्रिकायां ।

प्राञ्च्शब्दस्य भेदः । अंचु गतिपूजयोः । उकारो वेऽर्थः । प्रांचतीति विगृह्य-क्विः—

३०७ । हलुङः क्ङित्यनदितः । ४ । ४ । २२ । हलन्तस्य गोरुङो नकारस्य खं भवति ङिति परतः इदितं वर्जयित्वा । ततः स्वादयः ।

३०८ । उगिदचां घेऽभ्वादेः । ५ । १ । ५१ । भूवादिवर्जितानां उगितां धूनामंचतेश्च नष्टनकारस्य नुम् भवति घे परतः । पूर्ववदितो निवृत्तिः । सुखम्फान्तखकुत्वानि । प्राङ् । प्रांचौ । प्रांचः । सम्बोधनेप्येवम् । प्रांचम् । प्रांचौ । शसादावाचि । प्र अच् अस् इति स्थिते । भस्येत्यत्वमिति च प्रस्तुत्य—

३०९ । अचः । ४ । ४ । १३७ । अञ्चतेर्नष्टनकारस्य भसंज्ञकस्य गोरकारस्य खं भवति । दीरित्याधिकृत्य—

३१० । चौ । ४ । ३ । २९९ । अंचतौ नष्टनकाराकारे चौ पूर्वस्य दीर्भवति । प्राचः । प्राचा । हलादौ जश्त्वकुत्वे । प्राग्भ्याम् । प्राग्भिः । प्राचे । प्राग्भ्याम् । प्राग्भ्यः । प्राचः । प्राग्भ्याम् । प्राग्भ्यः । प्राचः । प्राचोः । प्राचाम् । प्राचि । प्राचोः । प्राक्षु । प्रतिपूर्वत्वे-प्रत्यङ् । प्रत्यंचौ । प्रत्यंचः । सम्बोधनेप्येवं । प्रत्यंचम् । प्रत्यंचौ । प्रतीचः । प्रतीचा । प्रत्यग्भ्याम् । प्रत्यग्भिः । इत्यादि । उत्पूर्वत्वे-उदङ् । उदंचौ । उदंचः । सम्बोधनेप्येवं । उदंचम् । उदंचौ । शसादावचि-"अचः इति अखे प्राप्ते—

३११ । ईदुनः । ४ । ४ । १३८ ॥ उद उत्तरस्य नष्ट-

नकारस्यांचतेरीकारादेशो भवति । स च परस्यादेरिति अका-
रस्य भवति । उदीचः । उदीचा । उदग्भ्याम् । उदग्भिः ।
इत्यादि । विष्वगपूर्वत्वे, विष्वगंचतीति विगृह्य क्विपभृतिः ।
विष्वग् अच् इति स्थिते—

३१२ । विष्वग्देवस्नेष्टेरद्र्यंचौ क्वौ । ४।३।२५६ ।
विष्वग् देव इत्येतयोः स्निसंज्ञकस्य च टेः अद्रिरादेशो भवति ।
अंचतौ क्व्यंते चौ परतः । पूर्ववदन्यत् । विष्वद्र्यङ् । विष्व-
द्र्यंचौ । विष्वद्र्यंचः । सम्बोधनेप्येवं । विष्वद्र्यंचम् । विष्व
द्र्यंचौ । विष्वद्रीचः । विष्वद्रीचा । विष्वद्र्यग्भ्याम् । इत्यादि ।
एवं देवद्र्यङ् । सर्वद्र्यङ् । यद्र्यङ् । एकद्र्यङ् । एतद्र्यङ् । इद-
द्र्यङ् । कद्र्यङ् । इत्यादि । अदसि पुनः अदद्रि अच् इति स्थिते-

३१३ । वाऽद्रेः । ५ । ३ । ११७ । अद्र्यन्तस्यादसो
दात्परस्य यथासम्भवं वर्णमात्रस्योत्वं भवति दकारस्य च
मकारः । अत्राचार्यमतभेदः । [1]अदसो द्रौ केचित् उत्वमत्वं
चेच्छन्ति । अमुद्र्यङ् । अमुद्र्यंचौ । अमुद्र्यंचः । सम्बोध-
नेप्येवं । अमुद्र्यंचम् । अमुद्र्यंचौ । अमुद्रीचः । अमुद्री-
चा । अमुद्र्यग्भ्याम् । इत्यादि । अदसो द्रेश्च प्रथङ्मुत्वम् ।
इति केचिदिच्छन्ति लत्ववत् । यथा कृपि लाक्षणिकस्याला
क्षणिकस्य च रेफस्य लत्वमेवमत्रापि । अमुमुयङ् । अमुमुयंचौ ।

---

१ अदसोद्रेः पृथङ्मुत्वं केचिदिच्छंति लत्ववत् ।
केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते,, इति

अमुमुयंचः। सम्बोधनेप्येवं। अमुमुयचं। अमुमुयंचा। अमुमुईचः। अमुमुईचा। अजादौ मुभावस्यासिद्धत्वात् इको यणादेशो न भवति। अमुमुयग्भ्याम्। इत्यादि। केचिदन्तस्य सदेशस्य। अदमुयङ्। अदमुयंचौ। अदमुयंचः। इत्यादि। त्यदाद्यत्वविषये विधिरयमन्यत्र नेत्येके मृष्यंते। अदद्र्यङ्। अदद्र्यंचौ। अदद्र्यंचः। इत्यादि। सम् सहपूर्वत्वे च। संमचतीति सहांचतीति विगृह्य क्व्यादिः। सम् अच् सह अच् इति स्थिते–

३१४। **संसहयोस्समिसध्री**।४।३।२५५। सम् सह इत्येतयोः यथासंख्यं समि सध्रि इत्येतावादेशौ भवतः अञ्चतौ क्व्यन्ते द्यौ परतः। पूर्ववदन्यत्। सम्यङ्। सध्र्यङ्। इत्यादि। तिरम् पूर्वत्वे तिरोऽञ्चतीति विगृह्य क्व्यादिः।

३१५। **तिरसस्तिर्य्ये**।४।३।२५६। तिरसित्येतस्य तिरि इत्ययमादेशो भवति अञ्चतौ अकारादौ क्व्यन्ते द्यौ परतः। तिर्यङ्। तिर्यञ्चौ। तिर्यंचः। सम्बोधनेप्येवं। तिर्यंचम्। तिर्यंचौ। तिरश्चः। तिरश्चा। तिर्यग्भ्याम्। तिर्यग्भिः। इत्यादि। पूजायामर्थे वर्तमानस्यांचतेः "नांचोऽर्चे" इति नखाभावाद् अच इति वचनाच्च नुम् भवति। अन्यत् पूर्ववत्। प्राङ्। प्रांचौ। प्रांचः। सम्बोधनेप्येवं। प्रांचं। प्रांचौ। प्रांचः। प्रांचा। प्राङ्भ्याम्। प्राङ्भिरित्यादि। सुखस्फान्तखम्। कुगागमश्च। प्राङ्क्षु। प्राङ्सु। प्रेत्यादिपूर्वत्वेप्येवं। टकारान्तो निरट्शब्दोऽभिधेयलिंगः। अट पट गतौ।

अकार उच्चारणार्थः । निरटतीति विगृह्य क्विबादिः । ततः स्वादयः । निरट् । निरड् । निरटौ । निरटः । इत्यादि । एवं निष्पडादयः । तकारान्तो मरुच्छब्दः । ततः स्वादयः । मरुत् । मरुद् । मरुतौ । मरुतः इत्यादि । एवं त्वत्शब्दः । भवत् शब्दस्य भेदः । भवतु इति स्थिते उकारः उगित्कार्यार्थः । ततः स्वादयो नुमादिः ।

३१६ । **अत्वसोऽभ्वादेः । ४ । ४ । ११ ।** अत्वन्तस्य असन्तस्य च भ्वादिवर्जितस्य उङो दीर्भवत्यकौ सौ परतः । सुखादि । भवान् । भवंतौ । भवंतः । किसंबोधने–

३१७ । **भगवद्भवत्वघवतो रिः कावबस्यौः । ५ । ४ । ६ ।** भगवत् भवतु अघवदित्येतेषां वा रिर्भवति कौ परतः तत्सन्निधानं च अवशब्दस्य सर्वस्य औकारादेशः । रेफस्य विसर्जनीयः । हे भोः । हे भवन् । हे भवंतौ । हे भवंतः । भवता । भवद्भ्याम् । भवद्भिः । इत्यादि । एवं भगवदघवच्छब्दा उगिदंतावुन्नेयौ । गोमतुशब्दस्य-गोमान् । गोमंतौ । गोमंतः । इत्यादि । भवतृशब्दस्य भेदः । ऋकार उगित्कार्यार्थः । ततः स्वादयो नुमादिः । भवन् । भवंतौ । भवंतः । इत्यादि । एवं जरत्भविष्यत्प्रभृतयः । महच्छब्दस्य भेदः । महतृ इति स्थिते ऋकार उगित्कार्यार्थः । ततः स्वादयो नुमादिः ।

३१८ । **स्महतौ । ४ । ४ । ७ ।** सकारान्तस्य महच्छब्दस्य च अकौ धे यो नकारस्तस्योङो दीर्भवति । सुखादि । महान् । महांतौ । महांतः । हे महन् । हे महांतौ । हे

महांतः । इत्यादि । थसंज्ञकस्य शत्रंतस्य भेदः । डुदाञ् दाने। डुञकाराविती । पूर्ववत् धुत्वे च । ततः "सति" इति लिट् । तस्य स्थाने "सल्लिटः" इति शत्रादेशः । तस्मिन् कर्तरि शबिति शप् । तस्य 'ह्वदादेरुजुबित्युब् । तस्मिन् "लिड्चुकचिधेरिति द्वित्वं । तयोर्द्वयोः "थः" इति थसंज्ञा ।"पूर्वश्चः"इति पूर्वस्य चसंज्ञायां "प्रः" इति प्रादेशः । "श्नस्नोरातः" इति आकारस्य खं । ददत् इति स्थिते-ततः स्वादयः ।

३१६ । **न थात् । ५ । १ । ६०** । थादुत्तरस्य शतुर्नुम् न भवति धे परतः । ददत् । ददतौ । ददतः । इत्यादि । एवं दधत्प्रभृतयः । जक्ष भक्षहसनयोः । अकार उच्चारणार्थः । लटः शत्रादेशः । शप् । तस्य "ह्वदादेरुजुप्" इति उप् । ततः स्वादयः । "उगिदचां धेऽभ्वादेरिति नुम्प्रासः । जक्षादिरिति थसंज्ञायां "न थाद्" इति नुम्निषेधः । जक्षत् । जक्षद् । जक्षतावित्येवमादि । एवं जागृतद्दरिद्रच्चकासच्छासत् शब्दा नेयाः । ककारान्तः सुशक् शब्दः । शक्लृ शकने । लृकारोऽनिडर्थः । सुशक्नोतीति विगृह्य—क्विबादिः । सुशक् । सुशग् । सुशकावित्यादि । एवं तत्वलुगादयः । पकारांतो विलप्शब्दः। जल्प रप लप व्यक्तायां वाचि । विलपतीति विगृह्य-क्विबादिः । विलप् । विलब् । विलपावित्यादि । एवं सुधूप्त्रादयः । शकारान्तो विश् शब्दः । ततः स्वादयः । व्रश्चभ्रस्चेत्यादिना षत्वं जश्त्वं चर्त्वं च । विट् । विड् । विशौ । विशः । इत्यादि । तादृश्

शब्दस्य भेदः । दृशिरौ प्रेक्षणे । औकारोऽनिडर्थः । इर् शब्दो वाऽर्थः । स इव दृश्यते, तमिव पश्यतीति विगृहे--

३२० । **कर्मण्यिवे त्यदाद्यन्यसमाने दृशष्टक् सक्व । २ । २ । ७२ ।** त्यदादौ अन्यशब्दे समानशब्दे च कर्मण्युपमानवृत्तौ श्याचि दृशेष्टक् सक् क्वि इत्येते त्या भवन्ति । इति क्विः । स चाप्रायोगी । वाक्सः । तद् दृश् इति स्थिते-षद् दृक्दृशदृक्षे" इति प्रस्तुत्य—

३२१ । **आः ४ । ३ । २५५।** षत्ये दृक् दृश दृक्षइत्येतेषु च द्युषु परतः पूर्वपदस्याकारादेशो भवति । तादृक् । तादृग् । तादृशौ । तादृशः । इत्यादि । एवं अमूदृश् भवादृश अन्यादृश् प्रभृतयः । षकारान्तो रत्नमुष्शब्दः । ततः स्वादयो जश्त्वचर्त्वे । रत्नमुट् । रत्नमुड् । रत्नमुषौ । रत्नमुषः । इत्यादि । एवं द्विषादयः । षष्शब्दाज्जसादयः । उबिल इति जस्शसोरुप् । जश्त्वचर्त्वे । षट् । षड् । हे षट् । हे षड् । षड् । षड्भिः । षड्भ्यः । षड्भ्यः । आमि नुटि च कृते पूर्वस्य जश्त्वं । त्ये इति णत्वं ड्डत्वं च परस्य । षण्णाम् । षड्सु । सकारान्तः सुवचस्शब्दः । शोभनं वचोऽस्येति बसः । ततः स्वादयः । सौ-अत्वसोऽभ्वादेरिति अकौ सौ उङोऽसन्तस्य दीत्वं । सुवचाः । सुवचसौ । सुवचसः । हे सुवचः । हे सुवचसौ । हे सुवचसः । सुवचसम् । सुवचसौ । सुवचसः । सुवचसा । भकारादौ रित्वमुत्वमेप्च । सुवचोभ्यामित्यादि । एवं सुवयः सुप-

यमूसुमनसउदितमनसप्रभृतयः । उशनस्शब्दस्य भेदः । ततः स्वादयः । ऋदुशनसित्यादिना ङन् । सुखमुङो दीत्वं । उशना । उशनसौ । उशनसः । किंसंबोधने वो[१]शनोशननिति पक्षे उशन उशनन् इत्येतावादेशौ भवतः । केश्च खं । अनादेशे सकारांत एवेति त्रैरूप्यं । हे उशन । हे उशनन् । हे उशनः । हे उशनसौ । हे उशनसः । इत्यादि सुपचोवत् । पुम्सुशब्दस्य भेदः । पुम्सु इति स्थिते उकार उगिद्कार्यार्थः । ततः स्वादयः । "एधे" इति अधिकृत्य —

३२२ । **पुंसो ङस्** । ५ । १ । ७० । पुम्सुइत्यंतस्य गोर्ङसादेशो भवति धे परतः । ङकारोऽन्त्यविध्यर्थः । उगिदचां घेऽम्वादेरिति नुम् । सहतोरिति दीत्वं । सस्फान्तयोः खं । पुमान् । "नश्चापदांते झलि" इत्यनुस्वारः । पुमांसौ । पुमांसः । हे पुमान् । हे पुमांसौ । हे पुमांसः । पुमांसम् । पुमांसौ । पुंसः । पुंसा । हलादौ स्फान्तखे "नुम्मोऽम्" इत्यनुस्वारः । यय्यं परस्वमिति परस्वत्वम् । पुम्भ्याम् । पुम्भिः । पुंसे । पुम्भ्याम् । पुम्भ्यः । पुंसः । पुम्भ्याम् । पुम्भ्यः । पुंसः । पुंसोः । पुंसाम । पुंसि । पुंसोः । "क्विणोः ससेः षः नुमशरः" इति नुम्ग्रहणस्यानुस्वारनियमार्थत्वात्षत्वं न भवति । पुंसु । श्रेयस्शब्दस्य भेदः । स च उदित् । ततः स्वादयः । श्रेयान् । श्रेयांसौ । श्रेयांसः ।

---

१ । उशनस्शब्दस्य उशन उशनन् इत्येतौ वा निपात्यौ कौ । इत्यस्यार्थः ।

हे श्रेयन् । हे श्रेयांसौ । हे श्रेयांसः । इत्यादि । एवं गारीयस् । पर्य्यस्प्रभृतयः । विद्वस्शब्दस्य भेदः । विद ज्ञाने । अकार उच्चारणार्थः । धुत्वे सति लटः शत्रादेशः । विद् अत् इति स्थिते । कर्तरि शाबिति शप् । तस्य "ह्वदादेरुजुबिति उप् । त्यस्वे त्याश्रयमिति घ्युङ एप् प्राप्तः । नोमता गोरिति निषिद्धः । शत्रपेक्षया पुनरेप् प्राप्तः । गेऽपि इति ङित्वे ङितीति प्रतिषिद्धः ।

३२३ । **विदेः शतुर्वसुः ५ । १ । ५९** । विदेः परस्य शतुः स्थाने वसुरादेशो भवति । उकार उगित्कार्यार्थः । ततः स्वादयः । सुटि नुमादिः । विद्वान् । विद्वांसौ । विद्वांसः । हे विद्वन् । हे विद्वांसौ । हे विद्वांसः । विद्वांसम् । विद्वांसौ । शसादावचि भस्येत्यधिकृत्य–

३२४ । वसोर्वस्योश् । ४ । ४ । १३२ । वस्वन्तस्य भस्यावयवो यो वकारस्तस्य उश् इत्ययमादेशो भवति । शास्वसृघसामिति षत्वं । विदुषः । विदुषा । भकारादौ । वसुस्रंस्वित्यादिना दत्वं । रित्वापवादः । विद्वद्भ्याम् । विद्वद्भिः । इत्यादि । अं अः ᳲ क ᳲ पान्ता अप्रसिद्धाः ।

इति हलंताः पुंलिंगाः ।

अथ हलंताःस्त्रीलिंगाः ।

हकारान्तः स्त्रीलिंग उपानह्शब्दः । णहौञ् बंधने । ञ-कारौकारावनिडर्थौ । ध्वादेः ष्णो ऽष्ट्याष्ठिव्ष्वष्कः स्नं" इति नत्वं । ततः क्विबादिः ।

३२५ । **[1]नहिवृतिवृषिव्यधिरुचिसहितनौ क्वौ वाग्गेः** । ४ । ३ । २८४ । नह्यादिषु क्विबंतेषु पूर्वस्य वाचो ऽजन्तस्य गेश्च दीर्भवति । ततः स्वादयः ।

३२६ । **नहो धः** । ५ । २ । ३३ । नहः हकारस्य धकारादेशो भवति झलि च पदान्ते च । जश्त्वचर्त्वे । उपानत्, उपानद् । उपानहौ । उपानहः । इत्यादि नेयं । उष्णिह्शब्दस्य क्वित्यस्य कुरिति कुत्वं । उष्णिक् । उष्णिग् । उष्णिहौ । उष्णिहः । इत्यादि । यकारान्तो नियतलिङ्गो ऽप्रसिद्धो वाच्य-लिंगस्तु पूर्ववद् । वकारांतो दिव्शब्दः । स च सुदिव्शब्द-वत् । द्यौः । दिवौ । दिवः । इत्यादि । रेफांतो गिर्शब्दः । गॄ निगरणे ।

३२७ । **संपदादिभ्यः क्विप् क्तिः**[2] । २ । ३ । ८८ । संपदादिभ्यो धुभ्यः भावे कर्तारि स्त्रीलिंगे क्विप् क्ति इत्येतौ त्यौ भवतः ।

---

१ । अस्य स्थाने—नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ । ४।३। २१९ । इति

२ । अस्य स्थाने—एताद्दशमेव वार्तिकं ।

३२८ । ऋतामिद्धोः । ४।१।८३ । ऋकारांतस्य धोरिकारादेशो भवति । रंतोऽणुरिति रंतत्वं । ततः स्वादयः । "दीः र्वोरिगुङः" इति दीत्वं । विसर्जनीयः । गीः गिरौ । गिरः । इत्यादि । धोः स्वरूपग्रहणे तत्त्यविज्ञानात् ग्रोऽचि इति लत्वं न भवति । धुर्वी हिंसने । ईकारो ङीयश्वीदिद्वेटोऽपतस्ते इति विशेषणार्थः । ततः क्विप् ।

३२९ । रः ख्वम् । ४।४।१८ । रेफात्परयोः छकारवकारयोः झलादौ क्विपि खं भवति । शूठोपवादः । ततः स्वादयः । धूः । धुरौ । धुरः । इत्यादि । एवं पुरादयः । चतुःशब्दस्य भेदः । ततो जसादिः । "त्रिचतुरः स्त्रियां तिसृचतसृ" इति चतस्रादेशः । रोच्युरिति रेफः । चतस्रः । चतस्रः । चतसृभिः । चतसृभ्यः । चतसृभ्यः । "नाम्यतिसृचतसृ" इति प्रतिषेधात् दीत्वं न भवति । चतसृणाम् । चतसृषु । लकारजकारांतौ स्त्रीलिङ्गाव-प्रसिद्धौ । वाच्यलिंगौ तु पूर्ववत् । एवमन्यत्रापि । मकारान्तः प्रियप्रदाम्शब्दः । स च प्रदाम्शब्दवत । ङणाकारांतावप्रसिद्धौ । नकारांतः सामन्शब्दः । स च राजन्शब्दवद् । एवं दामन् बहुराजन्प्रभृतयः । फकारांतोऽप्रसिद्धः । भकारांतः ककुभ् शब्दः । ककुप् । ककुब् । ककुभौ । ककुभः । इत्यादि । घढांतौ अप्रसिद्धौ । धकारांतः समिध्शब्दः । तस्याप्यविशेषः । समित् । समिद् । समिधौ । समिधः । इत्यादि । जकारान्तः सृज्शब्दः । स च भिषज्शब्दवत् । वगडंता अप्रसिद्धाः । दकारांतो दृषद्

शब्दः। तस्याप्यविशेषः। एवं शरदूसंपत्विपदादयः। खं फछठथांतास्तथा अप्रसिद्धाः। चकारांतस्त्वच्शब्दः। तस्य कुत्वजश्त्वचर्त्वानि। त्वग्। त्वक्। त्वचौ। त्वचः। इत्यादि। एवं वाच्प्रभृतयः। टकारांता अप्रसिद्धाः। तकारांतो विद्युत्-शब्दः। तस्याप्यविशेषः। एवं त्रिंशत्चत्वारिंशत्प्रभृतयः। ककारांतोऽप्रसिद्धः। पकारान्तोऽप्शब्दः। ततो बहुवचनमेव। जसि-स्वसृनप्तृ इत्यादिना दीत्वं। आपः। अपः। भकारादौ-

३३०। भ्यपः। ५। २। १६३। अप्शब्दस्य गोर्निमित्ते भकारादौ तकारादेशो भवति। अद्भिः। अद्भ्यः। अभ्यः। अपाम्। अप्सु। शकारान्तो दृश्शब्दः। तस्य कुत्वादिः। दृक्। दृग्। दृशौ। दृशः। इत्यादि। एवं दिश्प्रभृतयः। निश्शब्दस्य भेदः। व्रश्चेत्यादिसाहचर्याद्धोः शकारस्य षत्वमिति चेत् जश्त्वादि, तस्यासिद्धत्वान्न कुत्वं। निच्। निज्। निशौ। निशः। इत्यादि। स्तोश्चुना श्चुरिति सकारस्य शकारः। शश्छोऽमीति छत्वं। निच्छु। षकारांतस्त्विष्शब्दः। स च रत्नमुष्शब्दवत्। दधृष्। ऋत्विगादिना क्यंतत्वात् कुत्वादि। दधृक्। दधृग्। दधृषौ। दधृषः। इत्यादि। सकारान्ता आर्चिस्शब्दः। ततः स्वादयः। पदांतेरीत्यादिः। अन्यत्र षत्वम्। आर्चिः। आर्चिषौ। आर्चिषः। इत्यादि। सुपि-शरि सश्चेति पक्षे सकारः। आर्चिष्सु। आर्चिःषु। एवं सुयशस्प्रभृतयः। अनुस्वाराद्यन्ता अप्रसिद्धाः।

इति हलंताः स्त्रीलिंगाः

अथ हलन्ताः नपुंसकलिंगाः ।

हकारान्तो गोदुह्शब्दः। ततः स्वादयः। नपः स्वमोरित्युप् । गोदुक्। औकारयोः "नप इति शीभावः । गोदुही । जस्शसोरिति शिः ।

३३१ । [1]झलाम् । ५।१ । ५४ । अचः परा या झल्-जातिस्तदन्तस्य नपो धे परतो नुम् भवति । गोदुंहि । इत्यादि । एवं मधुलिहादयः । यकारांतोऽव्युत्पत्तिपक्षेऽप्रसिद्धः । व्युत्पत्तिपक्षे तु पूर्ववत् समय्शब्दः । समय् । समयी । समयि । इत्यादि । वकारान्तः सुदिव्शब्दः । शोभना द्यौरस्मिन्निति बसः । ततः स्वमोरुपो बहिरंगस्यासिद्धत्वात् अंतरगं दिवो हल्युदित्युत्वं । सुद्यु । सुदिवी । सुदीवि । हे सुद्यो । हे सुद्यु । इत्यादि । व्यत्पत्तिपक्षे तु दिवेः शूठि प्रादेशे चादौ सुपीको-चीति नुमि धे च दीत्वे सति-अक्षद्यु । अक्षद्युना । अक्षद्यूनि । इत्यादि । रेफांतो वार्शब्दः । वाः । वारी । वारि । इत्यादि । सुपि-वाःषु । चतुर्शब्दस्य जस्शसोः शिः । वादेशः । चत्वारि । चत्वारि । पूर्ववद् शेषः । लकारांतः प्रियप्रज्वल्शब्दः । प्रिय-प्रज्वल् । प्रियप्रज्वली । प्रियप्रज्वलि। इत्यादि । ञकारांतः प्रञ्-शब्दः । प्रजानातीति प्रज्ञः । स इवाचरातीति । प्रक् । प्रग् । प्रञी । प्रञि । इत्यादि । मकारांतो प्रियप्रदातःम्शब्दः । प्रियप्र दान् । प्रियप्रदामी । प्रियप्रदामि । इत्यादि । ङकारान्तः प्रियङ् शब्दः । प्रियं ङवते इति क्विप् । प्रियङः । तमाचष्ट प्रियं ङय-

---

[1] अस्य स्थाने नपोऽज्झलः । ५ । १ । ५१ इति सूत्रं ।

तीति पुनः क्विप्। प्रियङ्। प्रियङी। प्रियङ्कि। णकारांतः प्रियसुगुणशब्दः। ततः स्वादयः। प्रियसुगण्। प्रियसुगुणी। प्रियसुगुणि। इत्यादि। प्रियसुगुण्ट्सु। नकारांतश्चर्मन्शब्दः। ततः स्वादयः। नो मृदंते खमिति नखं। चर्म। चर्मणी। चर्माणि। किंसंबोधने, न कौ इत्यधिकृत्य–

३३२। **नपि वा**। ५। २। ४१। पदस्यांते नपुंसकलिंगे नकारस्य खं वा भवति कौ परतः। हे चर्मन्। हे चर्म। इत्यादि। भादावजादौ अम्वस्फादिति प्रतिषेधादनो खं न भवति। चर्मणा। इत्यादि। एवं कर्मन्धर्मन्प्रभृतयः। ब्रह्महन्शब्दस्य शिभावे वा ङिश्योरिति विकल्पेनानं खं। हो घिञ्णिन्नि" इति हकारस्य घकारः। ब्रह्मह। ब्रह्मघ्नी। ब्रह्महणी। ब्रह्महाणि। हे ब्रह्महन्। हे ब्रह्मह। हे ब्रह्मघ्नी। हे ब्रह्महणी। हे ब्रह्महाणि। पुनरपि ब्रह्मह। ब्रह्मघ्नी। ब्रह्महणी। ब्रह्महाणि। पूर्ववच्छेषं। अहन्शब्दस्य भेदः। ततः स्वादयः। स्वमोरुपि–

३३३। **अह्नन्**। ५। ३। १०३। अहानित्यंतस्य पदस्य रिर्भवति। इति रित्वे प्राप्ते–

३३४। **रोऽसुपि**। ५। ३। १०५। अह्नो नकारस्य रेफादेशो भवति असुपि परतः। इति रो भवति। अहः। अह्नी अहनी। अहानि। संबोधनेप्यविशेषः। भकारादौ रिरुत्वमेप्व। अहोभ्यामित्यादि। झकारांतः-समुत्। समुद्। समुज्झौ।

समुंज्झि । इत्यादि । भकारान्तः गर्दभ्शब्दः । गर्दप् । गर्दब् । गर्दभी । गर्दम्भि । इत्यादि । घकारान्तः साधुघक् । साधुघग् । साधुगघी । साधुगंघि । इत्यादि । ढकारान्तः मूढ इवाचरतीति मूढति । पुनः क्विप् । मूड् । मूट् । मूढी । मूंढि । इत्यादि । धकारांतस्तत्वभुत् । तत्वभुद् । तत्वबुधी । तत्वबुंधि । इत्यादि । जकारांतो धानाभृस्ज्शब्दः । ततः स्वादयः । स्फादेः स्कोंतेति सकारस्य खं । व्रश्चभ्रस्जेत्यादिना षत्वं । जश्त्व चर्त्वे । धानाभृड् । धानाभृट् । धानाभृज्जी । जस्शसोरंतरंगत्वात् सकारस्य जश्त्वचर्त्वयोः कृतयोः शौ नुमि विशेषः । धानाभृञ्जि । इत्यादि । बगडंता अप्रसिद्धाः । दकारांतो द्विपाद्शब्दः । ततः स्वादयः । द्विपात् । द्विपाद् । श्यां परभूतायां पादः पदिति पद्भावः । द्विपदी । द्विपांदि । इत्यादि । एवं त्रिपादादयः । खकरांतः-सुदुक् सुदुग् । सुदुःखी । सुदूंःखि । इत्यादि । फकारांतः-निर्गुप । निर्गुब् । निर्गुफी । निर्गुंफि । इत्यादि । छकारांतः-प्रमोछत इति विच् । प्रमोछ् । प्रमोच् । प्रमोच्छी । प्रमोंञ्छि । इत्यादि । ठकारान्तः सुपट् । सुपड् । सुपठी । सुपण्ठी । इत्यादि । थकारांतो गोमथ्शब्दः । गोमत् । गोमद् । गोमथी । गोमन्थि । इत्यादि । चकारांतः मूलानि वृश्चतीति क्विप् । स्फादिखे षत्वादि । मूलवृट् । मूलवृड् । मूलवृश्ची । मूलवृंश्चि । इत्यादि । प्राञ्चतीति प्राक् । प्राग् । शीभावे अच इत्यखं । चाविति दीर्त्वं । प्राची । प्राञ्चि । इत्यादि । एवं प्रत्यच्अमुमुयच्सम्यच्तिर्यच्प्रभृतयः । ददत्शब्दात् स्वादयः ।

ददत् । ददद् । ददती । शौ-न थादिति निषेधे प्राप्ते-

३३५। वा नपः । ५ । १ । ६१ नपुंसकलिंगात् थसंज्ञकात् परस्य शतुर्नुम् वा भवति । ददन्ति । ददति । इत्यादि । एवं जक्षदादीनां रूपसिद्धिः । यात् । याद् । श्यां - शीम्बोरादिति वा नुम् । यान्ती । याती । शौ झलामिति नुम् । यान्ति । इत्यादि । एवं वात्प्रभृतयः । भवत् । भवद् । श्याम् । शप्श्यादिति नुम् । भवंती । भवन्ति । इत्यादि । एवं दीव्यदादयः । ककारान्तः सुतक् । सुतग् । सुताङ्कि । इत्यादि । पकारान्तः सुतप् । सुतब् । सुतपी । सुताम्पि । इत्यादि । शकारान्तः सुदिश्शब्दः । सुदिक् सुदिग् । सुदिशी । सुदींशि । इत्यादि । षकारान्तः रत्नमुड् । रत्नमुट् । रत्नमुषी । रत्नमूंषि । इत्यादि । सकारान्तः पयः । पयसी । शौ-झलामिति नुम् । स्महत इति दीः। पयांसि । इत्यादि । एवं तेजस्तमस्प्रभृतयः । विद्वस्शब्दात्स्वादयः । विद्वत् । विद्वद् । वसो वस्योशिति उश् । विद्वांसि इत्यादि । अर्चिस् शब्दात्स्वादयः । अर्चिः । अर्चिषी । षत्वस्यासिद्धत्वाद्दीत्वं । अर्चींषि । इत्यादि । अनुस्वाराद्यन्ता अप्रसिद्धाः ।

इति हलन्ताः नपुंसकलिंगाः ।

—:=०=:—

अथालिंगौ युष्मदस्मदशब्दावुच्येते ।

तयोश्चालिंगत्वात् त्रिषु अपि लिंगेषु समानं रूपं । तद् यथा, त्वं युवा । त्वं युवतिः । त्वं तीर्थम् । अहं युवा, अहं ब्राह्मणजातिः । अहं पात्रं इति । युष्मद् अस्मद् इति स्थिते । ततः

स्वादयः । सुप्याष्ट्नः, युष्मदस्मदोः, मावघेरिति च प्रस्तुत्य–

३३६। **त्वाहौ सौ** । ५ । १ । १६८ । युष्मदस्मदोस्तदन्तस्य च गोर्मावघेर्यथासंख्यं त्व अह इत्येतावादेशौ भवतः ।

३३७ । **ङेसुटोऽम्**[1] । ५ ।१। २६ । युष्मदस्मदोस्तदंतस्य च गोर्मावघेर्यथासंख्यं गुसंज्ञानिमित्तभूतस्य ङे इत्येतस्य सुटश्च सुपः अमित्ययमादेशो भवति ।

३३८। **खमादेशे** । ५ । १ । १६३ । युष्मदस्मदोः खं भवति आदेशभूते सुपि परतः । इति दकारस्य खं । पूर्वोमीति पूर्वत्वं । त्वम् । अहम् ।

३३९ । **युवावौ द्वौ** । ५ ।१। १६६ । युष्मदस्मदोर्द्वित्वे वर्तमानयोः मावघेः शब्दरूपस्य यथासंख्यं युव आव इत्येतावादेशौ भवतः सुपि परतः ।

३४०। [2]**आविपि** । ५ । १ ।१६१। युष्मदस्मदोस्तदन्तस्य च गोराकारादेशो भवति औकारे इपि च सुपि परतः । युवाम् । आवाम् ।

३४१ । **यूयवयौ जसि** । ५ । १ । १६८ । युष्मदस्मदोर्मावघेः तदंतस्य च गोर्यथासंख्यं यूय वय इत्येतावादेशौ भवतः जसि सुपि परतः । पूर्ववदमादेशे च कृते एप्यत इति पररूपं । यूयम् । वयम् ।

---

१ अस्य स्थाने–ङेसुटोऽम् । ५ । १ । २४ । इति सूत्रं ।

२ । अस्य स्थाने – इपि । ५ । १ । १४६ । इति । आवि । ५ । १४७ । इति सूत्रद्वयं ।

३४२।[1]त्वमौ त्यद्यौ चैके।५।१।१६७। एकत्वविशिष्टे अर्थे वर्तमानयोर्युष्मदस्मदोः मावधेर्यथासंख्यं त्व म इत्येतावादेशौ भवतः सुपि परतः त्ये द्यौ च। आविपीति आत्वं। दीत्वं। त्वाम्। माम्। औटि-पूर्ववद्। युवाम्। आवाम्।

३४३। शसो न्[2] ।५।१।२७। युष्मदस्मद्भ्यां परस्य शसो नकारादेशो भवति। परस्यादेरिति अकारस्य नत्वं। आविपीति आत्वम्। युष्मान्। अस्मान्। टायां-त्वमौ भवतः।

३४४। यः। ५।१।१६२। युष्मदस्मदोस्तदंतस्य च गोर्यकारादेशो भवति सुपि परतः। परिहृत्यापवादविषयं उत्सर्गोऽभिनिविशत इति पारिशेष्यात् टाओसङेषु अयं विधिः। त्वया। मया। भ्यामि युवावौ भवतः। रायस्भिरिति वर्तमाने–

३४५। युष्मदस्मदोः ।५।१।१६०। युष्मदस्मद् इत्येतयोः तदंतस्य च गोराकारादेशो भवति सकारभकारादौ सुपि परतः। दीत्वं। युवाभ्याम्। आवाभ्याम्। भिस्यपि-आत्वे दीत्वे युष्माभिः। अस्माभिः। ङयि–

३४६। तुभ्यमह्यौ ङयि। ५। १। १७०। युष्मदस्मदोस्तदन्तस्य च गोस्तुभ्य मह्य इत्येतावादेशौ भवतः ङयि सुपि परतः। ङे सुटोमित्वम्। स्वमादेशे इति दखं। तुभ्यम्। मह्यम्। भ्यामि-युवाभ्याम्। आवाभ्याम्। भ्यसि–

१। अस्य स्थाने – त्वमावेकवचने। ५। १। १५६। इति त्यद्योश्च। ५। १। १५७ इति सूत्रद्वयं।

२। अस्य स्थाने – शसो नः। ५। १। २५। इति सूत्रं।

३४७ । [1]भ्यसोऽपोऽभ्यम् । ५ । १ । २८ । युष्मदस्मद्भ्यां परस्य अपो भ्यसः अभ्यं इत्ययमादेशो भवति । दस्य पररूपं च । युष्मभ्यम् । अस्मभ्यम् । ङसौ-त्वमौ भवतः ।

३४८ । [2]भ्यसोऽत् । ५ । २९ । युष्मदस्मद्भ्यां परस्य कायाः बहोः भ्यसः एकवचनस्य च ङसेरत् इत्ययमादेशो भवति । दस्य पररूपे । त्वत् । मत् । भ्यामि-युवाभ्याम् । आवाभ्याम् । भ्यसोत् । युष्मत् । अस्मद् । ङसि –

३४९ । तवममौ ङसि । ५ । १ । १७१ । युष्मदस्मदोर्माविधेस्तदन्तस्य च गोस्तवममादेशौ भवतः ङसि सुपि परतः ।

३५० । युष्मदस्मदोः ङसोऽश् । ५ । १ । २५ । युष्मदस्मद्भ्यां परस्य ङसः अशित्ययमादेशो भवति । शकारः शित्कार्यार्थः । दस्य पररूपं । तव मम । ओसि–युवावौ भवतः । यः इति दकारस्य यकारादेशो भवति । युवयोः । आवयोः । आमि ---

३५१ । साम आकम् । ५ । १ । ३० । युष्मदस्मद्भ्यां परस्य साम आकमादेशो भवति । आगामिनं सुटं भूतमिवोपादाय साम इति निर्देशः क्रियते, तत् किं प्रयोजनं ? आकमि कृते पुनः सुण्माभूत् । अकमि पररूपमित्याकम्वचनं । युष्माकम् । अस्माकम् । ङौ-त्वमौ । य इति आदेशश्च । त्वयि, मयि । ओसि

---

१ । अभ्य स्थाने—भ्यसोऽभ्यम् । ५ । १ । २६ । इति ।

२ । अस्य स्थाने—अत् कायाः । ५ । १ । २७ । इति ।

पूर्ववत् । युवयोः । आवयोः । सुपि दकारस्यात्वं । युष्मासु । अस्मासु । यदा पुनरेतौ युष्मदस्मदौ वाक्यावयवौ तद्वाक्यावयवात् पदात् परौ भवतस्तदाऽनयोरविप्तास्थयोर्भेदः । "वाक्यस्य" पदादपादादाविति च प्रस्तुत्य-

३५२ । युष्मदस्मदोऽविप्तास्थस्य वान्नौ[1] । ५।३।२४ । वाक्यस्यावयवयोस्तद्वाक्यावयवात् परयोरपादादौ वर्तमानयोर्युष्मदस्मदोरविप्तासु स्थितयोः वान्नौ इत्येतावादेशौ भवतः । बहुत्वैकत्वयोरादेशांतरवचनादिह द्वित्वे संप्रत्ययः । युवाभ्यां युवां युवयोरित्येषां अविप्ताद्विवचनांतानां वामित्येवमादेशो भवति। आवाभ्याम्, आवाम्, आवयोरित्येषां च नावित्ययमादेशो भवति । ज्ञानं वां दीयते । ज्ञानं नौ दीयते । धर्मो वां रक्षतु । धर्मो नौ रक्षतु । शीलं वां स्वं । शीलं नौ स्वं ।

३५३ । [2]बहोर्वस्नस् । ५ । ३ । २५ । वाक्यस्यावयवयोस्तद्वाक्यावयवाद् पदात् परयोरपादादौ वर्तमानयोर्युष्मदस्मदोः अविप्ताबहुवचनान्तयोर्वस् नस् इत्येतावादेशौ भवतः । दानं वो दीयते । दानं नो दीयते । देवो वो रक्षतु । देवो नो रक्षतु। ज्ञानं वः स्वं । ज्ञानं नः स्वं ।

३५४ । एकस्य तेमे । ५ । ३ । २६ । वाक्यस्यावयवयोस्तद्वाक्यावयवात् पदात्परयोपादादौ वर्तमानयोर्युष्मद-

---

१ । अस्य स्थाने "वांनावौ" इति पाठो महावृत्तौ । २ । अत्र "वस्नसौ" इति पाठः ।

स्मदोः आविभ्तैकवचनांतयोर्यथासंख्यं ते मे इत्येतावादेशौ भवतः । दानं ते दीयते । दानं मे दीयते । शीलं मे स्वं । शीलं ते स्वं ।

३५५ । **त्वामेपः**[1] । ५ । ३ । २७ । वाक्यस्यावयवयोस्तद्वाक्यावयवात् पदात् परयोरपादादौ वर्तमानयोः युष्मदस्मदोरिवेकवचनांतयोः त्वा मा इत्येतावादेशौ भवतः । त्वामित्येतस्य मन्तस्य मा इत्ययमादेशः । धर्मस्त्वा रक्षतु । धर्मो मा रक्षतु । एते वान्नावाद्यादेशाः अनन्वादेशे विभाषिता वेदितव्याः । अन्वादेशे तु नित्यमिति ।

३५६ । [2]**बोध्यं प्राङ्नेव** । ५ । ३ ।३२। बोध्यांतं पदं युष्मदस्मभ्द्यां पूर्ववन्नेवाविद्यमानवद् भवति । किमसद्भावे प्रयोजनम् ? वान्नावादेशनिवृत्तिः । देवदत्त युवाभ्यां दीयते शीलं । देवदत्त आवाभ्यां शीलं दीयते । देवदत्त युवां धर्मो रक्षतु । देवदत्त आवां धर्मो रक्षतु । देवदत्त युवयोः शीलं स्वं । देवदत्त आवयोः शीलं स्वम् । देवदत्त युष्मभ्यं शीलं दीयते । देवदत्त अस्मभ्यं शीलं दीयते । देवदत्त युष्मान् रक्षतु धर्मः । देवदत्त अस्मान् रक्षतु धर्मः। देवदत्त युष्माकं शीलं स्वं। देवदत्त अस्माकं शीलं स्वं । एवं इतरत्रापि बोध्यं ।

३५७ । **न चवाहाहैवयोगे** । ५ । ३ । २८ । च वा ह अह एव इत्येतैः शब्दैर्योगे संबंधे युष्मदस्मदोर्वान्नावाद्या-

---

१ । अस्य स्थाने त्वामाविपः । ५ । ३ । १९ । इति सूत्रं ।
२ । अस्य स्थाने "बोध्यमसद्वद् । ५ । ३ । २४ । इति सूत्रं।

देशाः न भवंति । ज्ञानं युवाभ्यां च दीयते । ज्ञानं आवाभ्यां च दीयते । ज्ञानं युवां च रक्षतु । ज्ञानं आवां च रक्षतु । ज्ञानं युवयोश्च स्वं । ज्ञानमावयोश्च स्वं । ज्ञानं युवाभ्यां वा दीयते । ज्ञानमावाभ्यां वा दीयते । ज्ञानमावाभ्यां ह दीयते । ज्ञानं युवाभ्यां अह दीयते । ज्ञानमावाभ्यां अह दीयते । ज्ञानं युवाभ्यामेव दयिते । ज्ञानमावाभ्यामेव दीयते । एवमन्यत्राप्युन्नेयं ।

३५८ । दृश्यर्थैश्चिंत्तायां । ५। ३। २९ । दृश्यर्थैर्धुभिः चिंताविषयैर्योगे युष्मदस्मदोर्वान्नावादयो न भवन्ति । स च योगः परम्परया साक्षाच्चाभ्यूह्यः । ज्ञानं युवाभ्यां दीयमानं संदृश्यागतो जनः । ज्ञानमावाभ्यां दीयमानं संदृश्यागतो जनः । जनो युवां समीक्ष्य गतः । जन आवां समीक्ष्य गतः । जनो युवयोः कार्यमालोचयति । जन आवयोः कार्यमालोचयति । एवमपरेऽपि विज्ञेयाः । चिंतायां इति किं ? जनो वः पश्यति । चक्षुषा इत्यर्थः ।

अथालिङ्गासंख्यानि शब्दरूपाणि उच्यंते ।

३५९ । [1]ततन्स्सात्त्राशःकृत्वस्सुच्वद्धाऽऽम्क्त्वांतुम्सुम्मिङाभत्यन्यक्स्वरादयो भिः । १ । १ । ८८ । तत् तस् सात् त्रा शस् कृत्वस् सुच् वद् धा आम् क्त्वा अम् तुम् इत्येतत्त्यांताः सुम्मिङ्प्रतिरूपाः तिसंज्ञा अन्यग्भूताः स्वरादयश्च शब्दा भिसज्ञा भवंति । तादिति प्रत्या-

१ । अस्य स्थाने असंख्यं झिः । १ । इति सूत्रं ।

हारः । कायास्तासित्यारभ्य आएधात् तकारेण । सर्वस्मात् तस्मादिति विगृह्य कायास्तसिति तस् । सर्वतस् त तस् इत्येतस्य भित्वात् भेरिति सुप उपि पदत्वे सति रित्वविसर्जनीयौ भवतः । सर्वतः । ततः । एवं तस् । पीलु मूलेनैकादिक् पीलुमूलतः । सात् । भस्मसाद्भवति । अत्र जश्त्वं प्रयोजनं । त्रा-राजत्रा वसति । अत्र पदत्वं । शस्-बहुशः । कृत्वस्-शतकृत्वः । सुच्-द्विः । अत्र च रित्वविसर्जनीयौ । वत्-राजवद् वृत्तं । अत्र जश्त्वं । धा-बहुधा । अत्र पदत्वं । आम्-कासांचक्रे । अनुस्वारपरस्वत्वे । त्का-कृत्वा । अम्-पूर्वं भोजम् । तुम्-कर्तुम् व्रजति । अत्र विकल्पेन परस्वं । सुम्मिङा[१]भाः-रात्रौ । मात्रायाम् । अस्ति । स्वस्ति । अत्र पदादपादादावित्यादि । ति-अदःकृत्य । अत्र कृतमित्यादिना शिनिषेधः । [२]अन्यक्स्वरादि-स्वास्तिष्ठ त्वम् । अत्र सत्वं सिद्धं । के ते स्वरादयः । स्वर् । अन्तर् । पुनर् । प्रातर् । शुनुनर् । उच्चैस् । नीचैस् । शनैस् । ऋद्क् । ऋत् । युगपत् । आरात् । पृथक् । ह्यस् । श्वम् । दिवा । सायं । चिरं । ईषत् । मनाक् । ज्योषम् । जोषम् । तूष्णीम् । वहिस् । अदस् । निकषा । समया । मृषा । स्वयम् । नक्तम् । इद्धा । सामि । वता । सनम् । सनात् । तिरस् । अन्तरा ।

---

१ । सुप् च मिङ् च सुम्मिङौ । तौ इव आभा येषां ते सुम्मिङाभाः ।

२ । न्यंचतीति न्यंचः । न न्यंचः अन्यंचः । अन्यंचश्च ते स्वरादयश्च अन्यक्स्वरादयः ।

ज्योकम् । शम् । सना । नाना । विना । अन्यत् । क्षमा । उपांशु । विहायसा । दोषा । मुधा । अमा । मिथ्या । पुरा । मिथो । मिथु । मिथस् । प्रायस् । मुहुस् । प्रवाहु । आर्य । अलम् । अभिक्ष्णम् । साकर्द्धम् । मुहुम् । हिरुक् । अशान् । च । वा । ह । अह । एव । एवम् । नूनम् । शाश्वत् । सूपत् । कूपत् । क्वचित् । नेत् । चेत् । कच्चित् । यत्यनेह । हंत । हाकिर् । नाकिण् । माङ् । नञ् । धावत् । तावत् । त्वं । त्वै । न्वै । कै । रै । शौषत् । वौषत् । स्वाहा । स्वधा । ओम् । हिम् । खलु । किल । अदस । अथ । स्म । अ । इ । उ । ऋ । लृ । ए । ऐ । ओ । औ । उञ् उकञ् । आवह । आतङ्क । युवत् । किम् । यत् । तत् । धिक् । हे । है । पाट । पुट् । आहो । उताहो । हो । अहो । अदो । अहो । मा । नो । ननु । हि । तु । नु । इति । इव । चन । पुंवत् आप् । शप् । हिकम् । शुकम् । नुकम् । नहिकम । सत्यम् । भूतम् । श्रद्धा । नो । हि । न चेत् । चात् । मर्मा । ईम् । किम् शिम् । प्र । पर । अप । अव । अथ । आहो । सिल । वै । है । पशु । पट्ट । सह । अनुपक् । अंग । पुत्र । तो । ओक । अरे । अवे । अयि । वट् । पड् । मुत् । तावट, हुं । आम् । कुम् । वस । मया । क्लिश् । प्र । पर । अप । सम । अनु । अव । निस् । दुस् । वि । आङ् । नि । अधि । अपि । अति । सु । उत् । अभि । प्रति । परि । उप । इति स्वरादयः ।

अथ ङीत्याः ।

ङ्याप्मृदः, स्त्रियामिति च वर्तमाने–

३६० । [1]अजाद्यतां टाप् । ३ । १ । ४ । अज इत्येवमादीनां अकारांतानां च मृदां वाच्यायां स्त्रियां द्योत्यायां ततष्टाबित्ययं त्यो भवति ॥ बाधकबाधनार्थं अजादीनामुपादानं । अनकारान्तार्थं च । अजा । एडका । अश्वा । चटिका । मूषिका । कोकिला । अत्र जातिलक्षणस्य ङ्यो बाधा । बाला । होढा । पाका । मत्सा । मन्दा । वत्सा । अत्र वयोलक्षणस्य ङ्यो बाधा । पूर्वापहाणा । अपरापहाणा । परप्रहाणा । अत्र टिल्लक्षणस्य निपातनाएणत्वमाद्योः । त्रिफला । अत्र रलक्षणस्य । क्रुञ्चा । उष्णिहा । देवविशा । अत्र हलंतत्वादत इति अप्राप्तः । अतः खल्वपि । खट्वा । देवदत्ता । या । सा । कारिषगन्ध्या । कोडचा । टाबन्तानां दयाशब्दवद्रूपसिद्धिः ।

३६१ । [2]ङ्युगिदृन्नञ्चोः । ३ । १ । ५ । उगिदन्तात् ऋकारान्तात् अञ्चत्यन्ताच्च मृदः स्त्रियां वर्तमानात् ङीत्यो भवति । उगितः—गोमतु । गोमती । श्रेयसु । श्रेयसी । विद्वसु । विदुषी । वसो वस्योश् । भवतु । भवती । तत्रभवती । कृतवतु । कृतवती । अतिपुंसु । अतिपुंसी । ऋदितः-महतृ । महती । दधतृ । दधती । सुदतृ । सुदती । इत्यादि । ऋतः-कर्त्री । हर्त्री । धात्री । भर्त्री । भाक्त्री । पवित्री । सवित्री । क्रोष्ट्री ।

---

१ । अस्य स्थाने अजाद्यतष्टाप् । ३ । १ । ४ । इति सूत्रं ।
२ । अस्य स्थाने—उगिदृन्नान्ङी । ३ । १ । ६ । इति सूत्रं ।

इत्यादि । नः-राज्ञी । तर्ची । दंडिनी । छत्रिणी । करिणी । ब्राह्मणी । इत्यादि । अञ्चोः-प्राची । प्राञ्ची । उदीची । अमुमुइची । तिरश्ची । इत्यादि ।

३६२ । **नेल्स्वस्रादेः** । ३ । १ । ७ । इलसंज्ञकेभ्यः स्वस्रादिभ्यश्च स्त्रियां यदुक्तं तन्न भवति । पञ्च रोहिरायः । सप्त कुमार्यः । नान्तात् ङीप्राप्तः टाप् च न । स्वसा । परमस्वसा । सुस्वसा । दुहिता । ननान्दा । याता । माता । तिस्रः । चतस्रः ।

३६३ । **मनो डाप्च** । ३ । १ । ८ । मन्नंतात् मृदः स्त्रियां वर्तमानात् डाप् भवति न ङीश्च । एवं द्वैरूप्यं । डकारष्टिखार्थः । पकारः समान्यग्रहणविघातार्थः । दामा । दामे । दामाः । दामा । दामानौ । दामानः । पामा । पामे । पामाः । पामानौ । पामानः । एवं सीमन्अतिमहिमन्नित्यादि ।

३६४ **अनश्च बात्** । ३ । १ । ६ । अनतांच्च बसान्मृदः स्त्रियां वर्तमानान्मृदः डाप् भवति न ङीश्च । शोभनं पर्व यस्यास्तिथेः सा सुपर्वा । सुपर्वे । सुपर्वाः । सुपर्वाणौ । सुपर्वाणः । प्रियश्वा । प्रियश्वे । प्रियश्वाः । प्रियश्वानौ । प्रियश्वानः । सुधर्मा । सुधर्मे । सुधर्माः । सुधर्मा । सुधर्माणौ । सुधर्माणः । प्रियधर्मा । प्रियधर्मे । प्रियधर्माः । प्रियधर्मा । प्रियधर्माणौ । प्रियधर्माणः । इत्यादि ।

३६५ । **पादो वा** । ३।१।१५ । पाच्छब्दांतान्मृदः स्त्रियां वा ङीर्भवति । पूर्ववद् पद्भावः । द्विपदी । द्विपात् । त्रिपदी । त्रिपाद् ।

३६६ । डाबृचि । ३।१ । १६ । पाच्छब्दाद् ऋचि स्त्रियां टाप् भवति । द्विपदा ऋक् । त्रिपदा ऋक् । अतः "अनीचः" इति वर्तमाने—

३६७ । वयस्यनंत्ये । ३ । १ । २४ । वयो बाल्यादिस्तास्मिन् अनंत्येऽचरमे वर्तमानादतोऽनीचो मृदास्त्रियां ङीर्भवति । ऐः ङ्यामित्यकारस्य खं । कुमारी । किशोरी । वधूटी । चिरंटी । तरुणी । कलभी । अनंत्ये इति किं ? वृद्धा । स्थविरा । अत इति किं ? शिशुः । अनीचः इति किं ? प्रियकुमारा ।

३६८ । रात् । ३ । १ । २५ । रसंज्ञकादतो मृदः स्त्रियां वर्तमानात् ङीर्भवति । पंचपूली । दशमूली । पंचखट्वी । दशखट्वी । पुरुषात्प्रमाणे वेत्यतो वेत्यनुवर्तमाने–

३६९ । गुणोक्तोरुतोऽखरुस्फोङः । ३ । १ । ३० । खरुस्फोङ्वर्जितात् उकारांतात् गुणवाचिनो वा ङीर्भवति । पटुः, पट्वी । मृदुः, मृद्वी । पृदुः, पृद्वी । गुरुः, गुर्वी । गुणोक्तेरिति किं ? आखुरियं । उत इति किं ? शुचिरियं । अखरुस्फोङः इति किं ? खरुरियं । पांडुरियं ।

३७० । इतोऽक्तेः । ३ । १ । ३२ । क्त्यंतवार्जितादिकारांतात्कृतः स्त्रियां वा ङीत्यो भवति । भूमिः, भूमी । धूलिः । धूली । अंगुलिः । अङ्गुली । साल्मिः, साल्मी । शुचिः । शुची । पदतिः, पदती । इत्यादि । इत इति किं ? हानुः । अक्तेरिति किं ? कृतिः ।

३७१ । [1]**पुंयोगादज्येष्ठादिभ्यः** ।३। १ । ४३ । पुमान् यस्मिन् सति पुंस्केत्युच्यते । पुंयोगाद्धेतोः पुंवाचकात्कृतः स्त्रियां ङीत्यो भवति ज्येष्ठप्रकारान् वर्जयित्वा । प्रष्ठस्य भार्या प्रष्ठी । प्रचरी । गणकी । महामात्री । एते प्रष्ठादयः पुंयोगाद्भार्यायां वर्तंते । अज्येष्ठादिभ्य इति किं ? ज्येष्ठस्य भार्या ज्येष्ठा । कनिष्ठा । मध्यमा । गोपालिका । पशुपालिका ।

३७२ । **जातेरयोङ्शूद्रात्**[2] । ३ । १ । ३३ । यकारोङ्शूद्रवर्जितात् जातिवाचिनो मृदः स्त्रियां वर्तमानादतो ङीत्यो भवति । कुक्कुटी । मयूरी । व्याघ्री । कच्छपी । ब्राह्मणी । वृषली । नटी । सारसी । वानरी । नारी । सिंही । चक्रवाकी । गर्दभी । अयोङ्शूद्रादिति किं ? इभ्या । क्षत्रिया । शूद्रा । अत इति किं ? तित्तिरिः । आखुः ।

३७३ । **सख्य**[3]**शिश्वीनार्यः** । ३ । १ । ६६ । सखी अशिश्वी नारी इत्येते शब्दाः निपात्यंते । सखिशब्दादितोक्तेरिति विकल्पेन ङीत्ये प्राप्ते सहत्वेन वर्तते इति सखशब्दाद्वापि च प्राप्ते ङीत्यो निपात्यः । सखीयं । नास्याः शिशुरस्तीति बसे ङीत्यः । अशिश्वी । नृनरयोर्ङीत्यः । नारित्ययं चादेशः । नारी स्त्री । ङीत्यांताः गौरीशब्दवज्ज्ञेयाः ।

---

१ । अस्य स्थाने—पुंयोगादृखारगोपालकादेः । ३ । १ । ३८ । इति सूत्रं ।

२ । अस्मिन् सूत्रे "अशूद्रात्" इति नास्ति महावृत्तौ ।

३ । अस्मिन् सूत्रे "नार्यः" इति नास्ति ।

३७४ । ऊङ[1]तोऽयोः । ३ । १ । ७६ । युशब्दवर्जितादुकारांतात् मृदः जातिवाचिनः स्त्रियामूत्यो भवति । कुरूः । इक्ष्वाकूः । ब्रह्मबन्धूः । वीरबन्धूः । अयोरिति किं ? अध्वर्युरियं ।

३७५ । श्वश्रूः । ३ । १ । ७८ । श्वश्रूरिति निपात्यते । श्वशुरशब्दस्य पुंयोगलक्षणे ङीप्राप्ते अकारोकारयोः खमूत्यश्च निपात्यः । श्वशुरस्य भार्या श्वश्रूः ।

३७६ । ऊरूद्योरिवे । ३ । १ । ७९ । ऊरूत्तरपदादिवार्थे वर्तमाने स्त्रियां ऊत्यो भवति । करभाविव ऊरू यस्याः सा करभोरूः । कदलीस्तंभोरूः । ऊरुद्योरिति किं ? हस्तस्वाम्यूरुः । इव इति किं ? पीनोरुः ।

३७७ । यूनस्तिः । ३ । १८२ । युवानित्येतस्मात् स्त्रियां तिरित्ययं त्यो भवति । मृदंते खं । युवतिः । मतिवज्ज्ञेयं ।

इति स्त्रीत्याः
संपूर्णाः ।

अथ विभक्त्यर्थः ।

कस्मिन्नर्थे वाः ।—

३७८ । मिङेकार्थे वाः । १ । ४ । ६५ । मिङंतेन पदेन एकार्थे समानार्थे वर्तमानात् ङ्याम्मृदो वा विभक्ती भवति । पूर्ववदेको द्विर्बहुश्चेति संज्ञाः । साधने स्वार्थे इति च

---

१ । अस्य स्थाने—ऊङुतः । ३ । १ । ५६ । इति सूत्रं ।

नियमः । उजकाराविती । वीरः । वीरौ । वीराः । देवः । देवौ । देवाः । कृपा । कृपे । कृपाः । वामोरूः । वामोर्वौ । वामोर्वः । नौ । नावौ । नावः । तीर्थं । तीर्थे । तीर्थानि । तत्वविद् । तत्वविदौ । तत्वविदः । इत्यादि । यथासंभवं क्रिया च योज्या ।

३७६ । संबोधने बोध्यं । १ । ४ । ६६ । संबोधने विहितायाः वायाः बोध्यमिति संज्ञा भवति । तच्च बोध्यांतं पदं गम्यमानक्रियापेक्षया मिङैकार्थं भवति । देवदत्त व्रजाम्यहमित्यादौ तिष्ठ न व्रज त्वमेहि इत्यादिका हि क्रिया गम्यते । क्रियाविशेषणमेतत् । तत्र क्रियाप्राधान्ये सति उपाधावित्यधिकारेण मृदर्थातिरेकात् तायां प्राप्तायां सत्यां वचनमित्येके । एवं जिनदत्त एहि । गुरुदत्त तत्रैव तिष्ठ । अरे विश्वमित्र मागाः । तात भुंक्ष्व । शिशो जैनेंद्रमधीष्व । गौर्याहि । द्विवचने–हंसौ रमेथां । स्तनौ वर्त्तेथां । कुमारौ स्वैरं क्रीडतं । कोकिलौ कोकूयेथां । बहुवचने–आर्याः श्रोतुमागच्छत । पुत्राः संपद्यध्वं । द्रुतं तपस्विनः क्षमध्वं । पादपाः फलत । इत्यादि नेयं ।

क्व पुनरिब् भवति–

३८० । कर्मणीप् । १ । ४ । १ । क्रियते साध्यते इति कर्म क्रियासाधनं । तत् त्रिविधं । निर्वर्त्यं विकार्यं प्राप्यं चेति । तत्र कर्मणि इप् विभक्ती भवति । कुम्भं करोति । शरं लुनाति । आदित्यं पश्यति । तत् त्रिविधमपि पुनस्त्रिविधं । ईप्सितमनीप्सितमुदासीनं चेति । गुडं भक्षयति । अहिं लंघयति । वने व्याघ्रं

पश्यति । ग्रामं गच्छन् वृक्षमूलान्युपसर्पति । पुनस्तद् द्विविधमपि मुख्यममुख्यं चेति । अजां नयति ग्रामं । गां दोग्धि पयः । पुनः सप्तधा च । तदुक्तं—

प्राप्यं विषयभूतं च निर्वर्त्यं विक्रियात्मकं ।

कर्तुश्च क्रियया चाप्यमीप्सितानीप्सितेतरत् ॥१॥ इति ।

क्रियते कटः । कृतः कटः । शत्यः कटः । प्रासादको ग्राम इत्यत्र भिङ्कृतद्धितसैरविहिते ऽभिधेयाभावान्मिङैका र्थत्वाच्च न भवति । प्रधानं चाभिहितमिति ।

३८१ । [1]**हांतरांतरेणातिधिङ्निकषासमयाभिश्चोपाधौ** । १ । ४ । २ । हा अन्तरा अन्तरेण अति धिक् निकषा समया इत्येतैर्भिसंज्ञकैर्योगे उपाधौ परार्थे ङ्याम्मृदः इब् विभक्ती भवति । परार्थमुपकारकं विशेषणं अप्रधानं । प्रधानं विशेष्यमुपकार्यं । यदर्थमन्यदुपाधीयते स उपाधिः । टशावितौ । हा देवदत्तं वर्तयते व्याधिः । अंतरा निषदं नीलं च विदेहाः । अन्तरेण पुरुषकारं न किंचित् । अतिवृद्धं कुरून्महद्बलं । धिग् देवदत्तमयशः प्रवृद्धं । निकषा पर्वतन्नदी । समया ग्रामं ग्रामाः । हा तात धिङ् मातरित्यादौ संबोधनतया विवक्षा न हादियोगे वाया इति नेब् भवति । चकारोऽनुक्तसमुच्चयार्थस्तेन बुभुक्षितं न प्रतिभाति किंचित् । वृणीष्व भद्रे प्रतिभाति यत्त्वामित्यादि सिद्धं ।

---

१ । अस्य स्थाने महावृत्तौ वार्तिकमुपलभ्यते । अंतरांतरेण योगे । १ । ४ । ३ । इति सूत्रं च ।

३८२ । [1]पर्यभिसर्वोभयैस्तस्त्यैः । १ । ४ । ३ । परि अभि सर्व उभय इत्येतैः शब्दैः तस्त्यांतैर्योगे उपाधौ इब् भवति । परितो ग्रामं वसति । अभितो ग्रामं । सर्वतो ग्रामं । उभयतो ग्रामं वनानि । उपाधाविति किं ? प्रधाने वनादौ माभूत् ।

३८३ । द्विरुक्तैरधोऽभि[2]: । १ । ४ । ४ । द्विरुक्तैः कृताद्वित्वैः अधोध्युपरिभिः शब्दैर्योगे उपाधौ इब् विभक्ती भवति । अधोधोग्रामं ग्रामाः । अध्यधिग्रामं ग्रामाः । उपर्युपरि ग्रामं ग्रामाः । द्विरुक्तैरिति किं ? उपरि शिरसः शिखा ।

३८४ । [3]कालाध्वन्यभेदे । १ । ४ । ५ । काले अध्वनि च उपाधौ वर्तमानात् ङ्याम्मृदः अभेदे अत्यंतसंयोगे द्रव्यादिना योगे इब् विभक्ती भवति । मासं गुडापूपाः । क्रोशं पर्वतः । अत्र द्रव्येनाभेदः । मासं कल्याणी । क्रोशं कुटिला नदी । अत्र गुणेनाभेदः । मासमधीते । क्रोशमधीते । अत्र क्रियया ऽभेदः । ताया ईपो वा प्राप्तौ—

३८५ । कर्मैवाधिशीङ्स्थासः । १ । २ । ४० । अधिपूर्वाणां शीङ् स्था आस इत्येतेषां आधारो यस्तत्कारकं कर्मसंज्ञमेव भवति । ग्राममधिशेते । पर्वतमधितिष्ठति । प्रासादमध्यास्ते ॥ क्वपुनर्भा विभक्ती भवति । संज्ञो भा दे, इत्यनुवर्तमाने-

---

१ । अस्य स्थाने वार्तिकं महावृत्तौ ।

२ । अस्यापि स्थाने वार्तिकं ।

३ । अस्य स्थाने कालाध्वन्यविच्छेदे । १ । ४ । ४ । इति सूत्रं ।

३८६ । कर्तृकरणे[1] । १ । ४ । ३२ । कर्तरि करणे च कारके उपाधौ भा विभक्ती भवति । कर्तरि-देवदत्तेन कृतं । गुरुदत्तेन भुक्तं । जायाभ्यां पीड्यते निस्वः । कन्याभ्यां कम्यते बुधः । शत्रुभिः प्रहता मूर्खाः । करणे-दात्रेण लुनाति।परशुना छिनत्ति।लोचनाभ्यां बाधते बाला शृंगारैर्हन्यते मनः।

३८७ । [2]प्रकृत्यादिभ्यः । १ । ४ । ३३ । प्रकृत्यादिभ्यो भा भवति । प्रकृत्याभिरूपः । प्रायेण वैयाकरणः । गोत्रेण काश्यपः ।

३८८ । सहार्थेन । १ । ४ । ३४ । सहार्थेन योगे उपाधौ भा भवति । स च तुल्ययोगो विद्यमानता च । तत्र जात्यादिसंबंधे सति तुल्ययोगेवत्सेन सह गौः । पुत्रेण सहागतः । पुत्रेण सह स्थूलः । पुत्रेण सह श्रीमान् । मातृपितृभ्यां सह धनवान् । पुत्रैस्सह गार्गः । सत्तया योगे-सहैव दशभिः पुत्रैर्भारं वहति रासभी ।

३८९ । येनांगिविकारेत्थंभावौ । १ । ४ । ३५ । येन अंगिविकारो विकृतत्वमित्थंभावोऽनेन प्रकारेण भवनं च लक्ष्यते तस्मादुपाधौ भा भवति । अक्ष्णा काणः । पाणिना कुणिः । पादेन खंजः । शिरसा खल्वतिः । इत्थंभावे-अपि भवान् कमंड-

१ । अस्मिन् सूत्रे "भा" इत्यधिकं महावृत्तौ ।

२ । अस्य स्थाने प्रकृत्यादिभ्य उपसंख्यानमिति वार्तिकं तच्च कर्तृकरणे भा । १ । ४ । २९ । इत्यस्मिन् पूर्वतः भाशब्दस्यानुवृत्तौ सिद्धायां पुनर्भाग्रहणेन लभ्यते ।

तुना छात्रमद्राक्षीत् । अपि भवान् अवदाताभ्यां नयनाभ्यां कुमारमैक्षिष्ट । छत्रचामरैरर्हतं श्रद्दधाति स्म । छात्रत्वादिप्रकारमापन्नो मनुष्यः कमंडल्वादिना लक्ष्यते ।

३६० । हेतौ[1] । १ । ४ । ३६ । हेतौ वर्तमानात् ङ्याम्मृदो भा भवति । दानेन कुलं । विद्यया यशः । कन्यया शोकः । चित्ताचित्ताभ्यां परिग्रहाभ्यां क्लिश्यते लोकः । फलैर्भज्यते वृक्षः ।

३६१ । संप्रदानेऽप् । १ । ४ । २४ । संप्रदाने कारके अप् विभक्ती भवति । उपाध्यायाय गां ददाति । जिनदत्ताय कन्यां प्रयच्छति । मातरपितराभ्यां कशिपुं वितरति । शस्त्रेभ्यस्तोयं राति । देवदत्ताय श्लाघते । देवदत्तायापह्नुते । तुभ्यं रोचते मोदकः । मह्यं स्वादते धर्मः । देवदत्ताय शतं धारयति । देवदत्ताय राध्यति । देवदत्ताय प्रतिशृणोति । देवदत्ताय प्रतिगृह्णाति । देवदत्ताय क्रुध्यति । देवदत्ताय द्रुह्यति ।

३६२ । [2]तादर्थ्ये । १ । ४ । २५ । यन्निमित्तं किंचिद् विवक्ष्यते तदर्थः । तस्य भावस्तादर्थ्यं । तस्मिन्नर्थे अप् विभक्ती भवति । रथाय दारुः । कुण्डलाय हिरण्यं ।
संयमाय श्रुतं धत्ते, पुमान् धर्माय संयमं ।

---

१ । लौकिकफलसाधनयोग्यपदार्थो हेतुः कारणं निमित्तमित्यर्थांतरं ।

२ । अस्य स्थाने नास्ति सूत्रं परं – अप्तदर्थार्थबलहितसुखरक्षितैः ।१।३। ३१। अनेन तदर्थेऽविभक्तया समासवचनमेव ज्ञापकमप् विभक्ती तदर्थे भवतीति ।,,

धर्मं मोक्षाय मेधावी धनं दानाय भक्तये ॥ १ ॥

३६३ । [1]शक्तार्थनमःस्वस्तिस्वाहावषड्स्वधाहितैः । १ । ४ । २८ । शक्तार्थैः शब्दैः नमस्स्वस्तिस्वाहा वषड्स्वधाहित इत्येतैश्च योगे उपाधौ अप् विभक्ती भवति । शक्तो जिनदत्तो देवदत्ताय । मल्लो मल्लाय प्रभवति । नमोस्तु परमेष्ठिने । स्वस्ति मातृपितृभ्यां । इन्द्रेन्द्राणीभ्यां स्वाहा । वषड् अग्निभ्यः । स्वधा उपाध्यायेभ्यः । हितं मातृपितृभ्यां । ब्यस्य वा कर्तरीत्यतो वेति वर्तमाने—

३६४ । [2]मद्रक्षेमायुःशंहितार्थार्थैराशिष्यप् । १ । ४ । ८६ । मद्रार्थैः क्षेमार्थैरायुरार्थैः शमर्थैर्हितार्थैश्च शब्दैर्योगे उपाधौ वर्तमानात् ङ्याम्मृदोर्वाऽब्विभक्ती भवति आशीर्विषये पक्षे ता भवति । मद्रमस्तु जिनशासनाय । मद्रमस्तु जिनशासनस्य । भद्रमस्तु जैनाय । भद्रमस्तु जैनस्य । कल्याणमस्तु जैनस्य । क्षेममस्तु संघाय । क्षेममस्तु संघस्य । कुशलमस्तु संघाय । निरामयमस्तु संघाय । संघस्य वा । दीर्घमायुरस्तु भव्याय । बहुजीवितमस्तु भव्याय । भव्यस्य वा । शमस्तु प्रजाभ्यः । शुभमस्तु प्रजाभ्यः । शर्म अस्तु प्रजाभ्यः । प्रजानां वा । हितं

---

१ । अस्य स्थाने—नमःस्वस्तिस्वाहास्वधालंवषड्योगे । १ । ४ । २६ । इति ।

२ । अस्य स्थाने—अप्चाशिष्यायुष्यमद्रभद्रकुशलसुखहितार्थैः । १ । ४ । ७७ । इति सूत्रे ॥

भूयान्मित्राय । पथ्यं भूयान्मित्राय । हृद्यं भूयान्मित्राय । मित्रस्य वा । अर्थो भवतु जैनाय । प्रयोजनं भवतु जैनाय । कार्यं भवतु जैनाय जैनस्य वा । क्व पुनः का—

३६५ । कापादाने । १ । ४ । ४१ । अपादाने कारके का विभक्ती भवति । ग्रामादपैति । ग्रामादागच्छति । पर्वतादवरोहति । अश्वाद्धावतः पतितः । गच्छतः सार्थादवहीनः । देवदत्तो जिनदत्तादागतः । मेषौ परस्परतोऽपसर्पतः । शृंगाच्छरो जायते । बीजादंकुरो रोहति । तस्मादात्मानं प्रतिलभमानो निःसरतीति प्रतीयते । गंगा हिमवतः प्रभवति । महाहिमवतो रोहित् प्रभवति । तत्र प्रथममुपलभ्यमाना ततो निःसरतीति प्रतीयते । कुतो भवान् । पाटलिपुत्रात् । कुतो भवानागच्छति । पाटलिपुत्रादागच्छामीति प्रतीयते । गवेधुमतः शांकास्यं चतुर्षु योजनेषु । ततो निसृत्य गतेषु भवतीति प्रतीयते । कार्तिक्याः आग्रहायणी मासे । ततः प्रभृति मासे गते भवतीति प्रतीयते । अधर्माज्जुगुप्सते । अधर्माद्विरमति । अधर्मात् मीमांसते । धीमान् अधर्मो दुःखहेतुरिति बुद्धया ततो निवर्तते इति प्रतीयते । धर्माद् प्रमाद्यति । भोजनात् पराजयते । अध्ययनात्पराभवति । भावेन ततोऽन्यो निभूय निवर्तते इति प्रतीयते । व्याघ्राद्बिभेति । चौरेभ्यः त्रस्यति । चेतसः क्षोभपूर्वकं ततो निवर्तते इति प्रतीयते । चौरेभ्यः रक्षति । दस्युभ्यस्त्रायते । तदुपघातविषयप्रतिकारेण ततो निवर्तते इति प्रतीयते । यवेभ्यो गां वारयति । अकार्यात्

सुतं वारयति । कूपादंधं प्रतिषेधयति । ततो निवर्तयतीत्यर्थः । कुशूलात् पचति । आगमाच्छंसति । ततो गृहीत्वेत्यर्थः । बलाहकात् विद्युत् द्योतते । ततो निसृत्य ज्योतिः विद्योतते । विद्योतमानं वा ततो निर्द्धावतीत्यर्थः । उपाध्यायादंतर्धत्ते । उपाध्यायाल्लीयते । ततोऽदृश्यतयाऽपैतीत्यर्थः। माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः। देवदत्ताज्जिनदत्तः पटुः। अयमस्मान्निलीयतेधिकः । अयमस्मादूनः । माथुरादयः पाटलिपुत्रकादिभिः आढ्यत्वादिना समृद्धास्ततोऽतिशयादिना धर्मेण विभक्ताः प्रतीयंते । विभागश्चापायः । तद्विवक्षायामेव भवति । विवक्षांतरे तु यथाप्राप्तविभक्तयो भवंति । शृंगं शरो जायते । अधर्मं जुगुप्सते । शत्रून् पराजयते । ग्रंथिकस्य शृणोति । चौराणां बिभेतीत्यादि ।

३६६ । **ल्यप्खे कर्माधारे । १ । ४ । ४२** । ल्यस्य खे सति कर्मण्याधारे च कारके का भवति । प्रासादात्प्रेक्षते । आसनाद् प्रेक्षते । यागात् प्रेक्षते । अत एव वचनात् ल्यखं द्रष्टव्यं । ल्यख इति किं ? प्रासादमारुह्य प्रेक्षते । आसने निविश्य प्रेक्षते । कर्माधारे इति किं ? पात्राय प्रदाय गतः ।

३६७ । **दिक्छब्दान्यार्थाञ्चुदग्वाहीतराराद्बहिर्युक्ते । १ । ४ । ४३** । दिक्शब्दैरन्यार्थैरञ्चुदग्धु आ आहि इतर आरात् वहिस् इत्येतैः शब्दैर्युक्ते उपाधौ का विभक्ती भवति । दृशि दृष्टाः दिक्छब्दाः इति देशकालादिवृत्तावपि दिक्छब्दा एव अत एव शब्दशब्दोपादानं । पूर्वो

ग्रामात् । अपरो ग्रामात्। पूर्वो वसंतात् । अपरो वसंतात्। अन्यार्थैः--अन्यो देवदत्तात् । भिन्नो देवदत्तात् । अर्थान्तरो देवदत्तात् । अञ्चुत्तु--प्राग्ग्रामात् । प्रत्यग्ग्रामात् । अवाग् ग्रामात् । उदग्ग्रामात् । आ-दक्षिणा ग्रामात् । उत्तरा ग्रामात् । आहि-दक्षिणाहि ग्रामात् । उत्तराहि ग्रामात् । इतर-इतरो देवदत्तात् । अस्य द्वितीय इत्यर्थः । आरात्--आरात् ग्रामात् । आरात् पर्वतात् । बहिस्--बहिर्ग्रामात् ।

३६८ । **स्तोकाल्पकृच्छ्रकतिपयात्करणे का वाऽसत्त्वे** । १ । ४ । ४६ । स्तोक अल्प कृच्छ्र इत्येतेभ्योऽसत्त्ववाचिभ्यः करणे का विभक्ती वा भवति । पक्षे भा । स्तोकान्मुक्तः, स्तोकेन मुक्तः । अल्पेन मुक्तः । कृच्छ्रान्मुक्तः । कृच्छ्रेण मुक्तः । कतिपयेन मुक्तः। कतिपयान्मुक्तः । असत्त्व इति किं ? स्तोकेन विषेण हतः ।

३६९ । [1]**का चारादर्थैः** । १ । ४ । ५२ । आरादर्थैर्दूरार्थैरंतरार्थैश्च शब्दैरसत्त्ववाचिभिर्युक्ते का भवति ता च । दूरं ग्रामात् । दूरं ग्रामस्य । दूरं ग्रामाभ्यां । दूरं ग्रामयोः । दूरं ग्रामेभ्यः । दूरं ग्रामानां । विप्रकृष्टं ग्रामात् । विप्रकृष्टं ग्रामस्य । अंतरं ग्रामात् । अंतरं ग्रामस्य । अभ्यासं ग्रामात् । अभ्यासं ग्रामस्य ।

क्व पुनस्ता--

---

१ । अस्य स्थाने-दूरांतिकार्थैस्ताच । १ । ४ । ४२ । इति सूत्रं ।

४०० । ता शेषे । १ । ४ । ६८ । शेषेऽर्थे विशेषे ता विभक्ती भवति । कारकाणामविवक्षा शेषः । ततो मृदर्थादतिरेकः स्वस्वाम्यादिर्वा । नटस्य शृणोति । ग्रंथिकस्य शृणोति ।स्वस्वामिसंबंधसमीपसमूहविकारावयवस्थानादयस्तार्थाः । राज्ञः पुरुषः । मद्राणां राजा ।

प्रियाणां मधुरं वाक्यं कवीनां रसवद्वचः ।
गुरूणां वचनं हृद्यं साधूनामुत्तमं वचः ॥ १ ॥

ग्रामस्य समीपं । माषाणां राशयः । वारीणां वीचयः । देवदत्तस्य हस्तः । गवां स्थानं ।

४०१ । कर्तृकर्मणोः कृति । १ । ४ । ७९ । कर्तरि कर्मणि च कारके ता विभक्ती भवति कृति युक्ते । भवतामासिका । भवतां शायिका । स्त्रीलिंगे भावे पर्यायार्हणोत्पत्तौ णवुरिति ण्वुः । कर्मणि-वर्षशतस्य पूरकः । पुत्रपौत्रस्य दर्शकः । अपां स्रष्टा । पुरां भेत्ता । कृति किं ? कृतपूर्वी कटं ।

४०२ । [1]न भिन्तलोकखार्थान्वुणाम् १ । ४ । ८२ । भि त ल उ उक खार्थ आन् वुण इत्येतेषां प्रयोगे ता विभक्ती न भवति । कर्तृकर्मणोः कृतीति ता प्राप्ता प्रतिषिध्यते । भि-ओदनं भुक्त्वा । शक्तून् पायं पायमादीयते । त-कृतः कटो देवदत्तेन । ल-ओदनं पचति । चैत्यालयं कारयामास । उः-कन्यामलंकारिष्णुः । धर्मं चिकीर्षुः । उक-ग्राममागामुकः ।

---

१ । अस्य स्थाने न ञितलोकखार्थतृनां । १।४।७२। इति सूत्रं ।

स्वार्थः—सुकरः कटो भवता । सुज्ञानं तत्त्वं भवता । आनिति प्रत्याहारः । पूङ्यजोः शान इत्यारभ्य तृनो नकारेण । लोकं पवमानः । वदिता जनापवादान् । वुण्—एधानामाहारको व्रजति ।

क्व पुनरीप् ।

४०३ । ईबाधारे [1]च । १ । ४ । ५४ । कर्तुः कर्मणो वा क्रियाश्रयस्याधिकरणमाधारस्तत्र ईप् विभक्ती भवति । तेभ्यश्चारादर्थेभ्यः । आसने आस्ते । स्थाल्यां पचति । गंगायां घोषः । गुरौ वसति । तिलेषु तैलं । दधिषु सर्पिः ।

स्तनयोः पतिते नेत्रे नेत्रयोः पतितं मनः ।
भूभृत्सु पादपाः सन्ति सन्ति गंगासु वालुकाः ॥ १ ॥
वार्तासु वर्तते बुद्धिः प्रियधर्मकथासु न ।
अन्यस्त्रीषु मनो याति कुलस्त्रीषु न गच्छति ॥ २ ॥

तेभ्यः दूरे ग्रामस्य । अन्तिके ग्रामस्य ।

४०४ । [2]क्तेनः कर्मणि । १ । ४ । ५५ । क्तस्य इन्विषयस्य कर्मणि ईब्विभक्ती भवति । व्याकरणमधीतमनेनेति विगृह्य इन्पूर्वादित्यादिना इन् । अधीती व्याकरणे । आम्नीती छंदसि । परिगणिती वियदूगणिते । क्तग्रहणं किं ? कृतपूर्वी कटं । भुक्तपूर्वी ओदनं । इन्ग्रहणं किं? अतिशायितो गुरूं देवदत्तः ।

---

१ । अस्य स्थाने 'ईबाधिकरणे च । १ । ४ । ४४ । इति सूत्रं ।

२ । अस्य स्थाने इन्विषयस्य क्तस्य कर्माणि ईब्वक्तव्या, इति वार्तिकं ।

४०५ । **हेतौ[1] तद्युक्ते** । १ । ५ । ५६ । कर्मणा युक्ते हेतौ ईब्विभक्ती भवति ।

चर्मणि द्वीपिनं हंति दंतयोर्हंति कुञ्जरं ।
केशेषु चमरीं हंति सीम्नि सीमलको हतः ॥ १ ॥

४०६ । **यद्भावाद् भावगतिः** । १ । ४ । ५७ । यस्य संबंधिनो भावात् क्रियातो भावान्तरस्य गतिः प्रतिपत्तिर्भवति तस्मिन् ईविभक्ती भवति । गोषु दुह्यमानासु गतः । दुग्धास्वागतः । प्रसिद्धेन गोदोहनभावेन गमनभावो गम्यते । एवं नांदितुर्येषु वाद्यमानेषु गतः । देवार्चनायां क्रियमाणायां आगतः । आम्रेषु कषायमानेषु गतः । पक्वेष्वागतः । जातेष्विति क्रियासामर्थ्यात् गम्यते । गम्यमानोऽपि भावः सुबुत्पत्तिनिमित्तं भवति । यथा ग्रामे वृक्षः । वृक्षे शाखेति ।

४०७ । **ता चानादरे** । १ । ४ । ५८ । यद्भावाद्भावांतरगतिस्तत्र ता भवति ईप् च अनादरे अवज्ञाने गम्यमाने । रुदतो लोकस्य प्राव्राजीत् । रुदति लोके प्राव्राजीत् । क्रोशतो बंधुवर्गस्य प्राव्राजीत् । क्रोशति बन्धुवर्गे प्राव्राजीत् । किमपि बहूनां वदतामयं याति साधुमार्गेण । किमपि बहुषु वदत्सु याति साधुमार्गेण । तस्मिन्नाक्रोशति तपसानादृत्य प्राव्राजीत् । कथं मनुष्याणां क्षत्रियाः शूरतमाः । अध्वगानां धावन्तः शीघ्रतमाः । गवां कृष्णाः गाः संपन्नक्षीरतमाः इति वा । जातिक्रियागुणैः

---

१ । अस्यापि स्थाने वार्तिकं ।

समुदायादेकदेशनिर्द्धारणं प्रतिसंबिधाववक्षायां ता भवति आधार-विवक्षायां ईप् च। यथा वृक्षस्य शाखा । वृक्षे शाखा इति । व्यस्य वेत्यनुवर्तमाने–

४०८ । तुल्यार्थैर्भा । १ । ४ । ८८ । तुल्यार्थै-रुपमेयवचनैर्युक्ते उपाधौ उपमाने भा भवति ता च। मात्रा तुल्यः । मातुः तुल्यः । पित्रा समानः । पितुः समानः । देव-दत्तेन सदृक् । देवदत्तस्य सदृक् । इप्चैनेनेति अनुवर्तमाने–

४०९ । काचर्ते । १ । ४ । ४६ । ऋतेशब्देन युक्ते का विभक्ती भवति इप्च । ऋते धर्मात्कुतः सुखम् । ऋते धर्मे कुतः सुखम् ।

४१० । प्रथग्नाना भा च[1] **। १ । ४ । ७ ।** प्रथग्नाना इत्येताभ्यां युक्ते उपाधौ भा भवति का च । प्रथग् देवदत्तेन जिनदत्तः । प्रथग् देवदत्तात् । नाना देवदत्तेन देवदत्तात् ।

४११ । विना तिस्रः । १ । ४ । ८ । विनाशब्देन युक्ते उपाधौ अनंतरोक्ता भाकेपः विभक्तयः भवंति । विना ध्यानेन । विना ध्यानात् । विना ध्यानं कुतो मोक्षः ।

४१२ । [2]हेतौ सर्वाःप्रायः । १ । ४ । ४० । हेता-वित्यर्थनिर्देशपरोनुर्तते । अयं तु शब्दनिर्देशः । हेतुः कारणं निमित्तं प्रयोजनमिति पर्यायः । हेतुशब्दपर्यायप्रयुक्ते हेत्वर्थे

---

१ । अस्य स्थाने—प्रथग्विनानानाभिर्भा वा ।१। ४ । ४१ । इति ।

२ । अस्य स्थाने का हेतौ । १ । ४ । ३५ । इति सूत्रं ।

तद्वाचिनो ङ्याम्मृदः सर्वाः विभक्त्यः प्रायेण भवंति । धनेन हेतुना वसति । धनाय हेतवे वसति । धनाद्धेतोर्वसति । धनस्य हेतोर्वसति । धने हेतौ वसति । एवं कारणनिमित्तप्रयोजनशब्दै-रपि योगे नेयं । इत्याद्यनेकभेदभिन्नो विभक्त्यर्थोऽधिगंतव्यः ।

इति विभक्त्यर्थसिद्धिः ।

एवं प्रक्रियावतारे नामद्वितीयं समाप्तं ।

अथ सवृत्तमनुवर्णयिष्यामः ॥

तच्च सुबंतत्वात् सुबंतपदाश्रितत्वाच्च पदविधिः । स च समर्थपदसंबंधित्वात् समर्थः । तत् सामर्थ्यं द्विधा । एकार्थीभावो व्यपेक्षा च । तत्र प्रथगर्थानां परस्परसंबंधिनां पदानामेकार्थी-भवनमेकार्थीभावः । समासो यः पदैरुच्यते स च "स" इति सामान्यसंज्ञां लभते । ह ष य र ब द्वंद्वा इति विशेषसंज्ञाश्च । पदानां परस्परं प्रत्याकांक्षा व्यपेक्षा वाक्यविषया । तत्र हस्त्रि-विधः । पूर्वपदार्थप्रधान उत्तरपदार्थप्रधान अन्यपदार्थप्रधानश्च । तत्र पूर्वपदार्थप्रधाने-अधि स्त्री । दुस् यवन । सु मद्र । निस् मक्षिका । निस् शीत । अति कंबल । इति पूज्यपाद । अनु रथ । अनु रूप । सह व्रत । प्रति अर्थ । अनु ज्येष्ठ । सह चक्री । सह वृत्त । सह तृण । उप कुम्भ । सह प्राभृत । इति स्थिते-अधि-प्रभृतिभ्यः पूर्वपदेभ्यो झिभ्यः झेरुबित्युव्वचनसामर्थ्यादेकव-चनं सु । स्त्रीशब्दात्सुप् । यवनादिभ्यस्ता । भागे चानुप्रतिपरिणा इति अर्थशब्दादिप् । चक्रतृणाभ्यां टा । प्राभृतशब्दादिप् । सुप्

मुपेत्याधिकृत्य स इति संज्ञा क्रियते। पदाश्रयं कार्यमिदामित्युपस्थितमिदं परिभाषासूत्रं।

४१३। समर्थः पदविधिः। १। ३। १। पदयोः पदानां वा यो विधिर्विधीयते स समर्थानामेव यथा स्यादिति सति सामर्थ्ये द्विधा वाक्यपरिसमाप्तिर्लक्ष्यते लोकवत्। प्रत्येकं, समुदाये च। तत्र प्रत्येकं तावत् देवदत्तगुरुदत्तजिनदत्ताः परिधाप्यंतामित्युक्ते प्रत्येकं परिधानाक्रिया परिसमाप्यते न समुदाये। गर्गाः शतं दण्ड्यंताम् इति राजानो हिरण्यार्थिनो भवंति समुदायेन दण्डयंति न प्रत्येकं। तथा शास्त्रेऽपि क्वचित् प्रत्येकं परिसमाप्यते। यथा आदैगेप् इत्याकारादिषु ऐप्संज्ञा न समुदाये। तथा ससंज्ञा समुदाये न प्रत्येकमिति समुदायस्य संज्ञायां सत्यां-ह इत्यधिकृत्य

४१४। ञ्झिः[1] सुप्व्यृद्धृयर्द्ध्यर्थाभावातीत्यसंप्रतिशब्दाख्यातिपश्चाद्यथायुगपत्संपत्साकल्यांते। १। ३। ५। सुबिति सुबर्थोऽधिकरणादिः। व्यृद्धिः ऋद्धेरभावः। ऋद्धिः विभूतेराधिक्यं। अर्थाभावः धर्मिणोऽसत्त्वं। अतीतिरतोतत्वं। असंप्रति उपभोगादेर्वर्तमानकालप्रतिषेधः। शब्दस्य ख्यातिः प्रथा। पश्चात् पाश्चात्यः। यथार्थाः योग्यतासादृश्यवीप्सोत्तरपदार्थानतिवृत्तयः। युगपद् युगपदर्थः। संपत् अन्यूनत्वं। साकल्यमनविशेषः। अन्तोऽभ्यासोऽवसानं च। एतेष्वर्थेषु

१। अस्य स्थाने ञ्झिः विभक्त्यभ्यासर्द्ध्यर्थाभावातीत्यसंप्रतिवृद्धिशब्दप्रभवपश्चाद्यथानुपूर्व्ययौगपद्यसंपत्साकल्यांतोक्तौ। १।३।५। इति सूत्रं महावृत्तौ।

वर्तमानं झिसंज्ञकं सुबंतं समर्थं सुबंतेनोत्तरपदेन समर्थेन सह सम-स्यते । विवक्षायां ह इति विशेषसंज्ञा च भवति । तत्र वेति विकल्पाधिकाराभावादसति स्वपदवाक्ये तदर्थद्योतनोपायेनास्वपदविग्रहेणार्थः प्रदर्श्यते । स्त्रीषु वर्तते । यवनानां व्यृद्धिः । मद्राणां ऋद्धिः । मक्षिकाणामभावः । शीतस्यातीतिः । कंबलस्यायमकालः । पूज्यपादस्य शब्दस्याख्यातिः । रथानां पश्चात् । रूपस्य योग्यं । व्रतस्य सदृशं । अर्थमर्थं प्रति । ज्येष्ठानां अनतिक्रमः । चक्रिणा युगपत् । वृत्तस्य संपत् । तृणेन सह । कुंभस्य समीपं । प्राभृतमतं कृत्वेत्येवं हसंज्ञायां सत्यां—कृद्वृत्सा इति मृतसंज्ञाप्रतिलंभात् सुपो धुमृदोरिति सुप उप् ।

४१५ । **वोक्तं पूर्वं**[1] । १ । ३ । १०६ । साधिकारे वया निर्दिष्टं पूर्वं प्रयोक्तव्यं । इति अधिप्रभृतीनां पूर्वनिपातः । हश्चेति नप् । प्रो नपीति प्रादेशः । ङ्याम्मृद इत्याधिकृत्य पुनः स्वादिविधिः ।

४१६ । **हात्** । १ । ४ । १६६ । हसविधेरुत्तरस्य सुप उप् भवति । अधिस्त्रि ।

४१७ । **नातोम्त्वकायाः** । १ । ४ । १७० । हादकारांतात् परस्य सुप उप् न भवति अमादेशस्तु भवति अकायाः । दुर्यवनं । सुमद्रं । निर्मक्षिकं । निःशीतं । अतिकंबलं । इति पूज्यपादं । अनुरथं । अनुरूपं । सहस्य सः । द्याविति

---

१ । अस्य स्थाने वोक्तं न्यक् । १ । ३ । ९३ । पूर्वं । १ । ३ । ९७ । इति सूत्रद्वयं ।

वर्तमाने—

४१८। **हेऽकाले** । ४ । ३ । २४८ । हसे सहस्य सादेशो भवति अकालवाचिनि द्यौ परतः। इति सादेशः। सव्रतं। प्रत्यर्थं। अनुज्येष्ठं। सचक्रि। सवृत्तं। सतृणं। उपकुंभं। सप्राभृतं। एवं सर्वत्र सुप्सु योज्यं।

४१९। [1]**भाया वा** । १ । ४ । १७१ । हसादकारांतात् परस्या भाया अमादेशो वा भवति। दुर्यवनं कृतं। दुर्यवनेन कृतं। दुर्यवनाभ्यां, दुर्यवनैः कृतं। अकाया इति वचनात् काया अम्न भवति। दुर्यवनात्। दुर्यवनाभ्यां। दुर्यवनेभ्यः।

४२०। [2]**ईपः** । १ । ४ । १७२ । हादकारांतात् परस्या ईपो वा अमादेशो भवति। दुर्यवनं निधेहि। दुर्यवने, दुर्यवनयोः, दुर्यवनेषु निधेहि।

४२१। **स्यिनद्यृद्धेः** । १ । ४ । १७३ । स्यिसंज्ञाया नदीलक्षणात् ऋद्धिलक्षणाच्च हादकारांतादीपो नित्यममादेशो भवति। एकविंशति भारद्वाजं। पंचाशतगौतमं। नदी-द्वियमुनं। सप्तगोदावरं। ऋद्धि- सुमद्रं निधेहि। सुमगधं निधेहि॥ यावत् ओदन। यथा वृद्ध इति स्थिते—उभयत्र वाः। यावान् ओदनः। ये ये वृद्धा इति विगृह्य—

४२२। [3]**यावद्यथैवानिवे** । १ । ३ । ६ । यावद्

१। २। अनयोः स्थाने - ईब्भयोर्विभाषा। १।४।१५३। इति सूत्रं महावृत्तौ।

३। यावद्यथावधृत्यसादृश्ये। १। ३। ६। इति सूत्रमस्य स्थाने।

यथा इत्येतौ शब्दौ सुबंतौ एवार्थेऽनिवार्थे च गम्यमाने सुबंतेन सह हसो भवति । प्रसक्तस्य परिमाणावधारणमेवशब्दार्थः । सादृश्याभावोऽनिवशब्दार्थः । पूर्ववदन्यत् । यावदोदनमतिथीन् भोजय । यथावृद्धं साधूनर्चय ॥ उत्तरपदार्थप्रधाने-सूप प्रति इति स्थिते– सूपशब्दाद् ङस् । प्रतिशब्दात्सुः । सूपस्य मात्रा इति विगृह्य–

४२३ । **प्रतिनाऽल्पे**[1] । १।३।७ । प्रतिशब्देन अल्पेऽर्थे वर्तमानेन सुबंतेन सुबंतं पूर्वपदं समस्यते । स इति सामान्यसंज्ञा ह इति विशेषसंज्ञा भवति । पूर्ववदन्यत् । सूपप्रति । एवं शाकप्रति । घृतप्रति । इत्यादि ।

४२४ । **परिणा स्य्यक्षशलाकाः**[2] । १ । ३ । ८ । स्यिसंज्ञमक्षशब्दशलाकाशब्दौ च सुबंतं सुबंतेन परिणा सह समस्यते हसो भवति । स्यि- एकेनेदं न तथा वृत्तं यथाजये एकपरि । द्विपरि । त्रिपरि । चतुष्परि । अक्षेणेदं न तथा वृत्तं यथाजये अक्षपरि । शलाकया नेदं तथा वृत्तं यथा जये शलाकापरि । परिणेति किं ? मा भूत् सुबंतमात्रेण । स्य्यादय इति किं ? पाशकेनेदं न तथा वृत्तं यथा जये । अन्यपदार्थप्रधाने नदीभिश्चेति वर्तमाने–

४२५ । **स्रौ**[3] । १।३।१८ । सुबंतं नदीवाचिभिः सुबंतैः

---

१ । अस्य स्थाने - स्तोके प्रतिना । १ । ३ । ७ । इति सूत्रं ।

२ । अस्य स्थाने-परिणाऽक्षशलाकासंख्याः । १।३।८ । इति सूत्रं ।

३ । अस्य स्थाने - स्वाक्न्यपदार्थे । १ । ३ १८ । इति सूत्रं ।

सह हसो भवति खुविषये। प्रतिपदे नात्र संज्ञा गम्यते। इति नित्यः सविधिः। सादृश्यमात्रेणार्थकथनाय विग्रहः। उन्मत्तगंगा यस्मिन्निति उन्मत्तगंगं। लोहितगंगं। शनैर्गंगं। तूष्णींगंगं। एवं नामानो देशाः॥ केश केश। दण्ड दण्ड। इति स्थिते-सर्वतो जस्। केशाश्च केशाश्च परस्परस्य ग्रहणं यस्मिन् युद्धे। दण्डाश्च दण्डाश्चान्योन्यप्रहरणं यस्मिन् युद्धे इति विगृह्य–

४२६। [1]त्रे ग्रहणे प्रहरणे च सरूपं युद्धे।१।३।१६। गृह्णंति यस्मिन् तत् ग्रहणं। प्रहरंति येन तत् प्रहरणं। आर्थे कर्मव्यतिहारे वर्तमाने ग्रहणे प्रहरणे च समानश्रुतिकं सुबंतं प्रत्यासत्त्या तत्रैव वर्तमानेन सुबंतेन सह हसो भवति युद्धेऽभि-धेये। पूर्ववदन्यत्। सांत इति वर्तमाने—

४२७। त्र इच्। ४।२।२०१। आर्थे यः सविधिरुक्तः तदंतं इच् त्यो भवति। चकारः तिष्ठद्ग्वादिषु इजिति विशेष-णार्थः। एरित्यकारस्य खं।

४२८। इच्यात्।४।३।२६८। त्र इजिति य इजुक्तस्तदंते धौ पूर्वस्य प्रायः आकारो भवति। ततः स्वादयः। केशेषु च केशेषु च गृहीत्वा युध्यंते तत् केशाकेशीत्युच्यते। एवं कचाकचि। दंडैश्च दंडैश्च प्रहृत्य युध्यंते तद् दंडादंडि। मुष्टामुष्टि। प्राय इति किं? अस्यासि। प्राय इत्याधिकारात् क्वचिदाकारो न भवति॥

इति हसः।

१। अस्य स्थाने - तत्रेदमिति सरूपे। १। ३। ८९। इति सूत्रं।

अथ षः ।

षसो द्विप्रकारः । पूर्वपदार्थप्रधान उत्तरपदार्थप्रधानश्चेति । तत्र पूर्वपदार्थप्रधानो यथा- पूर्व काय इति स्थिते- पूर्वशब्दात्सुः । कायशब्दात् ङस् । पूर्वं कायस्येति विगृहे—

४२९ । पूर्वापराधरोत्तरमभिन्नेनांशिना । १ । ३ । ६७ । अंशोऽवयव एकदेशस्तद्वान् अंशी । पूर्वादीनि सुबंतानि अंशवाचीनि अंशिवाचिना सुबंतेनाभिन्नेन सह षसो भवति । पूर्ववदन्यत् । पूर्वकायः । एवमपरकायः । अधरकायः । उत्तरकायः ॥ अर्द्धं पिप्पल्या इति विगृह्य—

४३० । अर्द्धन्नप् । १ । ३ । ६८ । अर्द्धमित्येतन्नपुंसकलिंगं अंशवाचि सुबंतं सुबंतेनांशिवाचिना सह षसो भवति न चेत्सोंऽशी भिन्नः । पूर्ववदन्यत् । स्त्रीगोर्नीच इति प्रादेशःप्राप्तः नांशीयसो वे"-इति प्रतिषिद्धः । अर्द्धपिप्पली । अर्द्धकोशातकी । अर्द्धखट्वा ॥ उत्तरपदार्थप्रधानो यथा- धर्म श्रित इति स्थिते- धर्मशब्दादम् । श्रितशब्दात्सुः । धर्मं श्रित इति विगृह्य—

४३१ । [1]इप्नच्छ्रितादिभिः । १ । ३ । २२ । इबंतं पूर्वपदं ताभ्यां प्राप्तापन्नाभ्यां श्रितादिभिश्च सुबंतैः सह षसो भवति । पूर्ववच्छेषं । श्रितशब्दस्य क्रियावाचित्वाद्वाच्यालिंगता । धर्मश्रितः । धर्मश्रिता । धर्मश्रितं । एवं दुःखातीतः । इत्यादि ॥ शंकुला खण्डवदिति स्थिते- शंकुलाशब्दाट्टा । खण्डवच्छब्दात्सुः ।

---

१ अस्य स्थाने-इप्तच्छ्रितातीतपतितगतात्यस्तैः । १ ।३। २१ । इति सूत्रं महावृत्तौ ।

शंकुलया कृतः खंडवानिति विगृह्य–

४३२। [१]भा तत्कृतयार्थेनोनैः। १। ३। २८। भांतं भांतार्थकृतार्थया गुणोक्त्या अर्थशब्देन ऊनवाचिभिश्च सह षसो वा भवति। गुणोक्तेर्विन्मतोरुप्। शंकुलाखंडः। वृत्तौ कृतशब्दार्थोऽतर्भूत इति न कृतशब्दः प्रयुज्यते। एवं गिरिकाणः। स्तारशुक्लः। पदपटुः। धान्यार्थः। माषोनः। माषविकलः॥ आत्मन् कृत। दात्र लून इति स्थिते- आत्मन्दात्रशब्दाभ्यां टा। कृतलूनशब्दाभ्यां सुः। आत्मना कृतं। दात्रेण लूनं। इति विगृह्य–

४३३। साधनं कृता बहुलं। १। ३। ३०। साधनं कारकं क्रियानिर्वर्त्तकं तद्वाचि भांतं पूर्वपदं कृतेन सह षसो भवति बहुलं। शेषं पूर्ववत्। नो मृदंते खमिति नखं। आत्मकृतं। दात्रलूनं। एवं परकृतं। परशुछिन्नं॥ रथाय दारुः। कुंडलाय हिरण्यं। इति विगृह्य—

४३४। [२]अप्प्रकृतिनदर्थार्थादिभिः। १। ३। ३१। प्रकृतिः परिणामि द्रव्यं। तद्वाचिना सुबंतेनोत्तरपदेन अर्थाद् विकृतिवाचिपूर्वपदं अबंतं तदर्थार्थशब्देन तदादिभिश्चान्यैः सह षसो भवति। अन्यत् पूर्ववद्। रथदारुः। कुंडलहिरण्यं। एवं पित्रे इदं पित्रर्थं। देवाय वलिः देववलिः। प्रजाभ्यो हितं प्रजाहितं। इत्यादि॥ वृकात् भीः। चौरेभ्यो भयमिति विगृह्य—

१। अस्य स्थाने-भा गुणोक्त्यार्थेनोनैः।१।३।२७। इति सूत्रं।
२। अप् तदर्थार्थवलिहितसुखरक्षितैः। १। ३। ३१। इति सूत्रं।

४३५ । का भ्यादिभिः[1] । १ । ३ । ३३ । कांतं पूर्वपदं भी इत्येवमादिभिः सुबंतैः सह षसो भवति । पूर्ववच्छेषं । वृकभीः । चौरभयं । मृत्युभयं ॥ मोक्षस्य मार्गः । स्वर्गस्य सुखमिति विगृह्य--

४३६ । ता । १ । ३ । ७० । तांतं पूर्वपदं सुबंतेन सह षसो भवति । पूर्वमिवान्यत् । मोक्षमार्गः । स्वर्गसुखं । एवं जिनधर्मः । राज्ञः पुरुषः राजपुरुषः । एवं राज्ञः गोक्षीरं राजगोक्षीरं ॥ अक्षेषु शौंडः । पानेषु शौंडः इति विगृह्य—

४३७ । **ईप् शौंडादिभिः[2] । १ । ३ । ३५ ।** ईवंतं पूर्वपदं शौंडादिभिरुत्तरपदैः सुबंतैः सह षसो भवति वा । अन्यत् पूर्ववत् । अक्षशौंडः । पानशौंडः । एवं अक्षे धूर्तः अक्षधूर्तः । इत्यादि ॥ नञ् गो । नञ् अश्व । इति स्थिते- ञकार इत् नञोऽनिति विशेषणार्थः । उभयत्रापि सुः । न गौः । न अश्वः । इति विगृह्य--

४३८ । **नञ् । १ । ३ । ६५ ।** नञित्येतद् सुबंतं सुबंतेन सह षसो भवति ।

४३९ । नञोऽन् । ४ । ३ । २४१ । नञः अनादेशो भवति यौ परतः । अचीति पुनरनादेशसामर्थ्यात् अचि नखं न भवति । अदोऽनत्रे इति निर्देशात् ङमुडागमो न भवति ।

---

१ । अस्य स्थाने - का भीभिः । १ । ३ । ३२ । इति सूत्रं ।
२ । ईप् शौंडैः । १ । ३ । ३५ । इदमस्य स्थाने सूत्रं ।

अगौः । अनश्वः ॥ इति सामान्यषः ॥

अथ यसः ।

यसो द्विप्रकारः । उत्तरपदार्थप्रधानः पूर्वपदार्थप्रधानश्चेति । तत्रो-त्तरपदार्थप्रधानो यथा-पूर्वं स्नातः पश्चादनुलिप्तः । इति विगृह्य-

४४० । पूर्वकालैकसर्वजरत्पुराणनवकेवलं यश्चैकाश्रये । १ । ३ । ४२ । पूर्वः कालो यस्य स पूर्वकालः । बद्वाचि एक सर्व जरत् पुराण नव केवल इत्येतानि च सुबंतानि सुबंतैः सह यः संज्ञः सो भवति षसश्च एकाश्रये समानाधिकरणे । पूर्ववदन्यत् । स्नातानुलिप्तः । एवं पूर्वं कृष्टः पश्चान्नधिकृतः । एकश्च स पुरुषश्च स एकपुरुषः । सर्वे च ते देवाश्च ते सर्वदेवाः । जरती च सा गौश्च सा जरद्गवी । पुराणश्च स पुरुषश्च स पुराणपुरुषः । नवं च तत् अन्नं च नवान्नं । केवलं च तत् ज्ञानं च केवलज्ञानं । यसंज्ञायां पुंवद्यजातीयदेशीय इति पुंवद्भावः । षसंज्ञायां च षें ऽगुलेरित्यधिकृत्य गोरद्भृदुपीति टः सिद्धः । नीलं च तत् उत्पलं चेति विगृह्य—

३४१ । विशेषणं विशेष्येणेति । १ । ३ । ४८ । अनेकप्रकाराधारतया प्रतीतं वस्तु विशेष्यं । प्रकारांतरेभ्यो व्यावृत्यैकत्र प्रकारे व्यवस्थापनप्रवणं विशेषणं । विशेषणवाचि सुबंतं विशेष्यवाचिना सुबंतेन सह यसो भवति षसश्च एकाश्रये । पूर्वमिवान्यत् । नीलोत्पलं । एवं कृष्णतिलः । कृष्ण-कम्बलः । इत्यादि । कडारश्च स जैमिनिश्च स इति विगृहे-यसे सति नित्यं पूर्वनिपाते प्राप्ते—

४४२ । **ये कडारादय**[1]**:** । १ । ३ । १२६ । यसे कडारादयः पूर्वं वा प्रयोक्तव्याः । इति विकल्पेन पूर्वनिपातः । कडारजैमिनिः । जैमिनिकडारः ॥ पूर्वपदार्थप्रधानो यथा-क्षत्रियश्च स भीरुश्च स इति विगृह्य—

४४३ । **कुत्स्योऽपापा**[2]**णकैः** । १ । ३ । ४५ । पापा-णकवर्जितैः सुबंतैः अर्थात् कुत्स्यैनः सह कुत्स्यवाचि सुबंतं यसो भवति षसश्च एकाश्रये । पूर्ववदन्यत् । क्षत्रियभीरुः । भिक्षुविटः । वैयाकरणखसूचीत्यादि ॥ विशेष्यत्वात् क्षत्रियादेरत्र प्राधान्यं । मयूरश्च स व्यंसकश्चेति विगृहे—

४४४ । **मयूरव्यंसकादयश्च** । १ । ३ । ६३ । मयूर-व्यंसक इत्येवं प्रभृतयः कृतवृत्तिपूर्वनिपाता निपात्यंते । मयूरव्यं-सकः । एवं धातृव्यंसकः । इत्यादि ॥ इति यसः ।

अथ रसः ।

रसस्त्रिविधः । त्वाद्विषयः, द्युपरः, समाहारार्थश्चेति । तत्र त्वाद्विषये यथा-पंचन् कपाल इति स्थिते उभयत्रापि सुप् । पंचसु कपालेषु संस्कृतमिति विगृह्य- संस्कृतेऽर्थे त्वदुत्पत्स्यते तदुत्पत्तेः प्रागेव—

४४५ । **स्यि**[3]**: समाहारे च रश्चाऽख्यौ** । १।३।४४ । स्यिसंज्ञावाचि सुबंतं सुबंतेन सह षसो भवति यश्च एकाश्रये

१ अस्य स्थाने-ये कडाराः । १ । ३ । १०४ । इति सूत्रं ।

२ । अस्य स्थाने-कुत्स्यं कुत्सनैः । १ । ३ ४८ । पापाणके कुत्स्यैः । १ । ३ । ४९ । इति सूत्रद्वयं ।

३ । अस्य स्थाने दिक्संख्यं खौ । १ । ३ । ४५ । संख्यादौ रश्च । १ । ३ । ४७ । इति सूत्रद्वयं ।

यौ च परतः तद्विषये समाहारे चार्थेऽभिधेये रसंज्ञकश्च न चेत्सोमं स्यौ भवति । यः प्राप्तः । तत्रेति वर्तमाने-

४४६ । **संस्कृतं भक्ष्यः**[1] । ३ । २ । १८ । तत्रेति ईप् समर्थात् संस्कृतमित्येतस्मिन्नर्थे यथाविहितं त्यो भवति यत् तत् संकृतं भक्ष्यश्चेद्भवति । प्राग् द्रोरण् । सुप उप् । अणस्तु--

४४७ । **रादुबनपत्ये** । ३ । १ । १०६ । रादनुबंतात् परो बः प्राग्द्रवीयोऽपत्यवर्जितोऽजादिर्हृत् तस्योप् भवति । इत्युप् । ततः स्वादयः । पंचकपालः पुरोडाशः । पंचसु गुरुषु भवः पंचगुरुर्नमस्कारः ॥ द्युपरो यथा-पंचन् गो धन इति स्थिते- पंचन्गोशब्दाभ्यां जस् । धनशब्दात् सुः । पंच गावो धनमस्येति विगृह्य एकार्थमिति त्रिपदो बसः । धनशब्दे द्यौ-पंचन्-शब्दस्य गोशब्देन षसो रसश्च । ततः षेऽगुलेरिति वर्तमाने गोरहृदुपीति टः सांतः । अवादेशः । द्यौ च सविधिः । द्यु च सविधौ भवतीति नित्यः सविधिः । किं द्युः ?

४४८ । **उत्तरपदं द्युः** । ३ । १ । १२७ । से यदुत्तरपदं तत् द्युसंज्ञं भवतीति द्युः । पंचगवधनः । एवं पंच गावः प्रिया अस्येति पंचगवप्रियः । गावो रादिति टः । समाहारे- अनेकस्य कथंचिदेकत्वं समाहारः । तदर्थे यथा-पंचानां पूलानां समाहारः इति विगृह्य समाहारार्थे यसे रसे च सुप उप् । रः समाहारे "स्त्रच पात्राद्यदिति स्त्रीलिंगत्वात् रादिति ङीः । ऐडयोमित्यकारस्य खं

---

१ । अस्य स्थाने संस्कृतं भक्षाः । ३ । २ । ११ । सूत्रं ।

ततः स्वादिः । पंचपूली । दशपूली । षण्णगरी । इत्यादि ॥

इति रसः ।

अथ बसः ।

बसश्चतुर्विधः । पूर्वपदार्थप्रधान उत्तरपदार्थप्रधान उभयपदार्थ प्रधान अन्यपदार्थप्रधानश्चेति। तत्र पूर्वपदार्थप्रधानो यथा-आसन्नाः दशानामिति विगृह्य-अवान्यार्थेऽनेकं बामिति वर्तमाने-

४४६ । संख्येये[1] स्यिनासन्नादूराधिकाध्यर्द्धार्द्धादिडड् च । १ । ३ । ८२ । आसन्न अदूर अधिक अध्यर्द्ध इत्येतानि अर्द्धपूर्वडडंतानि भिसंज्ञानि च सुबंतानि संख्येये वर्तमानेन स्यिसंज्ञावाचिना सह बसो भवति । पूर्ववदन्यत्। स्यि॰ बादबहोरिति डः । डिति टेः खं । ततः स्वादयः । आसन्न-दशाः । एवं अदूरा दशानामिमे अदूरदशाः । अधिकदशाः । इत्यादि । उत्तरपदार्थप्रधाने यथा- द्वि दशन् इति स्थिते-द्विश-ब्दात् कालाध्वन्यभेदे इतीप् । दशन्शब्दाज्जस् । द्वौ वारौ दशेति विगृह्य-

४५० । स्यि[2]: सुज्वार्थे । १ । ३ । ६३ । सुजर्थे वाऽर्थे च स्यिसंज्ञावाचि सुबंतं संख्येये वर्तमानेन स्यिसंज्ञावा-

---

१ अस्य स्थाने-संख्येये संख्यया ऽव्ययासन्नादूरसंख्यं । १ । ३ । ८७ । इति योगो महावृत्तौ ।

२ । अस्य स्थाने नास्त्यपरं सूत्रं परस्सुपर्येव सूत्रे संख्याग्रह-णात् सो विहितः ।

चिना सुबंतेन बसो भवति। सुजर्थो वारः काल इत्युच्यते। स चाभ्यावर्तमानया क्रियया सह संबध्यमानो द्विः संख्यायते। अत्र भवतिक्रियाभ्यावृत्तिः। दशभावो हि द्विरावर्तते। द्व्यर्थस्य पुनः पुनः पाठ आवृत्तिः। पूर्ववदन्यत्। स्यिबादबहोरिति डः। डिति टेः खं च। बसस्याश्रयलिंगत्वात् त्रिष्वपि लिंगेषु नेयाः। द्विदशाः पुमांसः। द्विदशाः स्त्रियः। द्विदशानि वस्त्राणि। विंशतिरित्यर्थः। एवं त्रीन् वारान् दश त्रिदशाः। चतुरो वारान् दश चतुर्दशाः। पंचदशाः। इत्यादि॥ उभयपदार्थप्रधानो यथा-द्विशब्दादौ। त्रिशब्दाज्जस्। द्वौ वा त्रयो वा इति विगृह्य सुज्वार्थे इत्यनेन वार्थे संशये विकल्पे वा बसो भवति। पूर्ववच्छेषं। द्वित्राः स्त्रियः। द्वित्राणि वस्त्राणि। अत्र संशय्यमाना विकल्प्यमाना वा पूर्वोत्तरपदार्थो इत्यर्थः। अन्यपदार्थप्रधानो यथा-सु धर्म इति उभयत्र सुः। शोभनो धर्मो यस्येति विगृह्य-

४५१। [1]एकार्थं। १। ३। ९०। एकः समानोऽर्थो द्रव्यमधिकरणमस्य तदेकार्थं समानाधिकरणमनेकं सुबन्तं भवति अवान्यार्थेऽभिधेये। ततः सुबुप्। गुणास्निस्त्रिबे इति सुश-

---

१। अस्य स्थाने नास्ति किमपि सूत्रं। परं ईब्विशेषणं बहुव्रीहौ। १। ३। १०१। अनेन बहुव्रीहौ ईबंतस्य पूर्वनिपातो ज्ञापयति व्यधिकरणेऽपि बहुव्रीहिर्भवतीति महावृत्तौ। अत्र तु अनेन समानाधिकरणः। अवान्यार्थेनेकं बमित्यनेन व्यधिकरणस्तेन कंठेकाल इत्यादयः सिध्यंति। एवं च ईबंतस्य पूर्वनिपातविधायकं शास्त्रं प्रत्याख्यातं।

न्दस्य पूर्वनिपातः । स्वांगाद्वेक्षिसक्थ्न इति वर्तमाने धर्माद् केव-लादान्निति बसांतोऽन् । भस्येत्याधिकृत्य-एरित्यखं । सुधर्मा । सुधर्माणौ । सुधर्माणः । इत्यादि सुचर्मन्शब्दवत् । एवमनन्त-धर्मेत्यादयः । दर्शनीया भार्या अस्य इति विगृह्य बसः सुबुप् । पुंवादिति वर्तमाने–

४५२ । [1]**स्त्र्युक्तपुंस्कादनूरेकार्थेऽङ्प्रियादौ स्त्रियां** । ४ । ३ । १८८ । उक्तपुंस्काद् परो यः स्त्रीत्यः ऊत्यवर्जितस्तदंतशब्दः स्त्रियां वर्तमाने ङडंतप्रियादिवर्जिते चावेकार्थे समानाधिकरणे पुंवद् पुंलिंगवद् भवति। इति दर्शनीया शब्दस्य पुंभावः । प्रो नपीति वर्तमाने—

४५३ । **स्त्रीगोर्नीचः** । १ । १ । १३ । स्त्रीत्यांतस्य गोशब्दस्य च न्यग्भूतस्य प्रो भवति । इति भार्याशब्दस्य प्रः । दर्शनीयभार्यः । एवं शोभनभार्यः । चित्रा गावो यस्य स चित्रगुः । शबलगुः । इत्यादि । प्राप्तमुदकं यं। ऊढो रथो येन। उपहृता बलिर्यस्यै । उद्धृत ओदनो यस्याः । आसिर्द्वितीयो यस्य । वीराः पुरुषाः यस्मिन् । इति विगृह्य अवान्यार्थेषु बसः । पूर्व-वच्छेषं । प्राप्तोदको ग्रामः । ऊढरथोऽनड्वान् । उपहृतबलि-र्यक्षी । उद्धृतोदना स्थाली । अत्र से कृते टाप् । असिद्वितीयः पुरुषः । वीरपुरुषो ग्रामः । अत्र शेषाद्वेति कप्सांतः । पकारो

---

१ । अस्मिन् सूत्रे पुंवदित्यधिकं । अत्रानु पुंवदिति भिन्नमधि-कारसूत्रं ।

न कपीति विशेषणार्थः । उच्चैर्मुखं यस्य । अस्ति क्षीरं यस्याः इति विगृह्य-

४५४ । झि[1]: । १ । ३ । ६१ । झिसंज्ञं सुबंतं बसो भवति । उच्चैर्मुखः पुरुषः । अस्तिक्षीरा गौः । पश्चात्ताप् । कण्ठे कालो यस्येति विगृह्य- वैयधिकरणेऽपि—

४५५ । [2]अवान्यार्थेऽनेकं । १ । ३ । ८६ । वाविभक्त्यन्तवार्जितस्य अन्यपदार्थस्यार्थेऽनेकं सुबंतं बसंज्ञः षो भवति ।

४५६ । ईपोद्धलः । ४ । ३ । १५५ । अकारांतात् हलंताच्च परस्या ईपोऽनुप् भवति घौ परतः । इत्यनुप् । कण्ठेकालः । उरसिलोमा । धर्मात्केवलादन्निति वचनाद् त्रिपदोऽपि बसो भवति । त्रयः कालाः गोचरा यस्य तत् त्रिकालगोचरं द्रव्यं । एवं लोहिततल्लकप्रियः पुरुषः ॥ इति बसः ।

अथ द्वंद्वः ।

द्वंद्वो द्विप्रकारः । इतरेतरयोगः समाहारश्चेति । तत्र पृथग्भूतानामर्थानामेककालविषयाक्रियाभिसंबंधेनान्योन्यानातिक्रमलक्षणोऽवयवप्रधान इतरेतरयोगः । स एव समुदायप्रधानः समाहारः । तद्यथा- प्लक्षश्च न्यग्रोधश्चेति विगृह्य—

४५७ । चार्थे द्वंद्वः । १ । ३ । ६६ । चकारोर्थश्चार्थस्तस्मिन्नर्थे वर्तमानमनेकं सुबन्तं द्वन्द्वसंज्ञः सो भवति । चत्वार-

---

[1] । अस्य स्थाने वार्तिकं ।

[2] । अस्य स्थाने अन्यपदार्थेऽनेकं बं । १ । ३ । ८६ । इति सूत्रं ।

श्चार्थाः । तत्र क्रमयौगपद्याभ्यामनियतानामर्थानामेकस्मिन् अध्यारोपः समुच्चयः । गामश्वं पुरुषं पशुमहरहर्नयमानो वैवस्वतो न तृप्यति मद्येनेव दुर्मदीति । प्रधानाप्रधानविवक्षायामन्वाचयः भो पटो भिक्षामट यदि पश्यसि गां नयेति यथा । तयोश्चार्थांतरेण प्रयोगादसामर्थ्याच्च वृत्तिर्नास्तीति । इतरेतरयोगे द्वन्द्वः । सुबुप् । द्वंद्वे घिस्वेकमिति वर्तमाने–

४५८ । अल्पाच्तरं । १ । ३ । ११४ । द्वंद्वे से अल्पाच्तरं पदमेकं पूर्वं प्रयोक्तव्यं । इति प्लक्षशब्दस्य पूर्वनिपातः ।

४५९ । द्वंद्व सुवाल्लिंगं । १ । ४ । ११९ । द्वंद्वेऽवयवप्रधानलक्षणे द्योरिव लिंगं भवति । इति पुंलिंगं । द्व्यर्थत्वाद् द्विवचनं । प्लक्षन्यग्रोधौ । एवं बहुत्वविवक्षायां बहुवचनं । धवखदिरपलाशाः । समाहारविवक्षायां पाणी च पादौ चेति विगृह्य–

४६० । [१]प्राणितूर्यांगद्वंद्व एकवत्तुल्यं । १।४।९० । प्राण्यंगानां तूर्यांगानां च तुल्यानां द्वंद्व एकवद् भवति ।

४६१ । [२]द्वंद्वे घिस्वकं । १ । ३ । ११२ । द्वंद्वे से घिसंज्ञ सुसंज्ञं चैकं प्रयोक्तव्यं । इति पाणिशब्दस्य पूर्वप्रयोगः ।

४६२ । स नप् । १ । ४ । १०६ । स एकवद्भावो नपुंसकलिंगो भवति । इति नपुंसकलिंगं । पाणिपादं । एवं दंतोष्ठं ।

---

१ । अस्य स्थाने-प्राणितूर्यसेनांगानां द्वंद्व एकवत् ।१।४।७८ इति ।
२ । अस्य स्थाने-द्वंद्वे सु । १ । ३ । ९८ । इति सूत्रं ।

शंखपटहं । भेरिमृदंगं ॥ कुंडं च वदरं चेति विगृह्य—

४६३ । अप्राणिजातेः । १ । ४ । ६४ । प्राणिवर्जित-द्रव्यजातिवाचिनां द्वंद्वो एकवद्भवति । पूर्ववदन्यत् । कुंडवदरं । धानाशष्कुलि ॥ वदराणि च आमलकानि चेति विगृह्य—

४६४ । [1]फलसेनांगक्षुद्रजीवं बह्वर्थांशं ।१।४।६६। बहवोऽर्था अभिधेया येषां ते बह्वर्थाः। बह्वर्था अंशा यस्य सः। फलांशः सेनांगांशः क्षुद्रजीवश्च बह्वर्थांशो द्वंद्व एकवद्भवति । पूर्ववदन्यत् । वदरामलकं । एवं अश्वाश्च रथाश्च अश्वरथं । यूकाश्च रिक्षाश्च यूकारिक्षं ॥ प्लक्षाश्च न्यग्रोधाश्चेति विगृह्य—

४६५ । [2]वा तरुमृगतृणधान्यपक्षि । १।४।११० । तरुमृगतृणधान्यपक्षिवाचिनो ये बह्वर्थांशाः तेषां बह्वर्थांशानां द्वंद्व एकवद्भवति वा । प्लक्षन्यग्रोधं । प्लक्षन्यग्रोधाः । धव-खदिरं । धवखदिराः । एवं रुरुपृषतं । रुरुपृषताः । कुशकाशं । कुशकाशाः । व्रीहियवं । व्रीहियवाः । हंसचक्रवाकं । हंसचक्र-वाकाः । बह्वर्थांशमिति किं ? प्लक्षन्यग्रोधौ ॥ दधि च पय-श्चेति विगृह्य—

४६६ । न दधिपयआदिः [3]। १ । ४ । १०३ ।

---

१ । अस्य स्थाने नास्ति सूत्रं परं- वा तरुमृगेत्यादिसूत्रे वेति व्यवस्थितविभाषातः कार्यसिद्धिः । २ । अस्य स्थाने वा तरुमृगतृ-णधान्यव्यंजनपश्वश्ववडवपूर्वापराधरोत्तरपाक्षिणः । १ । ४ । ८८ । इति सूत्रं । ३ । अत्र आदीनीति पाठो महावृत्तौ ।

दधिपय इत्येवमादिः कृतद्वंद्वो नैकवद्भवति ॥ पूर्ववच्छेषं। दधिपयसी । दीक्षातपसी । आद्यवसाने ।

इति द्वंद्वः ।

सुवन्तसमुदायेऽपि सविधिर्यथा– त्रिकालगोचरानंतपर्यायोपचितजीवाजीवादिद्रव्यतत्त्वाधिगमसमर्थविज्ञानविशेषसमर्थः। त्रयः काला गोचरा येषां ते त्रिकालगोचराः। इति त्रिपदो बसः। न विद्यतेऽतो येषां ते अनंताः। इत्येषोऽपि बसः। अनंताश्च ते पर्यायाश्च ते अनंतपर्यायाः। इति विशेषणयसः। त्रिकालगोचराश्च ते अनंतपर्यायाश्च ते त्रिकालगोचरानंतपर्यायाः। इत्येषोऽपि यसः। त्रिकालगोचरानंतपर्यायैरुपचितानि त्रिकालगोचरानंतपर्यायोपचितानि। इति साधनं कृतेति षसः। जीव आदिर्येषां तानि जीवादीनि। इति बसः। तानि च तानि द्रव्याणि च तानि जीवादिद्रव्याणि। इति यसः। त्रिकालगोचरानंतपर्यायोपचितानि च तानि जीवादिद्रव्याणि च तानि त्रिकालगोचरानंतपर्यायोपचितजीवादिद्रव्याणि। इति यसः। त्रिकालगोचरानंतपर्यायोपचितजीवादिद्रव्याणां तत्त्वं त्रिकालगोचरानंतपर्यायोपचितजीवादिद्रव्यतत्त्वं। इति षसः। त्रिकालगोचरानंतपर्यायोपचितजीवादिद्रव्यतत्त्वस्याधिगमः त्रिकालगोचरानंतपर्यायोपचितजीवादिद्रव्यतत्त्वाधिगमः। इति तासः। त्रिकालगोचरानंतपर्यायोपचितजीवादिद्रव्यतत्त्वाधिगमस्य समर्थः। त्रिकालगोचरानंतपर्यायोपचितजीवादिद्रव्यतत्त्वाधिगमसमर्थः। इत्येषोऽपि तासः। विज्ञानमेव विशेषः विज्ञानविशेषः। इति यसः। त्रिकालगोच-

रानंतपर्यायोपचितजीवादिद्रव्यतत्त्वाधिगमसमर्थः विज्ञानविशेषो यस्य स भवति त्रिकालगोचरानंतपर्यायोपचितजीवादिद्रव्यतत्त्वाधिगमसमर्थविज्ञानविशेषः। इति बसः। कोऽसौ श्रीवर्द्धमानः। एवं भव्यजनकमलाकरावबोधनकरनयकरस्याद्वाददिनकरप्रभाप्रहतमिथ्यावादांधकारः। भव्याश्च ते जनाश्च ते भव्यजनाः। इति यसः। कमलानां आकराः कमलाकराः। इति तासः। भव्यजनाश्च ते कमलाकराश्च ते भव्यजनकमलाकराः। इति यसः। भव्यजनकमलाकराणां अवबोधनं भव्यजनकमलाकरावबोधनं। इति तासः। भव्यजनकमलाकरावबोधनं कुर्वंतीत्येवं शीलाः भव्यजनकमलाकरावबोधनकराः। इति वागमिङिति षसः। नयाश्च ते कराश्च ते नयकराः। इति यसः। भव्यजनकमलाकरावबोधनकरा नयकराः यस्य स भव्यजनकमलाकरावबोधनकरनयकरः। इति बसः। दिनं करोतीत्येवं शीलः दिनकरः। इति वाक्सः। स्याद्वादश्च स दिनकरश्च स स्याद्वाददिनकरः। इति यसः। भव्यजनकमलाकरावबोधनकरनयकरश्चासौ स्याद्वाददिनकरश्च भव्यजनकमलाकरावबोधनकरनयकरस्याद्वाददिनकरः। इत्यपि यसः। भव्यजनकमलाकरावबोधनकरनयकरस्याद्वाददिनकरस्य प्रभा भव्यजनकमलाकरावबोधनकरनयकरस्याद्वाददिनकरप्रभा। इति तासः। मिथ्यावाद एवांधकारः मिथ्यावादांधकारः। इति यसः। भव्यजनकमलाकरावबोधनकरनयकरस्याद्वाददिनकरप्रभया प्रहतः। भव्यजनकमलाकरावबोधनकरनयकरस्याद्वाददिनकरप्रभाप्रहतः। इति साधनं कृतेति षसः। भव्य-

जनकमलाकरावबोधनकरनयकरस्याद्वाददिनकरप्रभाप्रहतो मिथ्या-वादांधकारो येन स भव्यजनकमलाकरावबोधनकरनयकरस्याद्वाद-दिनकरप्रभाप्रहतमिथ्यावादांधकारः । इति बसः । कोऽसौ। श्रीशांतिनाथः ।

अथ द्वंद्वापवाद एकशेषः ।

वक्रश्च कुटिलश्चेति विग्रहे द्वंद्वसे प्राप्ते तदपवादः—

४६७। [१]समानामेकः । १।३।९७ । समानां तुल्यार्थानां शब्दानां चार्थे वर्तमानानामेक एव प्रयोक्तव्यः । सुबुपमकृत्वैव द्वंद्वापवादोयमेकशेषः क्रियते । इति नात्रावयवसुपो नाशः संभवति । वक्रौ कुटिलौ वा प्रयुज्यमानः शब्दोऽप्रयुज्यमानानां शब्दानां अर्थं ब्रूते । इतरथा चार्थे वृत्त्ययोगादिति द्विवचनबहु-वचनेऽपि भवतः । वक्रौ कुटिलौ वा । वाक्यवद् वक्रकुटिलौ इति न भवति ॥ अक्षश्च शकटाक्षः । अक्षश्च देवनाक्षः । अक्ष-श्च विभीतकाक्षः । इति विगृह्य—

४६८। सुप्यसंख्येयः । १ । ३ । ९८ । सुपि सर्वत्र ये समा एकरूपाः शब्दास्तेषां द्वंद्वे प्राप्ते एक एव प्रयोक्तव्यः संख्येयवाचि शब्दरूपं वर्जयित्वा । अक्षाः । एवं पादश्च पादश्च पादश्च पादाः । विंशतिश्च विंशतिश्च विंशतिश्च विंशतयः । असंख्येय इति किं ? एकश्च एकश्च । द्वौ च द्वौ च ।

---

[१] । स्वाभाविकत्वादभिधानस्यैकशेषानारंभः । १ । १ । १०० । इति योगस्तेन एकशेषविधिरेव न विहितः ।

द्वंद्वोऽप्यनभिधानान्न भवति । स च देवदत्तश्चेति विगृह्य—

४६९ । त्यदादेः । १ । ३ । ९९ । त्यदादिनाऽन्येन च सह त्यदादेर्द्वंद्वे प्राप्ते त्यदादिरेक एव प्रयुज्यते । तौ । अयं च देवदत्तश्च इमौ । त्यदादीनां मिथो यद् यद् परं तद् तदेवैकं प्रयुज्यते । स च त्वं च युवां । त्वं च अहं च आवां ॥

इति सविधिसिद्धिः ।

अथानुब्विधिः ।

क्वचित् सविधौ सत्यपि सुप् श्रूयते । स किं सविधिरसविधिर्वेत्यारेकोपजायते । तन्निवृत्त्यर्थः सुपोऽनुप् प्रक्रम्यते । स्तोक मुक्त । अल्प मुक्त । कृच्छ्र मुक्त । कतिपय मुक्त । दूर आगत । अंतिक आगत । इति स्थिते-स्तोकादेः "स्तोकाल्पेत्यादिना का । दूरादेः "का चारादर्थे" इति का । मुक्तागताभ्यां सुः ।

४७० । [1]स्तोकारादर्थकृच्छ्रं क्तेन । १ । ३ । ३४ । स्तोकाराद् इत्येवमर्था शब्दाः क्तांताः कृच्छ्रशब्दश्च क्तांतेन सह समस्यते षसो भवति । इति षसः । सुपो धुमृदोरिति सुप उपि प्राप्ते-द्यावनुबित्यनुवर्तमाने—

४७१ । कायाः स्तोकादेः । ४ । ३ । १४८ । स्तोकादेः परस्याः कायाः द्यौ परतोऽनुब्भवति । स्तोकान्मुक्तः । अल्पान्मुक्तः । कृच्छ्रान्मुक्तः । कतिपयान्मुक्तः । दूरादागतः ।

---

१ । अस्य स्थाने - स्तोकांतिकदूरार्थकृच्छ्रं क्तेन । १ । ३ । ३४ । इति सूत्रं ।

आंतिकादागतः ॥ ओजस् कृत । अंभस् कृत । तपस् कृत । अजस् कृत । इति स्थिते- ओजसादिभ्यः कर्तारि करणे वा भा। कृतात्सुः । साधनं कृतेति षसः । सुप उपि प्राप्ते-

४७२ । [1]ट ओजस्सहोंभस्तपोंऽजसः । ४ । ३ । १५१ । ओजसादिभ्यः परस्य भैकवचनस्य थावनुब्भवति । ओजसाकृतं । सहसाकृतं । अंभसाकृतं । तपसाकृतं । अंजसाकृतं । तमोंजस इत्येके । तेषां तमसाकृतं ॥ पर पद । आत्मन् पद इति स्थिते--परात्मन्शब्दाभ्यां "तादर्थ्ये" इत्यप् । परस्मै पदं । आत्मने पदं । इति विगृह्य-- अप्प्रकृतितदर्थार्थादिभिरिति तादर्थ्ये षसः । सुप उपि प्राप्ते स्वाविति वर्तमाने—

४७३ । ङेः परा[2]त्मनः । ४ । ३ । १५६ । परात्मन् शब्दाभ्यां परस्य ङेरबेकवचनस्य थावनुब्भवति खौ विषये । परस्मैपदं । आत्मनेपदं । एवं परस्मैभाषः । आत्मनेभाषः । खाविति किं ? परहितं ॥ अरण्य तिलक । त्वच् सार । इति स्थिते- अरण्यादेरीप् । तिलकादेर्वाः । अरण्ये तिलकाः । त्वचि सार इति विगृह्य—

४७४ । खौ । १ । ३ । ३७ । खुविषये ईबंतं सुबंतेन षसो भवति । ततः सुप उपि प्राप्ते—

४७५ । ईपोऽद्धलः । ४ । ३ । १५७ । अकारांतात्

---

१ । अस्य स्थाने - भाया ओजस्सहोंभस्तमोंजसः । ४ । ३ । १२२ । इति सूत्रं । २ । अस्य स्थाने - ङेः खौ पराच्च । ४।३।१२६ । इति सूत्रं ।

हलंताच्च मृदः परस्या ईपः खुविषये धौ अनुप् भवति। अरण्ये-तिलकाः। एवं अरण्येमाषकाः। वनेहरिद्राः। त्वचिसारः। एवं दृषदिमाषकाः॥ स्तूप शाण, दृषद् माषक इति स्थिते- स्तूपादेरीप्। शाणादेः सुः। स्तूपे स्तूपे शाणो दातव्य इत्यादि विगृह्य- स्वाविति षः। सुबुपि प्राप्ते–

४७६। कारे [1]प्राचां हलि। ४। ३। १५८। प्रजानां रक्षार्थं राज्ञे धर्म्यं देयं करः। अदंतात् हलंताच्च मृदः परस्या ईपोऽनुब्भवति हलादौ धौ परतः प्राचां देशे कारविषये। स्तूपे-शाणः। दृषादिमाषकाः। एवं मुकुटकार्षापणः। समिधिमाषकः। ईप्साधनार्थयोर्वृत्तावंतर्भावः। कार इति किं? अभ्याहितपशुः। प्राचां इति किं? यूथपशुः॥ मध्ये गुरुः। अन्ते गुरुः। इति विगृह्य-ईप्शौण्डादिभिरिति षसः। मध्ये गुरुर्यस्य अन्ते गुरुर्यस्येति वा बसः। सुप उपि प्राप्ते–

४७७। मध्यांताद् गुरौ। ४।३।१५६। मध्यांताभ्यां परस्याः ईपोऽनुप् भवति गुरौ धौ परे। मध्येगुरुः। अंतेगुरुः॥ कंठे कालो यस्य। उरसि लोमानि यस्येति विगृह्य-अवान्यार्थेऽनेकं बमिति बसः। ततः सुप उपि प्राप्ते–

४७८। अकामेऽमूर्द्धमस्तकात्स्वांगात्।४।३।१६०। मूर्द्धमस्तकशब्दवर्जितात् स्वांगवाचिनो मृदोऽद्धलंतात् परस्याः

१। अस्य स्थाने कारे प्रायः। ४। ३। १२८। हलि। ४। ३। १२९। इति सूत्रद्वयं।

ईपोऽनुप् भवति अकामे द्यौ परतः । कंठेकालः । उरसिलोमा । एवं बहेगडुः । शिरसिशिखा ॥ अकाम इति किं ? मुखे कामो यस्य स मुखकामः । अमूर्द्धमस्तकादिति किं ? मूर्द्धशिखः । मस्तकशिखः ॥ हस्ते बद्ध इति विगृह्य-ईप्छौंडादिभिरिति षसः । हस्ते बंधो यस्य इति वा बसः । ततः सुप उपि प्राप्ते—

४७६ । [1]बंधे घञि वा । ४ । ३ । १६१ । अद्धलंतात् परस्या ईपः घञंते बध्नातौ द्यौ परतोऽनुब्भति वा । हस्तेबंधः । हस्तबंधः । एवं चक्रेबंधः । चक्रबंधः । घञीति किं ? हस्तबंधनं ॥ स्तम्बे रमः । कर्णे जपः इति स्थिते वागमिङिति नित्यः षसः । ततः उपि प्राप्ते—

४८० । षे कृति बहुलं । ४ । ३ । १६२ । अद्धलंतात् परस्या ईपः षसे कृदंते द्यौ अनुब्भवति बहुलं । तेन क्वचित् प्रवृत्तिः । स्तम्बेरमः । कर्णेजपः । एवं भस्मनिन्हुतं । क्वचिदप्रवृत्तिः । मद्रचरः । ग्रामचरः । क्वचिद्विभाषा । सरसिरुहं । सरोरुहं । क्वचिदन्यदेव । हृदयं स्पृशति इति हृदस्पृक् । पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकन्शकलुदन्नासंश्चाधे इति हृदयस्य हृदादेशः । एवं दिवं स्पृशतीति दिविस्पृक् । इबर्थे ईप् । तदनुप् च । विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदंति । खे शेते इति खशयः । खेशयः । विले शेते इति

---

१ । अस्य कार्यं षे कृति बहुलं । ४ । ३ । १३२ । अत्रस्थबहुलपदसामर्थ्यात् कृतं ।

विलशयः । विलेशयः । वने वासि । वनवासि । ग्रामे वासः ग्रामवासः । इत्यत्रापि वागमिङिति षसः । ततः सुबुपि प्राप्ते-

४८१ । [1]शयवासिवासेऽकालात् । ४ । ३ । १६७ । अकालवाचिनः परस्या ईपः शयवासिवास इत्येतेषु द्युषु वानुब् भवति । अकालादिति किं ? पूर्वाह्णशयः । अद्धल इति किं ? गुहाशयः । भूमिशयः ॥ चौरस्य कुलं । दासस्य भार्या । दास्याः पतिरित्यत्रापि तासे कृते सुबुपि प्राप्ते-

४८२ । तायाः शापे[2] । ४ । ३ । १७१ । शापे आक्रोशे गम्यमाने तायाः द्यावनुब् भवति । आक्रोशः क्षेपो निंदा । अन्यत्र चौरकुलं । दासभार्या । दासिपतिः ॥ दास्याः पुत्रः दासिपुत्रः । वृषल्याः पुत्रः वृषलिपुत्रः । इत्यत्रापि तासे कृते सुबुपि प्राप्ते-

४८३ । पुत्रे वा । ४ । ३ । १७२ । पुत्रशब्दे द्यौ परतः ताया वानुब् भवति शापे गम्यमाने । अन्यत्र दासिपुत्रः । वृषलिपुत्रः ॥ वाचो युक्तिः । दिशो दंडः । पश्यतो हर इत्यत्रापि तासे सति ततः उपि प्राप्ते—

४८४ । [3]वाग्दिक्पश्यतो युक्तिदंडहरे ।४।३।१७३। वागादिभ्यः परस्याः तायाः यथासंख्यं युक्त्यादिषु द्युषु अनुब् भवति । होतुः पुत्रः । होतुरंतेवासी । पितुः पुत्रः । पितुरंते-

---

१ । अस्यापि कार्यं बाहुल्यात् । २ । अत्र "आक्रोश" इति महावृत्तौ । ३ । अस्य स्थाने वार्तिकं ।

वासी । इत्यत्रापि तासे कृते उपि प्राप्ते—

४८५ । [१]ऋतां विद्यायोनिसंबंधात् । ४।३।१७६ । ऋकारांतानां विद्याकृतात् योनिकृताच्च संबंधात् प्रवर्तमानानां संबंधिन्यास्ताया: सामर्थ्यात् विद्यायोनिकृतसंबंधनिमित्ते एव द्याव नुप् भवति । अन्यत्र भर्तृगृहं । भर्तृशिष्यः ॥ होतुः स्वसा । होतृ-स्वसा । दुहितुः पतिः । दुहितृपतिः । इत्यत्रापि तासे उपि प्राप्ते—

४८६ । वा स्वसृपत्योः ।४।३। १७७ । विद्यायोनिसंबं-धाद्धेतौ प्रवर्तमानानां ऋकारांतानां संबंधिन्यास्तायाः स्वसृपति-शब्दयोर्योनिसंबंधनिमित्तयोर्द्यौ अनुब्भवति वा ॥ मातुः स्वसा । पितुः स्वसेत्यत्रापि उपि प्राप्ते-तेनैव विकल्पेनानुपि यदा उप् तदा—

४८७ । मातृपितुः स्वसुः । ५ । ४ । ६६ । मातृपि-तृभ्यां परस्य स्वसृशब्दस्य षत्वं भवति । इति षत्वं । यदा तु अनुप् तदा वानुग्विति विभाषया षत्वं । मातृष्वसा । मातुःष्वसा । मातुःस्वसा । पितृष्वसा । पितुःष्वसा । पितुःस्वसा ॥ माता च पिता च इति विगृह्य- द्वंद्वे से सत्युपि च कृते—

४८८ । [२]ङान् द्वंद्वे । ४ । ३ । १७८ । विद्यायोनिसंबं-धात् प्रवर्तमानानां ऋकारांतानां यो द्वंद्वस्तस्मिन् पूर्वपदस्य ङा-नादेशो भवति द्यौ । ङकारोऽन्त्यविध्यर्थः । नकारो रंतनिरासार्थः । मातापितरौ । एवं होता च पोता च होतापोतारौ । नेष्टा च उद्गाता च नेष्टोद्गातारौ । होतापोतारौ च नेष्टोद्गातारौ च होता

---

१ । एकवचनमत्रमहावृत्तौ । २ । अस्य स्थाने-आनङ् द्वंद्वे । ४ । ३ । १३८ । इति सूत्रं ।

पोतानेष्टोद्गातारः ।

४८९ । [1]**द्वंद्वे घिस्वेकं** । १ । ३ । ११२ । द्वंद्वे स घिसंज्ञं सुसंज्ञं चैकं पूर्वं प्रयोक्तव्यं । इत्यत्रैकग्रहणात् बहूनामपि द्वंद्वो भवति । होता च पोता च नेष्टा च उद्गाता च होतृपातृनेष्टोद्गातारः । होता च पोता च नेष्टोद्गातारौ च होतृपोतानेष्टोद्गातारः । द्युरंत्यमिति विवक्षायां आकारः ।

४९० । **अग्नेंद्रादिषु देवतानां** । ४।३।१८० । अग्नेन्द्र इत्येवमादिषु देवतावाचिषु द्वंद्वेषु ङान् भवति । अग्निश्च इंद्रश्च अग्नेंद्रौ । अग्नाविष्णू । इन्द्रासोमौ। इन्द्रावरुणौ। सूर्याचंद्रमसौ॥ एतेष्विति किं ? सूर्यचन्द्रौ ।

४९१ । **षोमवरुणेऽग्नेरीः** । ४ । ३ । १८१ । अग्नि-शब्दस्य सोमवरुणयोर्द्वयोर्देवताद्वंद्वे ईकारो भवति । अग्निश्च सोमश्च अग्नीषोमौ । अग्निश्च वरुणश्च अग्नीवरुणौ । षोम इत्यत एव निपातनाद् अग्नेरीत्वे सोमस्य षत्वं ।

४९२ । **नैप्याविष्णिवद्रे** । ४ । ३ । १८२ । अग्नेरैपि विषये विष्णिवद्रवर्जिते द्वौ ङानीकारश्च न भवति । अग्निश्च मरुच्च देवते अस्य आग्निमारुतं कर्म । अग्निश्च वरुणश्च देवते-ऽस्याः आग्निवारुणी अनड्वाही । ऐपीति किं ? अग्नीमारुतौ । अग्नीवरुणौ । अविष्णिवद्रे इति किं? आग्नावैष्णवं । आग्नेन्द्रं ।

इति श्रीजैनेंद्रप्रक्रियावतारे तृतीयं सवृत्तं समाप्तं ॥ ३ ॥

---

१ । अस्य स्थाने - द्वंद्वे सु । १ । ३ । ९८ । इति ।

अथ हृद्विधिः ।

श्रीवीरं सन्मतिं शंभुं सिद्धं बुद्धं जितेंद्रियं ।
वंद्यं चतुर्मुखं विष्णुं वंदेहं लोकमंगलं ॥ १ ॥

अथ सुबंतपदाश्रितत्वात् सुबंते त्हद्विकल्पः संक्षेपेणोपक्रम्यते । त्हतो द्विविधाः । मृदर्थादर्थांतरवृत्तयः स्वार्थिकाश्चेति । तत्राद्याः द्विप्रकाराः । अनेकार्थाः एकार्थाश्चेति । अनेकार्थाः अणादयः । एकार्था इञादयः । स्वार्थिका अपि द्विप्रकाराः । प्रकृत्यर्थविशेषप्रकाशिनस्तावन्मात्रवृत्तयश्चेति । तत्राद्याः द्विप्रकाराः । मृदर्थप्रधानाः सुबर्थप्रधानाश्चेति । मृदर्थप्रधानाश्च ठडादयः । सुबर्थप्रधाना ह्यादयः । तावन्मात्रवृत्तयोऽपि पूर्ववद् द्विप्रकाराः । तत्र मृदर्थप्रधानाष्टचणादयः । सुबर्थप्रधानास्तसादयः । प्रकृत्यर्थ एव ये भवंति ते स्वार्थिकाः ॥ उपगोरपत्यमिति विगृह्य-अपत्यार्थविवक्षायां वाद्यात् समर्थादिति प्राग्द्रेरणित्येवमादिके चानुवर्तमाने—

४६३ । **तस्यापत्यं** । ३ । १ । १११ । तस्येति तासमर्थात् सूत्रे प्रथममुक्तादपत्यमित्येतास्मिन्नर्थे यथाविहितं अणादयस्त्या भवंति वा । यो यतो विहितः स ततो भवतीत्यर्थः । वेत्यधिकाराद् वाक्यमपि साधु भवति । तत्र सामान्यचोदनाश्च विशे-

षेष्ववतिष्ठंते इति तस्य विशेषेभ्यस्तांतेभ्यो यथाविहितं त्यो भवति। कोऽसौ त्यः। "त्यः" परः "ह्रतः" इत्यधिकृत्य—

४६४। **प्रागद्रोरण्**। ३। १। ६२। द्रोः प्राग् येऽर्थाः वक्ष्यंते तेषु त्यः परो ह्रत्संज्ञकः अणित्यधिकृतो वोदितव्यः। तेनोक्तार्थत्वात् अपत्यशब्दस्य निवृत्तिः। णकार इत्संज्ञः ञ्णित्यच इति ह्रत्यक्ष्वादेरिति विशेषणार्थः। कृद्ध्रत्साः इति मृत्संज्ञा। सुपो धुमृदोरिति सुबुप्। यत्ये तदादिगुरिति गुसंज्ञायां-गोः मृजेरैबि-त्याधिकृत्य-ञ्णित्यच इत्यनुवर्तमाने–

४६५। [1]**ह्रत्यक्ष्वादेः**। ५।२।५। गोरक्ष्वादेरचो ह्रति ञ्णिति परत ऐप् भवति। स्वासन्न इत्युकारस्य औकारः। स्वादावधे इति पदत्वे प्राप्ते-याचि भ इति भत्वात्-भस्येति ह्रतीति च प्रस्तुत्य–

४६६। **कद्रूवोरोऽस्वयंभुव**[2]:। ४।४। १४७। कद्रू-शब्दस्य उवर्णांतस्य च गोर्भस्य ओकारादेशो भवति ह्रति परतः स्वयंभुशब्दं वर्जयित्वा। इत्युकारस्यौकारः। अवादेशः। ततः स्त्रादिः। औपगवः। एवं कापटवः। स्त्रियामिन्ट्टिठ्ढाणञित्या-दिना ङी भवति। औपगवी। ह्रद्विवक्षायां–

४६७। **पौत्रादि वृद्धं**। ३। १। ११२। परमप्रकृते-रपत्यवतो यदपत्यं पौत्रादि तत् वृद्धसंज्ञं भवति। उपगोरपत्यं

१। अस्य स्थाने-ह्रत्यचामादः। ५। २। ५। इति सूत्रं।
२। कद्रूशब्दस्याप्युवर्णांतत्वेन सिद्धे पृथक्वचनं ढ खापवादार्थं। कद्रूशब्दश्च उश्च कद्र्वौ तयोः।

वृद्धमित्येवं विगृह्य-पौत्राद्यपत्यमापरमप्रकृतेः पूर्वेषामपत्यं भवतीति तत्संबंधविवक्षायामनंतरादिभ्योऽपि त्यः प्राप्तः स आद्यान्मूल-प्रकृतेरेवेति नियमान्निवर्तते । पुनरनेन त्यप्रसंगे एक इत्यनेन नियम्यते ततः उपगोरेव अणेव भवति । औपगवः । एवं काप-टवः । युवापत्यविवक्षायां–

४९८ । [1]सति वंश्ये युवाऽस्त्री । ३ । १ । ११५ । वंशे भवो वंश्यः पित्रादिरात्मनः कारणं । पौत्रादेर्यदपत्यं चतुर्था-दिकं स्त्रीवर्जितं सति जीवति वंश्ये तद् युवसंज्ञं भवति । उपगो-रपत्यं युवेति विगृहे–

४९९ । **ततो यूनि । ३ । १ ।११४।** ततो वृद्धत्यांतात् यून्यपत्ये विवक्षिते सत्याद्यात् वृद्धप्रकृतेरेक एव च त्यो भवति । त्ययुवापि नियमः । ततो न परमानंतरयुवप्रकृतेर्भवति । औपग-वशब्दादकारांतात् तस्यापत्यमिति प्रस्तुत्य—

५०० । [2]इञतः । ३ । १ । ११६ । अकारांतान्मृदस्ता-समर्थात् अपत्येऽर्थे इञ् त्यो भवति । अणोपवादः । अकार इत्यर्थः । पूर्ववदन्यत् । औपगविर्युवा । दक्षस्यापत्यमिति पूर्वव-दिञ् । एरित्यखं । दाक्षिः । स्त्रियां–

५०१ । [3]नुरितः । ३ । १ । ७५ । नृजातिवाचिनः इतः स्त्रियां ङीर्भवति । दाक्षी । दक्षस्यापत्यं वृद्धामिति वृद्धापत्यवि-

१ । **अस्य स्थाने--जीवति तु वंश्ये युवाऽस्त्री ।३।१।८१। इति सूत्रं।**
२ । **अस्य स्थाने--अद्वाह्वादेरिञ् । ३ । १ । ८५ । इति महावृत्तौ,**
३ । **अस्य स्थाने - इतो मनुष्यजातेः । ३।१।५५ । इति महावृत्तौ ।**

वक्षायां पूर्ववद् प्रकृतित्यनियमान्मूलप्रकृतेरेव दक्षशब्दादिञेव भवति । दाक्षिः । दक्षस्यापत्यं युवेति यून्यपत्ये विवक्षिते ततो यूनीति नियमान्नडादिभ्यः फण् इत्यधिकृत्य–

५०२ । यञिञोः । ३ । १ । १३२ । यजंतादिञंताच्च वृद्धे वर्तमानाद्यून्यपत्ये फण् भवति । णकार ऐवर्थः ।

५०३ । फढ[१]खछघ आयनेयीनीयियः । ४ । १।२ । फढखछघ इत्येतेषां वर्णानां गोनिमित्तभूतानां यथासंख्यं आयन् एय ईन् ईय् इय् इत्येते आदेशा भवंति । इति फस्यायन् । एरित्यखं । णत्वं । दाक्षायणः । गर्गस्यापत्यमिति विगृह्य पूर्ववदिञादिः । गार्गिः । गर्गस्यापत्यं वृद्धमिति विगृह्य–

५०४ । गर्गादेर्यञ् । ३ । १ । १३३ । गर्गादिभ्यो वृद्धेऽपत्ये विवक्षिते यञ् भवति । पूर्ववच्छेषं ॥ गार्ग्यः । गार्ग्यौ । बहुषु-बहुष्वस्त्रियामिति वर्तमाने–

५०५ । [२]यञञोऽगोपवनादेः । १ । ४ । १५८ । यञंतस्य इञंतस्य च बहुत्वे गोत्रे वर्तमानस्य यस्त्यस्तस्यास्त्रियामुब्भवति गोपनादिभ्यो विहितं वर्जयित्वा । गर्गाः । स्त्रियां–

५०६ । यञोऽषावटात् । ३ । १ । १६ । यञंतात् स्त्रियां वर्तमानात् ङीर्भवति न चेत् स यञ् षकारादवटशब्दाच्च परो भवति । इति ए ङ्यामिति खं ।

---

१ । अस्य स्थाने आयनेयीनीयियः फढखछघां त्यादीनां ।५।१। २ । इति । २ । अस्य स्थाने इञो बह्वचः प्राच्यभरतेषु । १ । ४ । १३७ । न गोपवनादेः । १ । ४ । १३८ । इति सूत्रद्वयं ।

५०७ ॥ **हलो हृतः । ४ । ४ । १५४ ।** हलः परस्य हल्संबंधिनो यकारस्य खं भवति ङ्यां परतः । गार्गी । गार्ग्यौ । गार्ग्यः । इत्यादि ।

५०८ ॥ **फट् । ३ । १ । २० ।** यञंतान्मृदः स्त्रियां वर्तमानात् फट् त्यो भवति । टकारः स्त्रियां ङ्यर्थः । फस्यायन्,, इञटिड्ढाणञित्यादिना ङी, णत्वं । गार्ग्यायणी । गार्ग्यायण्यौ । गार्ग्यायण्यः । इत्यादि । युवापत्यविवक्षायां–गर्गस्यापत्यं युवेति विगृह्य "यञिञः"इति गार्ग्यशब्दात् फण्। पूर्ववच्छेषं । गार्ग्यायणः । करीषस्येव गंधो यस्येति बसे–इवार्थस्य वृत्तावंतर्भावादिवशब्दस्याप्रयोगः । "सुपूत्युत्सुरभेर्गुणे गंधस्येः"इति वर्तमाने—

५०९ ॥ **वोपमानात् । ४ । २ । १७० ।** उपमानवाचिनः परस्य गंधस्य बसे सांत इकारादेशो भवति वा । तदा–करीषगंधेरपत्यमिति विगृह्य– तस्यापत्यमित्यण् । कारीषगंधः । एवं कौमुदगंधः । यदा न सांतस्तदा–करीषगंधस्यापत्यं "इञतः"इतीञ् । कारीषगंधिः । एवं–कौमुदगंधिः । स्त्रियां–

५१० ॥ **ष्योऽक्षु रूपांत्ययोर्गोत्रेऽनार्षेऽणिञोः । ३ । १ । ८४ ।** अक्षु मध्ये रूपांत्यौ गोत्रेऽनार्षे विहितौ यावणिञौ तदंतस्य वृद्धस्त्रियां वर्तमानस्य ष्य इत्ययमादेशो भवति । पकारः "ष्यस्येश वेऽद्रतके मातरि"इति विशेषणार्थः । ततः टाप् । कारीषगंध्या । एवं–कौमुदगंध्या ॥ कुसुंभेन रक्तमिति विगृह्य—

५११ ॥ **तेन रक्तं रागात् । ३ । २ । १ ।** रज्यतेऽनेन स रागः । कुसुंभादिद्रव्यविशेषः । शुक्लस्य वर्णांतरापादनमिह रंजार्थः । तेनेति भासमर्थात् रागवाचिनो रक्तमित्येतस्मिन्नर्थे यथावि-

हितं त्यो भवति । इत्यण् । पूर्ववच्छेषं । कौसुंभः पटः । कौसुंभं वस्त्रं । कौसुंभी शाटी । एवं-काषायः । हारिद्रः ॥ लाक्षया रक्तमिति विगृह्य—

५१२ ॥ **लाक्षारोचनाट्ठण्** । ३ । २ । २ । लाक्षारोचनाभ्यां भासमर्थाभ्यां रक्तेऽर्थे ठण् भवति ।"इकु ठः" इति ठस्येकादेशः । लाक्षिकः । एवं-रौचनिकः । पूर्ववत् त्रिषु लिंगेषु योज्यं । शकलेन रक्तमिति विगृहे-

५१३ ॥ **शकलकर्दमाद्वा** । ३ । २ । ३ । शकलकर्दम इत्येताभ्यां भासमर्थाभ्यां रक्तार्थे ठण् वा भवति । पक्षेऽण् । पूर्ववदन्यत् ॥ शाकलिकः, शाकलः । एवं-कार्दमिकः, कार्दमः ॥ गुरूदयेन पुष्येण युक्तः संवत्सरः इति विगृह्य-तेनेति वर्तमाने-

५१४ ॥ **गुरूदयाद् भाद् युक्तोऽब्दः** । ३ । २ । ५ । गुरुर्बृहस्पतिरुदेति यस्मिन् नक्षत्रे तद्वाचिनो भासमर्थात् युक्त इत्येतस्मिन्नर्थे यथाविहितं त्यो भवति योऽसौ युक्तः स चेदब्दः संवत्सरः स्यात् । इत्यण् । ए्रित्यखं । "तैषपौषे मे" इति यखं । पौषः संवत्सरः, पौषं वर्षं । एवं-फाल्गुनः संवत्सरः, फाल्गुनं वर्षं ॥ चंद्रोपेतेन पुष्येण युक्तः काल इति विगृह्य—

५१५ ॥ **चंद्रोपेतात्कालः** । ३ । २ । ६ । यस्य नक्षत्रस्य क्षेत्रे चंद्रो वर्तते तन्नक्षत्रं चंद्रोपेतं । तद्वाचिनो भासमर्थात् युक्त इत्येतस्मिन्नर्थे यथाविहितं त्यो भवति योऽसौ युक्तः स चेत् कालो भवति । पूर्ववदन्यत् । पौषः कालः, पौषोऽहोरात्रः, पौषमहः, पौषी रात्रिः । एवं-माघः कालः, माघोऽहोरात्रः, माघमहः, माघी रात्रिः ॥ पौषी पौर्णमासी अस्य मासस्य इति विगृहे-

५१६ ॥ **सास्य पौर्णमासीति त्यो ३ । २ । २३** । सेति वासमर्थादस्येति तार्थे यथाविहितं त्यो भवति यद् तद् वांतं सा चेत् पौर्णमासी । इतिशब्दो विवक्षार्थस्तेन मासेऽर्द्धमासे संवत्सरे सवत्सरपर्वाणि वा त्यः । त्यांतेन चेत्संज्ञा गम्यते । पूर्ववच्छेषं । पौषो मासः, पौषोऽर्द्धमासः, पौषः संवत्सरः । एवं—माघः ॥ अर्हन् देवताऽस्येति विगृहे—सास्येति वर्तमाने—

५१७ ॥ **देवता । ३ । २ । २६** । सेति वासमर्थादस्येति तार्थे यथाविहितं त्यो भवति यद् तद् वांतं सा चेत् देवता भवति । पूर्ववदन्यत् । आर्हतः । एवं—जैनः । ऐंद्रं हविः ॥ अग्निश्च विष्णुश्च देवताऽस्येति विगृह्य द्वंद्वे ङानि च कृते देवतार्थेऽण् । "इर्त्सिधुभगे द्वयोः" इति वर्तमाने—

५१८ ॥ **देवतानां ङानि ५ । २ । २६** । देवतानां द्वयोः पदयोः ङानि विषये ऐब् भवति । आग्नावैष्णवं । एवं—आग्निमारुतं आग्निवारुणं । "नैप्यविष्णिवंद्वे" इति ङानीत्वयोर्निषेधः । अग्नेंद्रौ देवतेऽस्येति विगृह्य—अण् ।

५१९ ॥ **नेंद्रवरुणस्यात्** । ५ । २ । २७ । अवर्णांतात् देवतार्थात् परस्य इंद्रशब्दस्य वरुणस्य चाचामादेरच ऐप् न भवति । आग्नेंद्रः । एवं—ऐंद्रावरुणः । त्रिलिंगेष्वपि योज्यं ॥ महेंद्रो देवतास्येति विग्रहे—

५२० ॥ **महेन्द्राद् घाण् च । ३ । २ । ३१** । महेन्द्रशब्दाद्देवतार्थे घ अण् इत्येतौ त्यौ भवतः चकाराच्छश्च । घस्य इय्, छस्य ईय् । महेंद्रियः । माहेंद्रः । महेंद्रीयः ॥ को देवताऽस्येति विग्रहे—

५२१ ॥ **कसोमाट्ट्यण् । ३ । २ । ३२** । कसोमाभ्यां दे-

वताऽर्थे अण् त्यो भवति । टकारो ङ्यर्थः । णकार ऐबर्थः । एः स्वात्परत्वादैप् । कायं हविः । एवं—सौम्यं । स्त्रियां टित्वान्ङी । कायी दिक् । सौमी । "हलो हतः" इति यखं ॥ वृकाणां समूह इति विग्रहे—

५२२ ॥ तस्य समूहः ३ । २ । ३८ । तस्येति तासमर्थात् समूह इत्येतस्मिन्नर्थे यथाविहितं त्यो भवति । इत्यण् । पूर्ववच्छेषं । वार्कं । एवं काकं । बार्हस्पत्यं । वानस्पत्यं । "यमदित्यदित्यादित्य-पतिद्योण्योऽणपवादे चास्वे" इति ण्यः । आग्नेयः—कल्यग्नेर्ढणिति ढण्, एय् । हस्तिनां समूह इति विग्रहे—

५२३ ॥ हस्तिकवच्यचिताच्च ठण् । ३ । २ । ४३ । हस्तिन् कवचिन् शब्दाभ्यां अचित्तवाचिभ्यः केदारशब्दाच्च तस्य समूह इत्यस्मिन् विषये ठण् भवति । ठस्य इक् । भस्याऽनोऽखं । "ङिति टेः" हतीति च वर्तमाने—

५२४ ॥ नः ४ । ४ । १४२ । नकारांतस्य गोभस्य टेः खं भवति हति परतः । हास्तिकं । एवं—कवचिनां समूहः काव-चिकं । अचित्तेभ्यः—अपूपानां समूहः—आपूपिकं । शाष्कुलिकं । केदाराणां समूहः—कैदारिकं ।

५२५ ॥ धेनोरनञः ३ । २ । ४४ । धेनुशब्दात् समूहेऽर्थे ठण् भवति न चेत्स धेनुशब्दो नञः परो भवति ।

५२६ ॥ दोसिसुसुगशश्वदकस्मात्तः कः ५ । २ । ६३ । दोस्शब्दात् इसुस् इत्येवमंताद् उगंताच्च शश्वद् अकस्माद् शब्द-वर्जितात् तकारांताच्च परस्य ठस्य ककारादेशो भवति । धैनुकं । अनञ इति किं ? आधेनवं ॥ निमित्तं वेत्तीति विगृह्य—

५२७ ॥ तद् वेत्त्यधीते । ३ । २ । ७२ । तदिति इप्-समर्थात् वेत्तीत्यस्मिन् अधीते इत्येतस्मिंश्चार्थे यथाविहितं त्यो भवति । इत्यण् । नैमित्तः । एवं–मौहूर्तः । व्याकरणं वेत्तीति विगृह्य–तेनैवाणि–आदैरैपि प्राप्ते–

५२८ ॥ पदे य्व ऐयौव् । ५ । २ । ९ । पदे परतोऽचामादेरचः स्थाने निष्पन्नयोर्यकारवकारयोरैय् औव् इत्येतावादेशौ भवतो ञ्णिति परतः । वैयाकरणः । एवं–सौवागमः । सैद्धांतः । छान्दसः ॥ उदुम्बरा अस्मिन् देशे संतीति विगृह्य–

५२९ ॥ सोऽत्रास्तीति देशः खौ ३ । २ । ८४ । स इति वासमर्थात् अत्रेतीत्यर्थे यथाविहितं त्यो भवति, योऽसौ वांतः स चेदस्ति, यः ईपानिर्दिष्टः स चेद्देशः, समुदायेन चेत्संज्ञा गम्यते । औदुंबरं राष्ट्रं । एवं–बाल्वजं, पार्वतं ॥ कुशाम्बेन निर्वृत्तेति विगृहे—

५३० ॥ तेन निर्वृत्तः ३ । २ । ८५ । तेनेति भा-समर्थात् निर्वृत्त इत्येतस्मिन्नर्थे यथाविहितं त्यो भवति देशः खौ । इत्यण् । कौशाम्बी नगरी । कर्कंदेन निर्वृत्ता काकंदी । मकंदेन निर्वृत्ता माकंदी । सगरैः सागरः ॥ अर्जुनावो निवासः इति विगृह्य—

५३१ ॥ तस्य निवासादूरभवौ ३ । २ । ८६ । तस्येति तासमर्थान्निवास इत्यस्मिन् अदूरभव इत्यस्मिंश्चार्थे यथाविहितं त्यो भवति । इत्यण् । आर्जुनावं नगरं । उदिष्टस्य निवास औदिष्टः । सकलाया निवासः साकलं नगरं । अदूरे भवोऽदूरभवः ।

तत्र-वराणसाया अदूरभवा वाराणसी नगरी । विदिशाया अदूरभवं वैदिशं नगरं ॥ चक्षुषा गृह्यते इति विगृह्य-

५३२ ॥ **शेषे** । ३ । २ । ९९ । अपत्यादिभ्यश्चतुरर्थान्तेभ्योऽन्यः शेषः । तस्मिन् शेषेऽर्थे विशेषे यथाविहितं त्यो भवति । इत्यण् । चाक्षुषं रूपं । एवं-श्रावणः शब्दः, रासनो रसः, दार्शनं, स्पार्शनं च द्रव्यं, दृषदि पिष्टा दार्षदाः सक्तवः ॥ सर्वस्मिन् लोके जातः कृतो भवो वेति विगृहे—

५३३ । **लोकद्व्यध्यात्मादिभ्यष्ठण्** ३ । २ । १६८ । लोकयोरध्यात्मादिभ्यश्च शेषे ठण् भवति । ठस्य इकः ।

५३४ ॥ **अनुशतिकादीनां** ५ । २ । २४ । अनुशतिक इत्येवमादीनां गूनामवयवयोः पूर्वोत्तरपदयोरचामादेरच ऐप्भवति इति ञ्णिति परतः । सार्वलौकिकः । पारलौकिकः । ऐहलौकिकः ॥ आत्मन्यधीति विगृहे-सुबर्थे हसे "अनः" इत्यः सांतः । "नः" इति टेः खे कृते--अध्यात्मं भवः-आध्यात्मिकः । एवं—आधिदैविकः । आधिभौतिकः ॥ समाने भव इति विगृह्य—

५३५ ॥ **समानात्तदादेश्च** ३ । २। १६९ । ठण् । पूर्ववन्यत् । सामानिकः । एवं-सामानग्रामिकः । एवं-सामानदेशिकः ॥ श्रुघ्ने जात इति विगृह्य—

५३६ । **तत्र जातः** ३ । ३ । १ । तत्रेति ईप्समर्थात् जात इत्यस्मिन्नर्थे यथाविहितमणादयस्त्या भवंति । स्वजन्मन्यनपेक्षितपरव्यापारः कर्तृभूतो जातः । प्राग् द्रोरण्—श्रौघ्नः । एवं माथुरः ॥ उत्से जातः ।

५३७ । **उत्सादेश्चाञ्** । ३ । १ । ९७ । औत्सः । एवं औदवाहः ॥ राष्ट्रे जातः—

५३८ ॥ राष्ट्रदूरोत्तराद् घेत्याहञ् ३। २। १००।
राष्ट्र दूर उत्तर इत्येतेभ्यो यथाऽसंख्यं घ एत्य आहञ् इत्येते स्या भवंति। इति घस्तस्य इय्—राष्ट्रियः। एवं—दूरे जातः—दूरेत्यः। उत्तरास्मिन् जातः—औत्तराहः॥ स्रुघ्ने कृतः लब्धः क्रीतः संभूतो वेति विगृह्य—तत्रेति वर्तमाने—

५३९ ॥ कृतलब्धक्रीतसंभूताः ३। ३। १७। तत्रेति ईप्समर्थात् कृतादिष्वर्थेषु यथाविहितमणादयस्त्याः भवंति। स्वभावनिष्पन्नावपेक्षितपरव्यापारः कर्मभूतो भावः कृतः, सामान्येन प्राप्तं लब्धं, मूल्येन संप्राप्तं क्रीतं, संभूतिः संभावना, अवक्लृप्तः तत्क्रियाकर्तृभूतः संभूतः। पूर्ववदणादयः। स्रौघ्नः, औत्सः, राष्ट्रियः, दूरेत्यः, औत्तराहः॥ कत्रौ जातः इति विग्रहे—

५४० ॥ कत्र्यादेः। ३। २। १०४। एभ्यो ढकञ् स्याच्छेषे। ढस्य एय्—कात्रेयकः। एवं—नद्यादेर्ढण्—नादेयः॥ स्रुघ्ने भवः इति विगृह्य—तत्रेति वर्तमाने—

५४१ ॥ भवः। ३। ३। ३१। तत्रेतीप्समर्थात् भव इत्यस्मिन्नर्थे यथाविहितमणादयस्त्याः भवंति। सत्तार्थो भवार्थः। पूर्ववच्छेषं। स्रौघ्नः, औत्सः, राष्ट्रियः, कात्रेयकः, नादेयः॥ दिशि भव इति विगृह्य—

५४२ ॥ दिगादेर्यः ३। ३। ३२। दिगित्येवमादिभ्यः ईप्समर्थेभ्यः शेषे भवार्थे यो भवति। दिश्यः। एवं-वर्गे भवः वर्ग्यः।

५४३ ॥ देहांगात्। ३। ३। ३३। देहावयवेभ्य ईप्समर्थेभ्यः शेषे भवार्थे यो भवति। अणादेरपवादः। कंठे भवः क-

ठञ्यः । एवं—औष्ठ्यः, दंत्यः, पाण्यः, पद्यः ॥ अंतरगारे भव इति विगृह्य-हादिति वर्तमाने-

५४४ ॥ अंतःपूर्वाट्ठञ् ३ । ३ । ४० । हसादंतःशब्द-पूर्वात् भवार्थे ठञ् भवति। अगारस्यांतः अंतरगारं। "पारेमध्येऽन्त-स्तया"इति हसः । पूर्ववदन्यत् । आंतरगारिकः। एवं-आंतर्गेहिकः, आंतःपुरिकः ॥ श्रुघ्नादागत इति विगृह्य-

५४५ ॥ तत आगतः । ३ । ३ । ५६ । तत इति कास-मर्थात् आगत इत्यस्मिन्नर्थे यथाविहितं त्यो भवति । शेषं पूर्ववत् । श्रौघ्नः, राष्ट्रियः, नादेयः ॥ शुल्कशालाया आगतमिति विगृह्य-ठणिति वर्तमाने-

५४६ ॥ आयस्थानात् । ३ । ३ । ६० । स्वामिग्राह्यो भाग आयस्तस्योत्पत्तिस्थानवाचिनः कासमर्थात् आगतेऽर्थे ठण् भवति । पूर्ववच्छेषं । शौल्कशालिकं । एवं-आपणिकं । आकरिकं । गौल्मिकं ॥ श्रुघ्नो निवासोऽस्येति विगृह्य-

५४७ ॥ सोऽस्य निवासः । ३ । ३ । ७४ । स इति बासमर्थात् निवास इत्यस्मिन्नर्थे यथाविहितं त्यो भवति । श्रौघ्नः । राष्ट्रियः । नादेयः । भद्रबाहुणा प्रोक्तमिति विगृह्य-

५४८ ॥ तेन प्रोक्तं । ३ । ३ । ८५ । तेनेति भासमर्थात् प्रोक्तमित्यस्मिन्नर्थे यथाविहितं त्यो भवति । प्रकर्षेण व्याख्यातम-ध्यापितं वा प्रोक्तं । भाद्रबाहवाण्युत्तराध्ययनानि ॥ पाणिनिना प्रो-क्तमिति विगृह्य—

५४९ ॥ दोश्छः । ३ । २ । १२५ । दुसंज्ञकाच्छैषिकेऽर्थे छो भवति । छस्य ईय् । को दुः ?

५५० ॥ **यस्याच्वाधैन्दुः** । १ । १ । ८३ । यस्य शब्दस्याचां मध्ये आदिरजैप् भवति स दुसंज्ञो भवति । इत्यादिना विहितः । पूर्ववच्छेषं । पाणिनीयं । पूज्यपादीयं । पाणिनीयं वेत्यधीते वेति विगृह्य—तद्वेत्त्यधीते" इत्यण् । प्रोक्तादित्युप् । पाणिनीयः छात्रः । एवं--पूज्यपादीयश्छात्रः ॥ समंतभद्रेण कृतमिति विगृह्य—

५५१ ॥ **कृते ग्रंथे** । ३ । ३ । ९९ । तेनेति भासमर्थात् कृते ग्रंथेऽर्थे यथाविहितं त्यो भवति । सामंतभद्रं वार्त्तिकं । वाररुचानि वाक्यानि ॥ उपगोरिदमिति विगृह्य—

५५२ ॥ **तस्य स्वं** । ३ । ३ । १०२ । तस्येति तासमर्थात् स्वमिति द्वितीये संबंधिनि यथाविहितमणादयस्त्या भवंति । पूर्ववच्छेषं । औपगवं । एवं—कापटवं । औत्सं । गांगं । वार्हस्पत्यं । राष्ट्रियं । कात्रेयकं । नादेयं ॥ भस्मनो विकार इति विगृह्य—

५५३ ॥ **तस्य विकारः** । ३ । ३ । १२३ । तस्येति तासमर्थात् विकार इत्यस्मिन् अर्थे यथाविहितमणादयो भवंति । तस्येति वर्तमाने पुनस्तस्यग्रहणं शेष इत्यस्य निवृत्यर्थं ।"नः" इति टेः खं प्राप्तं "अनः" इति प्रतिषिद्धं । भास्मनः । एवं—मार्त्तिकः ॥ अक्षैर्दीव्यतीति विग्रहे—प्राग्याट्ठणिति वर्तमाने—

५५४ ॥ **तेन दीव्यत्खनज्जयज्जितं** । ३ । ३ । १५३ । तेनेति भासमर्थात् दीव्यति खनति जयति जिते चार्थे ठण् भवति । आक्षिकः । एवं—शालाकिकः । अभ्र्या खनति आभ्रिकः । एवं कौद्दालिकः । पाशकैर्जयति जितो वा पाशकिकः । आक्षिकः ।

तेनेति करणे भैषा नान्यत्रानभिधानतः॥ दध्ना संस्कृतमिति विगृह्य—

५५५ ॥ संस्कृतं । ३ । ३ । १५४ । तेनेति भासमर्थात् संस्कृतमित्यस्मिन्नर्थे ठण् भवति । सतः उत्कर्षाधानं संस्कारः । दाधिकं । एवं-शार्ङ्गवेरिकं । मारीचिकं । औपाध्यायः शिष्यः । वैदिकः॥ उडुपेन तरति इति विगृह्य—

५५६ ॥ तरन् । ३ । ३ । १५६ । तेनेति भासमर्थात् तरत्यर्थे ठण् भवति । औडुपिकः । कांडप्लाविकः । गौपुच्छिकः । हस्तिना गच्छतीति विगृह्य-

५५७ ॥ चरन् । ३ । ३ । १५८ । तेनेति भासमर्थात् चरति गच्छति भक्षयति चार्थे ठण् भवति । हास्तिकः । एवं शाकटिकः । दध्ना भक्षयति दाधिकः । एवं-शार्ङ्गवेरिकः ॥ शब्दं करोतीति विगृह्य-

५५८ ॥ शब्ददर्दुरललाटकुक्कुटाद् रूढौ । ३ । ३ । २०१ । शब्द दर्दुर ललाट कुक्कुट इत्येतेभ्यः इप्समर्थेभ्यष्ठण् भवति रूढौ रूढिक्रियाभिधे विषये । शाब्दिकः वैयाकरणः । शब्दमविनष्टं जानन्नुच्चरतीत्यर्थः । एवं-दर्दुरं वादित्रं करोतीति दार्दुरिकः । ललाटं पश्यतीति लालाटिकः सेवकः । कुक्कुटीं पश्यतीति कौक्कुटिकः । कुक्कुटीवाल्पेन देशेन गच्छन् संयतो भिक्षुरुच्यते ॥ अपूपाः पण्यमस्येति विगृहे-

५५९ ॥ तदस्य पण्यं । ३ । ३ । २०६ । तदिति वासमर्थात् अस्येति तार्थे ठण् भवति यत्तद् वांतं तच्चेद् पण्यं भवति । आपूपिकः । शाष्कुलिकः । लाड्डुकिकः । पण्यार्थस्य वृत्तावंतर्भावात् तदप्रयोगः ॥ नृत्तं शिल्पमस्येति विगृहे—तदिति वर्तमाने—

५६० ॥ शिल्पं । ३ । ३ । २०९ ॥ तदिति वासमर्थात् अस्येति तार्थे ठण् भवति यद् तद् वांतं तच्चेच्छिल्पं विज्ञानं भवति । नार्तिकः । वादनिकः । मृदङ्गवादनं शिल्पमस्येति मार्दङ्गिकः । मौरजिकः । पाणविकः । वादनशिल्पार्थयोर्वृत्तावंतर्भावादप्रयोगः ॥ अपूपाः शिल्पमस्येति-तदस्येति वर्तमाने–

५६१ ॥ शीलं । ३ । ३ । २१६ । तादिति वा समर्थात् अस्येति तार्थे ठण भवति यत्तद्वांतं तेच्चच्छीलं स्वभावो भवति । आपूपिकः । तद्भक्षणशील इत्युच्यते । तत्स्थस्य ताच्छब्दयात् । एवं–शाष्कुलिकः । ताम्बूलिकः ॥ छत्रं शीलमस्येति विग्रहे–

५६२ ॥ छत्रादेरञ् । ३ । ३ । २१७ । छत्र इत्येवमादिभ्यस्तदस्य शीलमित्यस्मिन् विषये अञ् भवति । छात्रः । छत्रवत् गुरुच्छिद्राच्छादनप्रवृत्तः शिष्यः उच्यते । एवं शिक्षाशीलः शैक्षः । भिक्षाशीलः भैक्षः । शुल्कशालायां नियुक्त इति विगृह्य—

५६३ ॥ तत्र नियुक्तः । ३ । ३ । २२६ । तत्रेतीप्समर्थात् नियुक्त इत्यस्मिन्नर्थे ठण् भवति । नियुक्तोऽधिकृतो व्यापृत इत्यर्थः । शौल्कशालिकः । आपणिकः । आक्षपटलिकः । दौवारिकः–"द्वारादेः" इत्यैाव् । रथं वहतीति विगृह्य—

५६४ ॥ तद् वहन् रथप्रासंगाद्यः ॥ ३ । ३ । २३२ । तदितीप्समर्थात् रथशब्दात् प्रासंगशब्दाच्च वहत्यर्थे यस्त्यो भवति । रथ्यः । वत्सानां स्कंधे प्रासज्यते इति प्रासंगो युक्तः । तद्वहति प्रासंग्यः ॥ धुरं वहानीति विगृह्य—

५६५ ॥ धुरो ढण् च ३ । ३ । २३३ । धुर इत्येतस्मादिप्समर्थात् वहत्यर्थे ढण् भवति यश्च । धौरेयः । धुर्यः ॥ सामानि साधुरिति विगृह्य–

५५६ ॥ तत्र साधुः ३ । ३ । २४९ । तत्रेतीप्समर्थात् साधुरित्यस्मिन्नर्थे यो भवति । "नः" इति टेः खं प्राप्तं—

५६७ ॥ येऽङ्गौ ४ । ४ । १७८ । भावकर्मभ्यामन्यत्र ये टिखं न भवति । सामन्यः । एवं-वेमन्यः । कर्मण्यः । शरण्यः । सभ्यः । साधुः समर्थः प्रवीणः उपकारको वा । वत्सेभ्यो हितमिति विग्रहे-

५६८ ॥ तस्मै हितेऽराजाचार्यब्राह्मणवृष्णः ३ । ४ । ७ । तस्मा इत्यप्समर्थात् राजादिवर्जितात् हित इत्यस्मिन्नर्थे यथाविहितं प्राक् ठणश्छ इत्यादिस्त्यो भवति । वत्सीयः । करभीयः । उष्ट्रीयः । पित्रीयः ।

५६९ ॥ युगाद्योर्यः । ३ । ४ । ३ । युगादेरुवर्णांताच्च मृदो यस्त्यो भवति । युग्यः । पिचव्यः कार्पासः ।

५७० ॥ प्राण्यंगरथखलयवमाषवृषब्रह्मतिलाद्यः । ३ । ४ । ८ । प्राण्यंगवाचिभ्यो रथादिभ्यश्च तस्मै हित इत्यस्मिन् विषये यो भवति । दंतेभ्यो हितः दंत्यः । एवं-कर्ण्यं । चक्षुष्यं । नाभ्यं तैलं । रथ्या भूमिः । खल्यमग्निरक्षणं । यव्यस्तुषारः । माष्यो वारः । वृष्यं क्षीरपानं । ब्रह्मण्यो देशः । तिल्यं वात्या ॥ सप्तत्या क्रीतमिति विगृहे-

५७१ ॥ मूल्यैः क्रीतं । ३ । ४ । ४५ । मूल्यवाचिनो निर्देशादेव भांताम्मृदः क्रीतमित्यस्मिन्नर्थे यथाविहिते अर्हाट्ठण् इत्येवमादयस्त्याः भवंति ॥ साप्ततिकं । आशीतिकं । नैष्किकं । पाणिकं । प्रस्थस्य वाप इति विग्रहे-

५७२ ॥ तस्य वापः । ३ । ४ । ४६ । तस्येति ताम-

मर्थात् वाप इत्यस्मिन्नर्थे यथाविहितं त्यो भवति। इति ठण्। प्रास्थिकं। कौटुंबिकं। द्रौणिकं॥ राजानमर्हतीति विग्रहे—

५७३॥ इपोऽर्हे वत् कृत्ये। ३। ४। १३२ इप इतीप्समर्थात् अर्हे इत्यस्मिन् अर्थे वत् भवति यत्तदर्हे इति तच्चे-त्कृत्यं कर्तव्यं क्रिया भवति। राजवत् वृत्तमस्य राज्ञः। राजतायो-ग्यमस्य राज्ञः वृत्तमित्यर्थः। एवं—कुलीनवत्। साधुवत्।

५७४॥ सुप इवे। ३। ४। १३३। सुबंतादिवार्थे वत् भवति। सादृश्यमिवार्थः। तच्चेद् सादृश्यं कृत्यं क्रिया विषयं भवति। क्षत्रिय इव क्षत्रियवद् युध्यते। देवमिव देववद् गुरुं पश्यति। साधुनेव साधुवदाचरितं देवदत्तेन। पात्राय इव पात्रवद् अपात्राय दत्तं। पर्वतादिव पर्वतवत् कुतुपादवरोहति।

५७५॥ तत्र। ३। ४। १३४। तत्रेतीप्समर्थात् इवा-र्थे वद् भवति। मथुरायामिव मथुरावन्मान्यखेटे प्रासादाः। पाटलि-पुत्रवत् साकेते परिखा। अक्रियार्थोऽयमारंभः।

५७६॥ तस्य। ३। ४। १३५। तस्येति तासमर्थात् इवार्थे वद् भवति। देवदत्तस्येव देवदत्तवत् जिनदत्तस्य गावः। राजवत् जिनदत्तस्य दंताः।

५७७॥ भावे त्वतल्। ३। ४। १३६। तस्येति तासमर्थात् भावेऽभिधेये त्वतल् इत्येतौ त्यौ भवतः। भवतोऽस्माद-भिधानप्रत्ययौ इति भावः। शब्दप्रत्ययप्रवृत्तिनिमित्तं वा भावः। त्वांतं स्वभावतो नपुंसकलिंगं। तलंतः स्त्रीलिंगः। गोर्भावः गोत्वं। गोता। अत्र सामान्यं भावः। शुक्लत्वं, शुक्लता पटस्य—अत्र गुणः। शुक्ल-त्वं शुक्लता रूपस्य-अत्र गुणसामान्यं। पाचकत्वं पाचकता। औप-

गवत्वं। औपगवता। राजपुरुषत्वं। राजपुरुषता। अत्र संबंधः। देवदत्तत्वं। देवदत्तता। डित्थत्वं। डित्थता—अत्र संज्ञासंज्ञित्वं संबधः। शब्दस्वरूपं वाल्यादिपर्यायान्वयवस्तुस्वरूपं वा भावः॥ सुराज्ञो भावः कर्म वा इति विगृह्य—

५७८॥ राजपत्यंतगुणोक्तिराजादिभ्यः कृत्ये च ३।४।१४१। राजान्तेभ्यः पत्यंतेभ्यो गुणवाचिभ्यो राजादिभ्यश्च द्वन्द्वेभ्यस्तस्येति तांतेभ्यः कृत्ये कर्तव्ये कर्मणि क्रियायां भावे च ष्यण् भवति। टकारो ङ्यर्थः।

५७९॥ आत्वादगडुलादेः।३।४।१३७। गडुलादिवर्जितात् त्वतलावधिकृतावाब्रह्मणस्त्व इति त्वशब्दात् पूर्वं। इति पक्षे त्वतलौ भवतः। सौराज्यं। न इति टिखं। सुराजत्वं। सुराजता। एवं—यौवराज्यं। युवराजत्वं। युवराजता। पत्यंतेभ्यः—बृहस्पतेर्भावः कृत्यं कर्म वा बार्हस्पत्यं। बृहस्पतित्वं। बृहस्पतिता। गुणे उक्तिर्येषां ते गुणोक्तयः। गुणद्वारेण च ये द्रव्यवृत्तयस्तेभ्यः जडस्य भावः कृत्यं वा जाड्यं। जडत्वं। जडता। मौर्ख्यं। मूर्खत्वं। मूर्खता। राज्ञो भावः कृत्यं वा राज्यं, राजत्वं। राजता। कवेर्भावः कृत्यं वा काव्यं। कवित्वं। कविता॥ तारकाः संजाता अस्य इति विगृहे—

५८०॥ तदस्य संजातं तारकादिभ्य इतः।३।४।१९७। तारकादिभ्यस्तदस्य संजातमित्यस्मिन् विषये इत इत्ययं त्यो भवति। तारकितं नभः। पुष्पितं। कुसुमितं। पल्लवितं॥ ऊरु प्रमाणमस्येति विगृहे—

५८१॥ प्रमाणे मात्रट्।३।४।१९९। तदिति वा समर्थात् प्रमाणे वर्तमानात् अस्येति तार्थे

मात्रट् भवति । टकारो ङयर्थः । प्रमाणमायाममानं । तद् द्विविधं । उत्सेधमानं, शय्यामानं च । तत्रोर्ध्वमाने-ऊरुमात्रमुदकं । ऊरुमात्री परिखा । तिर्यग्माने--धनुर्मात्री भूमिः ॥ हस्ती प्रमाणमस्येति विगृहे -

५८२ ॥ हस्तिपुरुषाद् वाऽण् । ३ । ४ । २०० ।
तदिति वासमर्थात् प्रमाणवाचिनो हस्तिन्शब्दात् पुरुषशब्दाच्च तार्थे अण् भवति वा । पक्षे प्राप्तं च । न इति टिखं प्राप्तं "अनपत्येऽणीनः" इति निषिद्धं । हास्तिनं जलं, हस्तिमात्रं । पौरुषं, पुरुषमात्रं ॥ ऊरु प्रमाणमस्येति विगृहे–

५८३ ॥ वोर्ध्वे दघ्नट्द्वयसट् । ३ । ४ । २०१ ।
ऊर्ध्वे प्रमाणे वर्तमानात् मृदो वांतादस्येति तार्थे द्वयसट् दघ्नट् इत्येतौ त्यौ वा भवतः । पक्षे मात्रट् । टकारो ङयर्थः । ऊरुद्वयसं । ऊरुदघ्नं । ऊरुमात्रं जलं । हास्तिद्वयसं । हास्तिदघ्नं । हस्तिमात्रं । पुरुषद्वयसं । पुरुषदघ्नं । पुरुषमात्रं । इदं मानमस्येति विगृहे—

५८४ ॥ घत्विदंकिमः । ३ । ४ । २०७ । इदंशब्दात् किम्शब्दाच्च मानवृत्तेस्तदस्येत्यस्मिन् विषये घतु इत्ययं त्यो भवति । उकार उगिद्कार्यार्थः । मानं चतुर्विधं । ऊन्मानं निष्कादि । परिमाणं प्रस्थादि । प्रमाणं वितस्त्यादि । संख्या च एकत्वादीति । घस्य इय् ।

५८५ ॥ किमिदमः कीश् ४ । ३ । २५४ किम् इदम् इत्येतयोर्यथासंख्यं की इश् इत्येतावादेशौ भवतः घतुदृग्दृशदृक्षेषु घुषु परतः । एरिति खं । नुम्यस्फांतसुखानि । इयान्निष्कः । इयद्धान्यं, इयती शाटी । इयन्तो गुणिनः । एवं-कियान्, कियत्, कियती, कियन्तः ।

५८६ ॥ **वैतदो घः** । ३ । ४ । २०८ । एतदः परस्य घतोरादेर्घकारस्य वकारादेशो भवति ।

५८७ ॥ **आः** । ३ । ४ । २०८ । घतुदृग्दृशदृक्षेषु परतः पूर्वस्यात्वं भवति । इति दकारस्यात्वं । एतन्मानमस्येति विगृहे– एतावान्निष्कः । एतावद्धान्यं । एतावती शाटी । एतावंतो गुणिनः ।

५८८ ॥ **यत्तदः** । ३ । ४ । २०९ । यत्तदूभ्यां परस्य घतोर्घकारस्य वकारादेशो भवति । पूर्ववच्छेषं । यन्मानमस्य यावान् । यावत् । तावान् । तावत् । ज्ञापकमिदमेवादेशवचनमेतत्-- यत्तदूभ्यो घतुर्भवतीति ॥ चत्वारोऽवयवा अस्येति विगृह्य–स्येरिनि वर्तमाने--

५८९ ॥ **अवयवे तयट्** । ३ । ४ । २११ । स्यिसंज्ञावाचिनोऽवयवे वर्तमानात् वांतात् अस्येति तार्थेऽवयविनि तयट् भवति । टकारो ड्यर्थः । स्वादावधे इति पदत्वे रेफस्य "छवि"इति सत्वं ।

५९० ॥ **प्रात्सुपस्त्ये** । ५ । ४ । ७८ प्रात्परस्य सकारस्य सुबंताद्विहिते तकारादौ त्ये परतः षत्वं भवति । इति षत्वं । चतुष्टयं । चतुष्टयं समन्तभद्रस्य । चतुष्टयशब्दानां प्रवृत्तिः । पंचतयो यमः । दशतयो धर्मः ॥ एकादशानां पूरण इति विगृहे–

५९१ ॥ **तस्य स्यिपूरणे डट्** । ४ । १ । १ । तस्येति तासमर्थात् स्यिसंख्यावाचिनः स्यिसंज्ञापूरणेऽभिधेये डट् त्यो भवति । टकारो ड्यर्थः । डकारष्टिखार्थः । एकादश । एवं–द्वादश । त्रयोदश । एकादशी तिथिः ॥ पंचानां पूरण इति विगृहे–

५९२ ॥ **नोऽसे मट्** । ४ । १ । २ । नकारांतात् स्थिसंज्ञावाचिनो मृदः स्थिपूरणे मडित्ययं त्यो भवत्यसे । पंचमः । सप्तमः । पंचमी तिथिः ॥ षण्णां पूरणमिति विगृह्य—

५९३ ॥ **षट्कतिकतिपयस्य थुक्** । ४ । १ । ५ । षट् कति कतिपय इत्येतेषां थुगागमो भवति डटि परतः । टुत्वं । षष्ठः । षष्ठी तिथिः । कतिथः । कतिपयथः । ज्ञापकमिदमेव डटि थुग्वचनं-कतिपयादपि डट् भवतीति ॥ चतुर्णां पूरण इति विगृह्य—

५९४ ॥ **चतुरः** । ४ । १ । ६ । चतुर् इत्येतस्य थुगागमो भवति डटि परतः । चतुर्थः । चतसृणां पूरणी चतुर्थी । तसादित्वात् पुम्भावः ।

५९५ ॥ **छयौ चखञ्च** । ४ । १ । ७ । चतुर् इत्येतस्मात् छयौ त्यौ भवतश्चकारस्य खं । तुरीयः । तुरीया । तुर्यः । तुर्या । एवं चतुरस्त्रिरूप्यं ॥ द्वयोः पूरण इति विग्रहे—

५९६ ॥ **द्वेस्तीयः** । ४ । १ । ८ । द्वि इत्येतस्मात् तीयो भवति । डटोऽपवादः । द्वितीयः । द्वितीया ॥

५९७ ॥ **त्रेस्तृ च** । ४ । १ । ९ । त्रि इत्येतस्मात् तीयो भवति त्रेश्च तृ इत्ययमादेशो भवति । त्रयाणां पूरणः तृतीयः । तृतीया ॥ गावोऽस्य संतीति विगृह्य—

५९८ ॥ **तदस्यास्त्यस्मिन्निति मतुः** । ४ । १ । ४० । तदिति वासमर्थात् अस्तीत्येवमर्थविशिष्टात् अस्येति तार्थे अस्मिन्निती्यर्थे वा मतुर्भवति । उकार उगिद्कार्यार्थः । पूर्ववच्छेपं । गोमान् । एवं-श्रीमान् । वृक्षा अस्मिन् संति—वृक्षवान् ,प्लक्षवान् पर्वतः ।

५९९ ॥ **ममोङ्झयो मतोर्वोऽयवादिभ्यः** । ५ । ३ । ४६

मकारांतादवर्णांतान्मकारोङोऽवर्णोङो झयंताच्च परस्य मतोर्वकारादेशो भवति यवादीन् वर्जयित्वा । किंवान् । गुणवान् । शालावान् । शमीवान् । अर्हवान् । विद्युत्वान् । इति करणो विवक्षार्थः । तेन-

भूमनिंदाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां प्रायो मत्वादयो मताः ॥

भूमा प्राचुर्यं तस्मिन् भूम्नि-गोमान् । निंदायां--ककुदावती । प्रशंसायां--शीलवती । नित्ययोगे-क्षीरिणो वृक्षाः । अतिशायने-उदरिणी कन्या । संसर्गे--दंडी । छत्री । भूमादिदर्शनं प्रायः किं ? सत्तामात्रेऽप्ययं दृश्यते । व्याघ्रवान् पर्वतः । स्पर्शरसगंधवर्णवंतः पुद्गलाः । वागस्यास्त्यस्मिन् वेति विगृह्य—

६०० ॥ **वाचो ग्मिन्** । ४ । १ । ४५ । वाच् इत्येतस्मात् मत्वर्थे वा ग्मिन् भवति । अत्र गकार इत् । गकारादित्वात् "त्ये" इति सूत्रेण पूर्वस्य अनुनासिकादेशो न भवति । गकारो नासिक्यनिवृत्यर्थः । वाग्मी । वाग्वान् ।

६०१ ॥ **क्षिप्यालाटौ** । ४ । १ । ४६ । वाच् इत्येतस्माद् मत्वर्थे क्षिपि क्षेपे गम्यमाने आल आट इत्येतौ त्यौ भवतः । वाचालः । वाचाटः । यः फल्गु भाषते स एवं क्षिप्यते ॥ माया अस्यास्त्यस्मिन्निति वा विगृह्य-

६०२ ॥ **मायाऽऽमयामेधास्रक्तपोऽसो विन्** । ४ । १ । ७४ । माया आमया मेधा स्रज् तपस् इत्येतेभ्योऽसंतेभ्यश्च मृद्भ्यो मत्वर्थे विन् वा भवति । मायावी । आमयावी । अत एव निपातनादीत्वं । मेधावी । स्रग्वी । तपस्वी । यशस्वी । वर्चस्वी । वचस्वी । मत्वर्थे स्तावीति भसंज्ञायां पदकार्यं रुत्वादि न भवति ।

पक्षे तु मतुः । मायावान् । आमयावान् । मेधावान् । स्रग्वान् । ताप-सः—ज्योत्स्नादित्वादण् । यशस्वान् । यशस्वती । सरस्वती ॥ नौर-स्यास्त्यस्मिन्निति वा विगृह्य--

६०३ ॥ **नौशिखादिभ्यां ठेनौ** । ४ । १ । ७५ । नावादिभ्यश्शिखादिभ्यश्च यथासंख्यं मत्वर्थे ठ इन् इत्येतौ त्यौ वा भवतः । पूर्ववच्छेषं । नाविकः । नौमान् । कुमारिकः । कुमारीवान् । एवं-शिखी । शिखावान् । माली । मालावान् ।

६०४ ॥ **अतोऽनेकाचः** । ४ । १ । ७६ । अकारांता-दनेकाचो मृदो मत्वर्थे वा ठेनौ त्यौ भवतः । दंतोऽस्यास्तीति दंतिकः । दंती । दंतवान् । छत्रिकः । छत्री । छत्रवान् ॥ अतः परं प्रायशः स्वार्थिकास्त्याः । तत्र विशेषणं प्रकृतेर्विज्ञायते । तच्च त्येन द्योत्यते ।

६०५ ॥ **किंस्निबहोरद्व्यादिवैपुल्यात्** । ४ । १ । १०८ । किम्शब्दात स्निसंज्ञकात् द्व्यादिवर्जितात् बहुशब्दा-च्चावैपुल्यवाचिनो वक्ष्यमाणास्त्याः भवंति । इत्ययमधिकारः "ते सुपः" इत्यतः प्राग् वेदितव्यः इति वर्तमाने-

६०६ ॥ **कायास्तस्** । ४ । १ । ११३ । किमादि-भ्यः कांतेभ्यस्तस् भवति । कस्मादिति विगृह्य—तस् । पूर्वस्य सुपः उप् । "ते सुपः" इति सुप्संज्ञायां पुनस्त्यदादिकार्ये । कुस्तसोरिति कादेशः । कुतः । एवं-सर्वस्मात्--सर्वतः । विश्वतः । यतः । ततः । अस्मात्—इतः । इदम इशिति इशादेशः । एतस्माद् अतः ।

६०७ ॥ **अश्** ४ । १ । ११२ । एतदोऽशित्यादेशः स्यात् । शकारः सर्वादेशार्थः । बहुभ्यः--बहुतः । तसादाविति पुंभावे स्त्रिया-मप्येवं रूपं । तसाद्यंतस्य झित्वात् सुप उप् ॥

६०८ ॥ ईपत्रः । ४ । १ । ११६ । किमादिभ्यो-ऽह्न्यादिवर्जितादीबंतात् त्र इत्ययं त्यो भवति । सर्वस्मिन् सर्वत्र । यत्र । तत्र । बहुषु बह्वीषु वा बहुत्र ॥

६०९ ॥ किमोऽश्च । ४ । १ । ११७ । किमृशब्दा-दीबंतात् अश् इत्ययं त्यो भवति त्रश्च । कस्मिन् क्व । कुत्र ॥

६१० ॥ इदमो हः । ४ । १ । ११८ । इदमृशब्दा-दीबंतात् ह इत्ययं त्यो भवति । अस्मिन्-इह । त्रापवादोऽयं ।

६११ ॥ भवत्वायुष्मद्दीर्घायुर्देवानांप्रियैकार्थाच्च । ४ । १ । ११९ । भवतु आयुष्मद् दीर्घायुस् देवानांप्रिय इत्येतत्समानाधिकरणात् किंस्निबहोरह्न्यादिवैपुल्यात् सुब्मात्रांतात् त्रत्यो भवति तश्च । स भवान् । तत्र भवान् । ततो भवान् । स आयुष्मान्, तत्रायुष्मान्, तत आयुष्मान् । स दीर्घायुः, तत्र दीर्घायुः, ततो दीर्घायुः । स देवानांप्रियः, तत्र देवानांप्रियः, ततो देवानां-प्रियः । एवमुत्तरत्रापि योज्यं । सर्वविभक्तीषु नेयं ॥

६१२ ॥ कालेऽनद्यतने हिः । ४ । १ । १२० । किमादेरीबंतादनद्यतने काले यथासंभवं वर्तमानात् हित्यो भवति । कस्मिन् अनद्यतने काले कर्हि । यर्हि । तर्हि । काले इति किं ? कस्मिन्नद्यतने भोजने--कुत्र । यत्र । अनद्यतने इति किं ? कस्मिन् काले-कदा । यदा ॥

६१३ ॥ इदमः । ४ । १ । १२१ । काले वर्तमाना दीबंतात् इदमो हित्यो भवति । अस्मिन् काले एतर्हि ।

६१४ ॥ एतेतौ र्थोः । ४ । १ । ११० । रेफादौ थकारा-दौ च त्ये परतः इदमः एतेतादेशौ भवतः ॥

६१५ ॥ अधुना । ४ । १ । १२२ । काले वर्तमानादी-बंतात् इदमः अधुना त्यो भवति । अस्मिन् काले--अधुना । इदम इश् । एरिति खं ।

६१६ ॥ दानीं । ४ । १ । १२३ । काले वर्तमानादि-दम ईबंतात् दानीमित्ययं त्यो भवति । अस्मिन् काले इदानीं ।

६१७ ॥ तदः । ४ । १ । १२४ । तच्छब्दात् काले वर्तमानादीबंतात् दानीमित्ययं त्यो भवति । तस्मिन् काले तदानीं ।

६१८ ॥ यत्किंतत्सर्वैकान्याद्दा । ४ । १ । १२५ । यत् किम् तत् सर्व एक अन्य इत्येतेभ्यः काले वर्तमानेभ्यः ईबंतेभ्यो दात्यो भवति । यस्मिन् काले यदा । कदा । तदा । सर्वदा । एकदा । अन्यदा । काले इति किं ? यत्र । क्व । तत्र ।

६१९ ॥ सदासद्यः । ४ । १ । १२६ । सदा सद्यस् इत्येतौ शब्दौ निपात्येते । सर्वशब्दादीबंतात् काले वर्तमानात् दात्यो निपात्यः सभावश्च । सर्वस्मिन् काले सदा । सद्यः इति समानश-ब्दाद् द्यस्त्यः सभावश्च, समाने काले सद्यः । समानेऽहनि इति वा सद्यः ।

६२० ॥ प्रकारे था । ४ । १ । १३१ । यथाविहितं सुप्संबंधः । सामान्यस्य भेदाभेदांतरानुवृत्तः प्रकारः । तत्र वर्तमा-नात् किमादेरद्वयादिवैपुल्याद् यथासंभवं सुबंतात् थात्यो भवति । सर्वेण प्रकारेण सर्वथा । यथा । तथा ॥

६२१ ॥ कथमित्थं । ४ । १ । १३२ । कथमित्थ-मिति किमिदंभ्यामेतदश्च प्रकारे थमिति त्यो निपात्यते । केन

प्रकारेण कथं। अनेन, एतेन च प्रकारेण इत्थं। एतेतौ थोरिति इदमेतदोस्थकारादाविदादेशो भवति ॥

६२२ ॥ **स्येर्विधार्थे धा**। ४। १। १४८। स्यिसंज्ञकाच्छब्दाद् विधार्थे प्रकारे धात्यो भवति। एकेन प्रकारेण एकधा। द्विधा। त्रिधा। चतुर्धा। पंचधा। बहुधा ॥

६२३ ॥ **याप्ये पाशः**। ४। १। १५४। याप्यंतेऽपनीयंतेऽस्माद् गुणा इति याप्यो निंद्यस्तस्मिन् अर्थे वर्तमानान्मृदः स्वार्थे पाश इत्ययं त्यो भवति। याप्यो वैयाकरणो वैयाकरणपाशः। तार्किकपाशः ॥

६२४ ॥ **तमः प्रकृष्टे मिङश्च**। ४। १। १६०। मिङंतान्मृदश्च प्रकृष्टे प्रकर्षवत्यर्थे वर्तमानात् स्वार्थे तम इत्ययं त्यो भवति। सर्वे इमे पचंत्ययमेषां प्रकृष्टं पचतीति तमः।

६२५ ॥ **इयेन्मिङ्किंझादामद्रव्ये**। ४। २। १८। झिसंज्ञकादेकारांतात् मिङः किम्शब्दाच्च परो यो झस्तमतरौ तदंतात् आमित्ययं त्यो भवति न चेत्स द्रव्ये वर्तते। इति आम्। पचतितमां देवदत्तः। आमंतस्य झित्वात्सोरुप्। एवं—पचतस्तमां। पचंतितमां॥ सर्वे इमे शुक्लाः अयमेषां प्रकृष्टः शुक्लः शुक्लतमः। आढ्यतमः। साधकतमः ॥

६२६ ॥ **द्विविभज्ये तरः**। ४। १। १६१। द्वयोरर्थयोस्तद्गुणयोर्मध्ये यः प्रकृष्टस्तस्मिन् विभज्ये विभक्तव्ये च प्रकृष्टेऽर्थे वर्तमानान्मिङंतात् मृदश्च तरस्त्यो भवति। तमोऽपवादः। द्वाविमौ पचतः, अयमनयोः प्रकृष्टं पचति पचतितरां। पठतितरां। अधीतेतरां। पूर्ववदाम्। द्वाविमौ पटू। अयमनयोः प्रकृष्टः—पटुतरः। पाचकतरः।

विभज्ये-मिङः-सांकाश्यकेभ्यः पाटलिपुत्रकाः पचंतितरां, पचंतेतरां । मृदः-सांकाश्यकेभ्यः पाटलिपुत्रकाः आढ्यतराः, अभिरूपतराः । बहव इमे पटवः अयमेषां प्रकृष्टः पटुः, द्वाविमौ पटू अयमनयोः प्रकृष्टः पटुरिति च विगृह्य-पूर्वेण सूत्रद्वयेन विहितयोः-

६२७ ॥ गुणांगाद्वेष्ठेयसू । ४ । १ । १६३ । गुणांगमप्रधानं यस्य तस्माद् गुणांगाद् गुणमभिधाय द्रव्ये वर्तमानाच्छब्दात् परयोस्तमतरयोः स्थाने यथासंख्यं इष्ठ ईयसु इत्येतावादेशौ भवतः । तुरिष्ठेयस्सु''टेरिति टिखं। उकार उगित्कार्यार्थः । पटिष्ठः । पटीयान् । अघिष्ठः । अघीयान् ॥

६२८ ॥ प्रशस्यस्य श्रः । ४ । १ । १६४ । प्रशस्यशब्दस्य श्र इत्ययमादेशो भवति इष्ठेयस्वोः परतः । सर्वेषामयं प्रशस्यः--श्रेष्ठः। अयमनयोरस्माद् वा प्रशस्यः--श्रेयान् ॥

६२९ ॥ प्रशस्ते रूपः । ४ । १ । १७० । मिङंतान्मृदश्च प्रशस्तेऽर्थे वर्तमानात् रूप इत्ययं त्यो भवति । प्रशस्तं पचति-पचतिरूपं । पचतोरूपं। पचंतिरूपं। प्रशस्तो वैयाकरणः, वैयाकरणरूपः । पंडितरूपः । दर्शनीयरूपेति तसादित्वात् पुंभावः ।

६३० ॥ आसिद्धेऽज्ञादेर्देश्यदेशीयकल्पाः ।४। १। १७१ मिङंतात् ङ्याम्मृदश्च ज्ञाद्यंतवर्जितात् आसिद्धेऽर्थे वर्तमानात् स्वार्थे देश्य देशीय कल्प इत्येते त्या भवंति । आसिद्धमीषत्समाप्तं पचति पचतिदेश्यं। पचतिदेशीयं । पचतिकल्पं। आसिद्धः पटुः पटुदेश्यः पटुदेशीयः । पटुकल्पः ।

६३१ ॥ मिङ्स्नेरक् प्राग्टेः । ४ । १ । १७६ । मिङंतस्य स्निसंज्ञकस्य च टेः प्राग् अगित्ययं त्यो भवति ।

कापवादः । कुत्सितमज्ञातमल्पं वा पचति पचतकि । पचतकः । पचंतकि । सर्वकः । सर्वकौ । सर्वके । विश्वकः । विश्वकौ । विश्वके । असुकः । असुकौ । असुके । असुकाः । "वासुकः" इत्यकोऽकारस्य पक्षे उकारो निपात्यते । साकोऽपि किमः कादेश इति कः का किमित्यादि ।

६३२ ॥ **किंयत्तदन्याद् द्वयोर्निर्धार्ये डतरः । ४ । १ । १९९ ।** किं यत् तत् अन्य इत्येतयोर्द्वयोर्निर्धार्येऽर्थे वर्तमानेभ्यः डतर इत्ययं त्यो भवति । समुदायादेकदेशस्य प्रकृष्य निष्कृस्य धारणं निर्धारणं । को भवतोः कठः कतरो भवतोः कठः पटुः कर्ता देवदत्तो वा । एवं--यतरः । ततरः । अन्यतरः । स आगच्छतु ॥

६३३ ॥ **वैकात् । ४ । १ । २०० ।** एकशब्दाद् द्वयोरेकस्मिन् निर्धार्ये वर्तमानात् डतरत्यो वा भवति । एको भवतोः कठः एकतरो भवतोः कठः । पटुः कर्ता वा । वावचनादगपि । एककः ॥

६३४ ॥ **बहूनां प्रश्ने डतमश्च । ४ । १ । २०१ ।** किमादेर्बहूनां मध्ये निर्धार्ये वर्तमानात् प्रश्नविषये डतमो भवति डतरश्च वा । बहुष्वासीनेषु कश्चित् कंचित् पृच्छति--को भवतां मध्ये कठः कतमः कतरो वा भवतां कठः । एवं-यतमः, यतरो वा । ततमः, ततरो वा । अन्यतमः अन्यतरो वा भवतां कठः स आगच्छतु ॥

६३५ ॥ **एकात् । ४ । १ । २०२ ।** एकशब्दात् बहूनामेकस्मिन्निर्धारणे वर्तमानात् डतमो भवति । एकतमो भवतां

कठः । पटुर्गता वा । वावचनादगपि । एककः । महाधिकाराद्वाक्यमपि एकः ॥

६३६ ॥ **प्रकारोक्तौ जातीयः** । ४ । २ । १० । प्रकारोक्तौ वर्तमानात् मृदो जातीयस्त्यो भवति । पटुः प्रकारः पटुजातीयः । मृदुजातीयः । तज्जातीयः । यज्जातीयः । नानाभूतः प्रकारोऽस्य नानाजातीयः । एवंजातीयः । यथाजातीयः । तथाजातीयः ।

६३७ ॥ **स्येर्वारे कृत्वस्** । ४ । २ । २१ । क्रियार्थस्यायौगपद्येन वृत्तिस्तत्कालो वारस्तस्मिन्नर्थे वर्तमानात् स्यिसंज्ञकान्मृदः स्वार्थे कृत्वसित्ययं त्यो भवति । पंच वारान् भुंक्ते पंचकृत्वः । षट्कृत्वः । शतकृत्वः। सहस्रकृत्वः । बहुकृत्वः। यावत्कृत्वः।

६३८ ॥ **चतुस्त्रिद्वेः सुच्** । ४ । ३ । २२ । चतुर् त्रि द्वि इत्येतेभ्यः स्यिसंज्ञकेभ्यो वारे वर्तमानेभ्यः सुच् इत्ययं त्यो भवति कृत्वसोऽपवादः । चतुरो वारान् भुंक्ते चतुर्भुंक्ते । त्रिर्भुंक्ते । द्विर्भुंक्ते । कृत्वस्सुजंतस्य झित्वात्सुपो झरित्युप् ॥

६३९ ॥ **भेषजादिभ्यष्ट्यण्** । ४ । २ । २८। भेषज इत्येवमादिभ्यः स्वार्थे ट्यण् त्यो वा भवति । भिषज्यतीति भेषजं । भिषजः कंड्वादियगंतत्वात् पचाद्यचि सत्यत्र च निपातनादत एव एप् । भेषजमेव भैषज्यं । अनंतमेवानंत्यं । इतिहत्येव ऐतिह्यं । इतिहेति निसंघात उपदेशपरंपरायां वर्तते । चत्वार एव वर्णाः चातुर्वर्ण्यं । चातुराश्रम्यं । त्रैकाल्यं । शीलमेव शैलीयमाचार्यस्य । कर्मणोऽणिति वर्तते ।

६४० ॥ **प्रज्ञादिभ्यः** । ४ । २ । ५२ । प्रज्ञ इत्येवमादि-

भ्यः स्वार्थे अण् भवति । प्रजानातीति प्रज्ञः । प्रज्ञ एव प्राज्ञः । प्राज्ञी कन्या । प्रज्ञाश्रद्धार्चावृत्तेर्णः" इति मत्वर्थाण्णादस्य स्त्रियां विशेषः । णे त्ये-प्रज्ञा अस्या अस्तीति प्राज्ञा कन्या इति भवति । एवं वणिगेव वाणिजः । मन एव मानसं ।

६४१ ॥ **वर्णात् कारः** । ४ । २ । ५६ । वर्णवाचिनो मृदः कारस्त्यो भवति स्वार्थे । ल एव लकारः । ककारः । हकारः । बहुलमित्यनुवर्तमानात् क्वचिन्न भवति । अभिनिष्ठानो विसर्जनीय इति । क्वचिद्विभाषा-स्यात्कारः, स्याच्छब्दः । एवकारः, एवशब्दः । क्वचिदन्यदेव-रादिफः रेफः । रकारः इति साधुः ।

६४२ ॥ **देवादिभ्यस्त्रेबीभ्यः** । ४ । २ । ८२ । इवंतेभ्यः ईवंतेभ्यश्च देवादिभ्यः स्वार्थे त्रात्यो भवति । देवाँस्तुहि । देवत्रा स्तुहि । देवत्रा गच्छति । मनुष्यत्रा गच्छति । देवेषु वसति देवत्रा वसति । मनुष्यत्रा वसति ॥ इत्यादिसर्वो ह्यद्विधिमहोदधेराधिगंतव्यः ।

इति प्रक्रियावतारे हृद्विधिर्नाम चतुर्थः ॥

अथ मिङधिकारः ।

अथ भवामीत्येवमादिकस्य सामान्याकारेण लोके प्रसिद्धेरनुत्पादविगमात्मकत्वान्नित्यतामवलंबमानस्यान्वाख्यानाय विशेषाकारेण करणसन्निपातोपनीतोत्पादविगमात्मकत्वादनित्यतामादधानस्योत्पत्तये च प्रकृत्यादिप्रक्रियावतारो व्यवहाररूपार्थकालकारकसंप्रतिपत्तये व्याख्येयः । तत्र प्रकृत्यधीनत्वादितरेषां प्रवृत्तेः प्रकृतिरेव तावद् व्याख्यायते । प्रथमं क्रियत इति प्रकृतिः । सा द्विधा, सकर्मकेतरभेदेन । त्रिधा-म-दो-भयवद्भेदेन । सप्तधा-विकरणभेदेन । दशधा-गणभेदेन । तत्र—भू सत्तायां । भू इत्येषा प्रकृतिः सत्तायामर्थे

वर्तते। इत्युक्तार्थत्वात् सत्ताशब्दस्य निवृत्तिः। लोके प्रयोगार्हत्वाद् असत्यामित्संज्ञायामूकारस्यावस्थानं।

६४३ ॥ भूवादयो धुः । १ । २ । १ । भू इत्येवमादयो वा इत्येवंप्रकाराः पाठतोऽर्थतश्च परिच्छिन्नात्मनो धुसंज्ञका भवंति ॥ इति धुसंज्ञा। यद्यप्येवं क्रियावचनस्य धुत्वं सत्ता च द्रव्यधर्मः परिस्पंदरूपो न भवति। तथापि प्रसिद्धक्रियावाचिषु पचत्यादिष्विवात्रापि कालत्रयाभिव्यक्तिदर्शनं। वृक्षादिनामशब्देष्वनुपलभ्यमानं क्रियारूपं बुद्ध्युत्पत्तिनिमित्तं भवतीति धुवाच्या सती सत्ता क्रियाव्यपदेशमर्हतीत्यविरोधः। "धोस्त्यः परः" इत्यनुवृत्तौ त्रिषु कालेषु त्रिषु साधनेषु च यथासंभवं तव्यादिषु प्राप्तेषु वक्तुर्विवक्षापूर्विका शब्दप्रवृत्तिः साध्यानुरूपसाधनोपादानस्य साध्यत्वात् लोकवदिति भवामीत्यादिकस्य निष्पादने ये एव योग्यास्त्यास्त एवोपादीयंते, वर्तमाने काले विवक्षिते लडित्यधिकृत्य—

६४४ ॥ सति । २ । २ । ११९ । सति वर्तमानकाले या क्रिया तद्वाचकाद् धोः परो लट् भवति। स च वर्तमानकालो द्विविधः। परमार्थरूपो व्यवहाररूपश्चेति। तत्र अणोरण्वंतरव्यतिक्रमणसमयविभागरूपः परमार्थरूपः। आरंभात् प्रभृत्या उपरमाद् व्यवहाररूपः। टकारः "टिद्वेटेः" इति विशेषणार्थः। अकारो "विदो लटो वा" इति विशेषणार्थः। कृत् कर्तरीत्यनुवर्तमाने—

६४५ ॥ लः कर्मणि च भावे च धेः । २ । ४ । ५७ । सकर्मकेभ्यो धुभ्यः कर्मणि कर्तरि च लकारा भवंति, धिसंज्ञकेभ्यो भावे च कर्तरि च लकारा भवंति। को धिः ?

६४६ ॥ अकर्मको धिः । १ । २ । २ । अविद्यमानकर्मकोऽविवक्षितकर्मको वा यो धुः स धिसंज्ञको भवति।

तत्र विवक्षातः कर्तरि लकारस्तस्य कृत्त्वात् मृत्संज्ञायां स्वादिः प्राप्तः। वल।देरिडिति इट्, गागयोरित्यप् च। एवमेतेषु विधिषु प्राप्तेषु अनवकाशत्वात्।

६४७ ॥ **लो** । २ । ४ । ६४ । विशेषकाननुबंधानुत्सृज्य सामान्यस्य लकारमात्रस्य स्थाने वक्ष्यमाणा आदेशा भवंति। इत्यधिकृत्य–

६४८ ॥ **मिब्वस्मस्सिप्थस्थतिप्तस्झीड्वहिमहिथासाथांध्वंतातांझङ्** । २ । ४ । ६५ । मिप् वस् मस् सिप् थस् थ, तिप् तस् झि, इट् वहि महि, थास् आथां ध्वं, त आतां झङ् इत्येते आदेशा भवंति। इत्यनियमेन मिङां प्रसंगे नियमः क्रियते।

६४९ ॥ **ङेदितो दः** । १ । २ । ६ । ङकारेत एकारेतश्च धोः परस्य लकारस्य स्थाने द एव भवति।

६५० ॥ **ङौ** । १ । २ । ७ । भावे कर्मणि च द एव भवति। एवं प्रकृत्यर्थनियमे कृते मिङामनियमात् पुनरस्य विशेषेण प्राप्ताविदमुच्यते।

६५१ ॥ **मं** । १ । २ । ८९ । यत्र मं च दश्च प्राप्नोति तत्र ममेव भवति। किं मं ?

६५२ ॥ **लो मं** ॥ १ । २ । १७७ । लस्य स्थाने विधीयमाना आदेशा मसंज्ञका भवंति। लो मं, इङानं दः इति चानुवर्तमाने–

६५३ ॥ **मिङस्त्रिशोऽस्मद्युष्मदन्याः** । १ । २ । १७९ । मसंज्ञकस्य दसंज्ञकस्य च मिङस्त्रीणि त्रीणि वचनानि यथासंख्यं अस्मद् युष्मद् अन्य इत्येवं संज्ञकानि भवंति। मिप् वस् मस् इत्य-

स्मद् । सिप् थस् थ इति युष्मद् । तिप् तस् झि इत्यन्यः । दस्य खल्वपि-इट् वहि महि इत्यस्मद् । थास् आथां ध्वं इति युष्मद् । त आतां झङ् इत्यन्यः ।

६५४ ॥ एको द्विर्बहुश्चैकशः । १ । २ । १८३ । तेषां अस्मदयुष्मदन्यसंज्ञकानां त्रिकाणमिकैक एको द्विर्बहुरित्येवं संज्ञो भवति । मिबित्येकः । वसिति द्विः । मसिति बहुः । एवं शेषाणामपि योज्यं । तेषां संकरेण प्राप्तौ सत्यां नियमः क्रियते ।

६५५ ॥ साधने स्वार्थे । १ । २ । १८० । तेऽस्मदादयः एकादयश्च स्वार्थे साधने भवंति । अस्मत्पदस्यार्थे साधने अस्मत्त्रिक भवति । युष्मत्पदस्यार्थे साधने युष्मत्त्रिकं भवति । आभ्यामन्यस्य पदस्यार्थे साधने अन्यत्त्रिकं भवति । तथा एकत्वविशिष्टेऽर्थे साधने एको मिप् भवति । एवमितरत्रापि योज्यं । पकारा इत्संज्ञा गे पीति विशेषणार्थाः । यत्त्ये तदादि गुरिति पूर्वस्य गुसंज्ञा ।

६५६ ॥ मिङ्शिद् गः । २ । ४ । ९४ । धोर्विहितो यो मिङ् शिच्च स गसंज्ञो भवति । इति परस्य गसंज्ञा । गागयेरित्येप प्राप्तः " नेटः " इति वर्तमाने—सभ्वोऽथस्य मिङीति प्रतिषिद्धः । गे यागति वर्तमाने—

६५७ ॥ कर्तरि शप् । २ । १ । ८१ । कर्तृवाचिनि गे परतो धोः परतः शबित्ययं त्यो भवति ।

६५८ ॥ ईप्केत्यासन्नः प्राक्परयोः । १ । १ । ६९ । इबर्थो यत्र निर्दिश्यते तत्र पूर्वस्यासन्नस्य कार्यं भवति । कार्थो यत्र निर्दिश्यते तत्र परस्यासन्नस्य कार्यं भवति । इति पूर्वपरयोः स्थाने

निर्ज्ञाते-अनवकाशत्वादीपिनिर्देशस्य पूर्वस्य स्थाने प्राप्ते त्यः पर एवेति नियमात् पूर्वपरयोर्मध्ये विकरणत्वात् भवति। शकारो मिङ् शिद्गः,, इति विशेषणार्थः। पकारो गेऽपीति विशेषणार्थः। तस्मिन् पूर्वस्य यणादेशः प्राप्तः। बाधित्वा तं उवादेशः प्राप्तः। तमपि बाधित्वा परत्वादेप् प्राप्तः। येन नाप्राप्तिस्तद्बाधनमिति यणमेव पुनरप्यनङ्गादौ सावकाशमेपं बाधित्वा उवादेश एव प्राप्तः। मध्येऽपवादाः पूर्वान् विधीन् बाधंते नोत्तरानिति यणमेवोवादेशो बाधते न पुनरेपं। अतः मिदेरेबिति वर्तमाने-गागयेरित्येप् एकः स्थाने भवति। स्वासन्न इत्युकारस्यौकारः। अवादेशः। गोरिति "सूभ्वोऽथस्य मिङि" इति च प्रस्तुत्य—

६५९ ॥ यञ्यतो दीः। ५। २। १०५। यञादौ मिङि परतो गोरकारांतस्य दीर्भवति। गोरिति वर्तमाने—

६६० ॥ झोऽन्तः। ५। १। ३। झ इत्येतस्य गोर्निमित्तभूतस्य त्यावयवस्य अंत इत्ययमादेशो भवति। स चानजंतादेशः। नकारस्यानुस्वारपरस्वत्वे "एप्यतः" इति अकारस्य परस्वत्वं। सुम्मिङंतं पदमिति मिङंतस्य पदसंज्ञायां पूर्ववद् रित्वविसर्जनीयौ। भवामि। भवावः। भवामः। भवसि। भवथः। भवथ। भवति। भवतः। भवंति। यथैव ह्येकादिशब्दप्रयोगे सत्यसति चैकादयो भवंति। तथा अस्मदादिशब्दप्रयोगे सत्यसति चास्मदादयः। तेन-केवलोऽपि प्रयोगस्तैस्सह च भवति। यथा-अहं भवामि। आवां भवावः। वयं भवामः। त्वं भवसि। युवां भवथः। यूयं भवथ। स भवति। तौ भवतः। ते भवंति। यत्र चास्मदादिपदं प्रयोक्तुं शक्यते तत्रास्मदादयो नान्यत्र। यथा-भवान् भवति। भवंतौ भवतः। भवंतो भ-

वंति। अत्र हि युष्मच्छब्दपर्यायस्य भवच्छब्दस्य प्रयोगे युष्मच्छब्दस्य प्रयोक्तुमशक्यत्वात् सिप्थसूथा न भवंति।

६६१॥ पूर्वः सहोक्तौ।१।२।१८१। युगपद्वचनेऽस्मदादीनां पदापेक्षया यः पूर्वः स भवति। स च त्वं च भवथः। त्वं चाहं च भवावः। स च त्वं च अहं च भवामः। एवं नित्यं मे प्राप्तेऽर्थविशेषणो दो विधीयते। तत्रार्थविशेषाभिव्यक्तये "गेर्द्योयत् कार्यं तदंतरंगमिति धुगिना युज्यते पश्चात् साधनवाचिना त्येनेति कर्मव्यतिहाराभिव्यक्त्यर्थमतिरित्ययं गिर्धोः प्राक् प्रयुज्यते। अतिविशिष्टां क्रियां विर्विशिनष्टि इति विरत्ययं च गिः। ताभ्यां सुपः। झरित्युप्। यणादेशः। व्यतिभू इत्यतः पूर्ववल्लट्। तस्य "ङेदितो दः" इत्यधिकृत्य—

६६२॥ कर्तरि ञे।१।२।८। ञार्थे वर्तमानात् धोः परस्य कर्तरि विहितस्य लस्य स्थाने दो भवति। कः पुनः ञार्थः।

६६३॥ कर्मव्यतिहारे ञः।२।३।८९। कर्मव्यतिहारेऽर्थे ञस्त्यो भवति। इति विहितः। तत्र शब्दे कार्यस्यासंभवात् अर्थे कार्यं विज्ञास्यते। इति ञार्थः कर्मव्यतिहारः कृतस्य प्रतिकरणं ग्रहस्य प्रतिग्रहणं हरणस्य प्रतिहरणमित्यर्थः। को दः ?

६६४॥ इङानं दः।१।२।१७८। इङिति प्रत्याहारः आन इति स्वरूपग्रहणं। तौ दसंज्ञौ भवतः। इति। इट् वहि महि, थास् आथां ध्वं, त आतां झङ्, इत्येते आदेशा भवंति पूर्ववदस्मदाद्येकत्वादिनियमः। टकारः "रन्नज्झेटः" इति विशेषणार्थः। ङकारः प्रत्याहारार्थः।

६६५॥ टिद्देटेः।२।४।६६। टितो लकारस्य

स्थाने विहितस्य दस्य टेरेकारो भवति। यत्र एक एवाच् तत्र व्यपदेशिवद्भाविनांत्यादित्वे सति टित्वं।

६६६ ॥ थासः सेः। २। ४। ६७। टितो लकारस्य स्थाने विधीयमानस्य थासः से इत्ययमादेशो भवति। शबेबवादेशाः। यञ्यतो दीरिति दीत्वं। अतो येयित्यधिकृत्य-

६६७ ॥ आतोऽपः। ५। १। १५६। गोरकारांतादुत्तरस्य पिद्वर्जितस्य आकारस्य इयादेशो भवति। इत्याथे आते इत्यनयोराकारस्य इयादेशः।

६६८ ॥ व्योः खं वल्कौ। ४। ३। ६३। वकारयकारयोः खं भवति त्यावयवे त्यकार्ये च वलि कौ च परतः। इति यकारस्य खं। आदेबित्येप्। झोऽत इत्यंतादेशः। इटि च एप्यत इति पररूपं। व्यतिभवे। व्यतिभवावहे। व्यतिभवामहे। व्यतिभवसे। व्यतिभवेथे। व्यतिभवध्वे। व्यतिभवते। व्यतिभवेते। व्यतिभवंते। एधै वृद्धौ। ऐकारोऽप्रयोगी दार्थः। ततः "सति" इति लट् पूर्ववन्नीतिः। एधे, एधावहे, एधामहे। एधसे, एधेथे, एधध्वे। एधते, एधेते, एधंते। डुपचाञ् पाके। डुशब्दपकाराकारञकारा इतः। ततो लडादयः। पचामि। पचावः। पचामः। पचसि। पचथः। पचथ। पचति। पचतः। पचंति। कर्त्रोप्यफलविवक्षायां-

६६९ ॥ ञितः फलेशे। १। २। ८१। ञकारेतो धोः परस्य फले कर्तरि वर्तमानस्य लस्य दो भवति। शेषं पूर्ववत्। पचे। पचावहे। पचामहे। पचसे। पचेथे। पचध्वे। पचते। पचेते। पचंते। तेभ्य एव धुभ्यः "त्यः,, व्यऽभौ भ्वो भूते" इति वर्तमाने—

६७० ॥ अनद्यतने लङ् । २ । २ । १०९ । आन्याय्यादुत्थानादान्याय्यात् संवेशनादेषोऽद्यतनः कालः । अहरुभयतोऽर्द्धरात्रं वा । न विद्यतेऽद्यतनोऽस्मिन् स तथा । तस्मिन् भूते वर्तमानात् धोर्लङ् भवति । ङकारो "ङितः सखं" इति विशेषणार्थः । लकारो लुङ्लङ्लृङिति विशेषणार्थः । लस्य पूर्ववन्मविधिः ।

६७१ ॥ मिप्थस्थतसोऽमंतंतताम् । २ । ४ । ८४ । ङितो लकारस्य स्थाने विहितानां मिप् थस् थ तस् इत्येतेषां यथासंख्यं अम् तम् त ताम् इत्येते आदेशा भवंति ।

६७२ ॥ ङितः सखं । २ । ४ । ८२ । अस्मदूसञ्ज्ञकस्य ङितः सकारस्य खं भवति । इत्यंत्यसकारस्य खं ।

६७३ ॥ एर्म्मे । २ । ४ । ८३ । ङितो लकारस्य सिप्तिबझीनामिकारस्य खं भवति । पूर्ववच्छ्वेबवादेशाः । यञ्यतोदीरिति दीत्वं ।

६७४ ॥ लुङ्लङ्लृङ्व्यमाङाट् । ४ । ४ । ७४ । लुङ्लङ्लृङ्विषये गोरडागमो भवति न चेन्माङ् प्रयुज्यते । टकाराट्टिदादिरिति विशेषणार्थः । अभवं । अभवाव । अभवाम । अभवः । अभवतं । अभवत । अभवत् । अभवतां । अभवन् । स्फांतस्य खमिति तकारस्य खं । ङितो लस्यादेशेषु टित्त्वाभावात् "टिद्टेरे" रित्यादि नास्ति । पूर्ववदन्यत् नीतिः । व्यत्यभवे । व्यत्यभवावहि । व्यत्यभवामहि । व्यत्यभवथाः । व्यत्यभवेथां । व्यत्यभवध्वं । व्यत्यभवत । व्यत्यभवेतां । व्यत्यभवंत ॥ अचीति वर्तमाने—

६७५ ॥ अटश्च धौ । ४ । ३ । ९० । अट ऐवेव भवत्यजादौ धौ परतः । इत्येप् । ऐधे । ऐधावहि । ऐधामहि । ऐधथाः

ऐधेथां । ऐधध्वं । ऐधत । ऐधेतां । ऐधंत ॥ अपचं । अपचाव । अपचाम । अपचः । अपचतं । अपचत । अपचत् । अपचतां । अपचन् । अपचे । अपचावहि । अपचामहि । अपचथाः । अपचेथां । अपचध्वं । अपचत । अपचेतां । अपचंत । तेभ्य एव धुभ्यः—

६७६ ॥ विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थने लिङ् २ । ३ । १५२ । विधिर्नियोगः । अज्ञातज्ञापनमित्येके । निमंत्रणं नियोगतः कर्तव्यं । क्रियास्वाभिमुख्यकरणमित्येके । आमंत्रणं यत्कामचारतः कर्तव्यं । कर्तव्येष्वनुज्ञापनमित्येके । अधीष्टः सत्कारपूर्विका व्यापारणा । सप्रश्नः संप्रसारणा बुभुत्सावेदनं । प्रार्थना याच्ञा । एतेषु त्यार्थविशेषणेषु धोर्लिङ् भवति । ङकारो ङितः सखमिति विशेषणार्थः । इकारः "लेः सीयुङ्" इति विशेषणार्थः । पूर्ववल्लस्य मिबादयः । ङितः सखमित्यादिकार्यं शबवदेशाश्च । लेः सीयुडिति प्राप्ते—

६७७ ॥ ङ्यासुण्मे । २ । ४ । ८६ । मविषये लिङादेशानां ङ्यासुडागमो भवति । टकारो देशविध्यर्थः । उकार उच्चारणार्थः । ङकारो ङित्कार्यार्थः ।

६७८ झेर्जुस् । २ । ४ । ९० । लिङादेशस्य झेर्जुसादेशो भवति ॥ जकारो जुसीति विशेषणार्थः । "रुद्भ्यो गे" इत्यधिकृत्य—

६७९ ॥ लिङोऽनंत्यसखं । ५ । १ । १५३ । गविषये लिङोनंत्यस्य सकारस्य खं भवति । इति ङ्यासुटः सखं ।

६८० ॥ अतो येय् । ५ । १ । १५४ । गोरकारांतात् परस्य या इत्येतस्य इयादेशो भवति । वलादौ "व्योः ख वल्की,,

इति यत्वं, आदेप् । पूर्ववन्नीतिः । भवेयं । भवेव । भवेम । भवेः । भवेतं । भवेत । भवेत् । भवेतां । भवेयुः ॥ दविधौ–

६८१ ॥ **लेः सीयुट्** । २ । ४ । ८५ । लिङादेशानां सीयुडागमो भवति । पूर्ववदितो निवृत्तिः ।

६८२ ॥ **रन्नज्झेटः** । २ । ४ । ८८ । लिङादेशयोः झ इट् इत्येतयोः यथासंख्यं रन् अत् इत्येतावादेशौ भवतः । तकारस्तपरार्थः । शबबत्वादेशश्च । वलादौ सीयुटो यलोपः च । व्यतिभवेय । व्यतिभवेवहि । व्यतिभवेमहि । व्यतिभवेथाः । व्यतिभवेयाथां । व्यतिभवेध्वं । व्यतिभवेत । व्यतिभवेयातां । व्यतिभवेरन् ॥ एधेय । एधेवहि । एधेमहि । एधेथाः । एधेयाथां । एधेध्वं । एधेत । एधेयातां, एधेरन् । पचेयं । पचेव । पचेम । पचेः । पचेतं । पचेत । पचेत् । पचेतां । पचेयुः । पचेय । पचेवहि । पचेमहि । पचेथाः । पचेयाथां पचेध्वं । पचेत । पचेयातां । पचेरन् । तेभ्य एव धुभ्यो विधिनिमंत्रणेत्यादीनधिकृत्य–

६८३ ॥ **लोट्** । २ । ३ । १५३ । त्यार्थविशेषणेषु विध्यादिषु धोर्लोट् भवति । टकारष्टित्कार्यार्थः । ओकारो लोटो लङ्वदिति विशेषणार्थः । तस्य मिबादयः । लोटो लङ्वदित्यतिदेशो ङितः सखमित्यादिकार्यं । एमें इति खे प्राप्ते–अनवकाशत्वात्–

६८४ ॥ **एरुः** । २ । ४ । ७५ । लोडादेशस्य इकारस्य उकारादेशो भवति । मेर्निरिति निरादेशः ।

६८५ ॥ **सेर्हिङित्** । २ । ४ । ७६ । लोडादेशस्य सेर्हिरादेशो भवति स च ङिद्वत् भवति ।

६८६ ॥ **टाबस्मदः** । २ । ४ । ८० । लोडादेशस्या-

स्मदः टाबागमो भवति। टपावितौ पूर्ववद् प्रयोजयतः। शबेबवादेशाः। स्वेको दीः। ञरुबिति वर्तमाने—

६८७ ॥ अतो हेः। ४। ४। १०३। गोरकारांतात् परस्य हेरुब्भवति। भवानि। भवाव। भवाम। भव। भवतं। भवत। भवतु। भवतां। भवंतु। दविधौ—टिइटेरेरित्येत्वं। थासः सेभावः।

६८८ ॥ आमेतः। २। ४। ७८। लोडादेशस्य एकारस्य आमादेशो भवति।

६८९ ॥ स्वो वाऽम्। २। ४। ७९। लोटः सकारवकाराभ्यां परस्य एकारस्य यथासंख्यं व अम् इत्येतावादेशौ भवतः। अस्मदष्टाप्।

६९० ॥ एत ऐ। २। ४। ८१। लोडादेशस्यास्मद एकारस्य ऐकारादेशो भवति। व्यतिभवै। व्यतिभवावहै। व्यतिभवामहै। व्यतिभवस्व। व्यतिभवेथां। व्यतिभवध्वं। व्यतिभवतां। व्यतिभवेतां। व्यतिभवंतां। एधै। एधावहै। एधामहै। एधस्व। एधेथां। एधध्वं। एधतां। एधेतां। एधंतां। पचानि। पचाव। पचाम। पच। पचतं। पचत। पचतु। पचतां। पचंतु। पचै। पचावहै। पचामहै। पचस्व। पचेथां। पचध्वं। पचतां। पचेतां। पचंतां। आशीरर्थविवक्षायां—

६९१ ॥ लोट् चाशिषि। २। ३। १६४। धोः परो लोड् भवति चाशिषि गम्यमानायां। किमाशीः? भावीष्टार्थशंसनमाशीः। अत एव वर्त्स्यत्कालसामान्ये विधिः। पूर्ववच्छेषं।

६९२ ॥ तुह्योस्तातङ् वा। २। ४। ९९। तु हि इत्येतयोः लोडादेशयोराशिर्विषययोः ङ्तादित्ययमादेशो भवति। ङकारः

ङित्कार्यार्थः । भवानि । भवाव । भवाम । भवतात् त्वं । भव त्वं । भवतं । भवत । भवतात् भवान् । भवतु भवान् । भवतां । भवंतु । एवं-पचतात् त्वं । पच त्वं । पचतात् भवान् । पचतु भवान् ॥ टुनदि समृद्धौ । इकारटुशब्दावितौ । इदितोर्नुम् । मकारो देशविध्यर्थः । उकार उच्चारणार्थः । ततः पूर्ववल्लुडादयः । नंदामि । नंदावः । नंदामः । इत्यादयः ॥ ध्वंसुङ् गतौ । ङकारोकारावितौ । नश्चापदांते झलीत्यनुस्वारः । ङित्त्वाद् "ङेदितो दः" इति दो भवति । ध्वंसे । ध्वंसावहे । ध्वंसामहे । इत्यादि ॥ व्येञ् संवरणे । व्ययामि । व्ययावः । व्ययामः । इत्यादि । ञित्त्वात् "ञितः फलेशे" इति दः । व्यये । व्ययावहे । व्ययामहे ॥ लङि—अनंदं । अनंदाव । अनंदाम । इत्यादि । अध्वंसे । अध्वंसावहि । अध्वंसामहि ॥ इत्यादि ॥ अव्ययं' अव्ययाव । अव्ययाम इत्यादि । अव्यये । अव्ययावहि । अव्ययामहि ॥ लिङि—नंदेयं । नंदेव । नंदेम । इत्यादि ॥ ध्वंसेय । ध्वंसेवहि । ध्वंसेमहि ॥ इत्यादि । व्ययेयं । व्ययेव । व्ययेम । इत्यादि । व्ययेय । व्ययेवहि । व्ययेमहि । इत्यादि ॥ लोटि—नंदानि । नंदाव नंदाम । इत्यादि । ध्वंसै । ध्वंसावहै । ध्वंसामैह । इत्यादि । व्ययानि । व्ययाव । व्ययाम । इत्यादि । व्ययै । व्ययावहै । व्ययामहै इत्यादि ॥ इति भ्वादिः ।

हु दानादनयोः । पूर्ववल्लुडादयः । मध्ये कर्तरि शप् । तस्य—

६९३ ॥ हृदादेरुलुप् । २ । १ । ८२ । ह्वादेरदादेश्च परस्य शपो यथासंख्यं उल् उप् इत्येतावादेशौ भवतः । इत्युल् । पित्सु द्वित्वात् परत्वेन गागयोरित्येप् । वसादावपि "गेऽपि" इति ङित्वादेप् न भवति । पश्चात्—

६९४ ॥ लिडुल्चकाचि धोः । ४ । ३ । १२ । लिटि उ-

चि कचि च परतो धोरादेरेकाचो द्वे रूपे भवतः । इति द्वित्वं-

६९५ ॥ **पूर्वश्चः** । ४ । ३ । ११ । तयोर्द्विरुक्तयोर्यः पूर्वः स चसंज्ञो भवति । चस्येत्यधिकृत्य-

६९६ ॥ **प्रः** ५ । २ । १८२ । चस्य प्रादेशो भवति । इति चस्य प्रः ।

६९७ ॥ **कुह्वोश्चुः** ५ । २ । १८७ । चसंबंधिनः कवर्गस्य हकारस्य च चवर्गो भवति । इति हकारस्यासन्नो झकारः । झषो जश्,, इति जकारः । "थः" इति थसंज्ञायां—

६९८ ॥ **थादत्** ५ । १ । ४ । झस्यादादेशोभवत्यंतापवादः । "होर्गे वः" । इत्युवादेशापवादो वकारः । जुहोमि । जुहुवः । जुहुमः । जुहोषि । जुहुथः । जुहुथ । जुहोति । जुहुतः । जुह्वति । व्यतिजुह्वे । व्यतिजुहुवहे । व्यतिजुहुमहे । व्यतिजुहुषे । व्यतिजुह्वाथे । व्यतिजुहुध्वे । व्यतिजुहुते । व्यतिजुह्वाते । व्यतिजुह्वते ॥ ओहाङ् गतौ ॥ ततो लडादयः "चस्य,, उचीति च वर्तमाने–शबुचाद्वित्वादिः ।

६९९ ॥ **भृञ्हाङ्माम्भिः** । ५ । २ । १९८ । भृञ् हाङ् माङ् इत्येतेषामुचि चस्येकारादेशो भवति । "गेऽतः क्ङिति" वर्तमाने—

७०० ॥ **थश्नोरातः** । ४ । ४ । १०९ । थसंज्ञकस्य श्ना इत्येतस्य-चाकारस्य खं भवति क्ङिति गे परतः । उत्तरत्र हलीति वचनात् इहाचि संप्रत्ययः । अभोरित्युत्तरत्र वर्जनात् हल्यपि भुसंज्ञकानां खं ।

७०१ ॥ **हल्यभोरीः** । ४ । ४ । ११० । भुसंज्ञकवर्जितस्य थस्य श्ना इत्येतस्य चाकारस्य ईकारादेशो भवति हलादौ क्ङिति परतः , जिहे , जिहीवहे ' जिहीमहे ' जिहीषे , जिहीथे '

जिहीध्वे । जिहीते । जिहाते । जिहते ॥ डुधाञ् धारणे च । डुञा-वितौ । अतो लडादयः । शप उचि द्वित्वादिः । झषो जशिति जस्त्वं, थश्नोरात इत्यात्वं। एकाचो बशो भष् झषःस्ध्वोरित्यधिकृत्य-

७०२ ॥ धः । ८ । ३ । ७४ । झषंतस्य दधातेर्बशो भष् भवति झलि परतः । इति दस्य भष्भावः । दधामि । दध्वः । दध्मः । दधासि । धत्थः । धत्थ । दधाति । धत्तः । दधति । दधे । दध्वहे । दध्महे । धत्से । दधाथे । धध्वे । धत्ते । दधाते । दधते ॥ लङि-झेर्जुसित्यधिकृत्य-

७०३ ॥ थवित्सेः । २ । ४ । ९१ । थसंज्ञकाद् विदः सेश्च परस्य झेर्जुसादेशो भवति ।

७०४ ॥ जुसि । ५ । २ । ९० । जुसि परतः इगंतस्य गोरेभवति । इत्येप् । अजुहवं । अजुहुव । अजुहुम । अजुहोः । अजुहुतं । अजुहुत । अजुहोत् । अजुहुतां । अजुहवुः । व्यत्यजुह्वि । व्यत्यजुहुवहि । व्यत्यजुहुमहि । व्यत्यजुहुथाः । व्यत्यजुह्वाथां । व्य-त्यजुहुध्वं । व्यत्यजुहुत । व्यत्यजुह्वातां व्यत्यजुह्वत ॥ अजिहि । अजिहीवहि । अजिहीमहि । अजिहीथाः । अजिहाथां । अजि-हीध्वं । अजिहीत । अजिहातां । अजिहत ॥ अदधं । अदध्व । अदध्म । अदधाः । अधत्तं । अधत्त । अदधात् । अधत्तां । अदधुः । अदधि । अदध्वहि । अदध्महि । अधत्थाः । अदधाथां । अधद्ध्वं । अधत्त । अदधातां । अदधत ॥ लिङि—जुहुयां । जुहुयाव । जुहुयाम । जुहुयाः । जुहुयातं । जुहुयात । जुहुयात् । जुहुयातां । जुहुयुः । उस्यपदे" इत्याकारस्य पररूपत्वं । व्यतिजुह्वीय । व्यतिजुह्वीवहि । व्यतिजुह्वीमहि । व्यतिजु-ह्वीथाः। व्यतिजुह्वीयाथां। व्यतिजुह्वीध्वं । व्यतिजुह्वीतव्यतिजुह्वीयातां।

व्यतिजुह्वीरन् ॥ जिहीय । जिहीवहि । जिहीमहि । जिहीथाः । जिहीयाथां । जिहीध्वं । जिहीत । जिहीयातां । जिहीरन् ॥ विपूर्वडुधाञ् । विदध्यां । विदध्याव । विदध्याम । विदध्याः । विदध्यातं । विदध्यात । विदध्यात् । विदध्यातां । विदध्युः । विदधीय । विदधीवहि । विदधीमहि । विदधीथाः । विदधीयाथां । विदधीध्वं । विदधीत । विदधीयातां । विदधीरन् ॥ लोटि—

७०५ ॥ झल्ह्रोर्हेर्धिः । ४ । ४ । १०१ । झलंतात् हु इत्येतस्माच्च गोः परस्य हेर्धिरादेशो भवति । जुहवानि । जुहवाव । जुहवाम । जुहुधि । जुहुतं । जुहुत । जुहोतु । जुहुतां । जुह्वतु । आशिषि-जुहुधि जुहुतात् वा । जुहोतु । जुहुतात् वा । व्यतिजुहवै । व्यतिजुहवावहि । व्यतिजुहवामहि । व्यतिजुहुष्व । व्यतिजुह्वाथां । व्यतिजुहुध्वं । व्यतिजुहुतां । व्यतिजुह्वातां । व्यतिजुह्वतां जिहै । जिहावहि । जिहामहि । जिहीष्व । जिहाथां । जिहीध्वं । जिहीतां । जिहातां । जिहतां ।

७०६ ॥ भ्वसो हेच्चखे । ४ । ४ । ११६ । भुसंज्ञकस्यास्तेश्च धोर्हकारादौ हौ परतः एत्वं भवति चस्य च खं । दधानि दधाव । दधाम । धेहि । धत्ताद् वा । धत्तं । धत्त । दधातु । धत्तात् । वा । धत्तां । दधतु । दधै । दधावहै । दधामहै । धत्स्व । दधाथां । धद्ध्वं । धत्तां । दधातां । दधतां । इति ह्वादिः ।

अदो भक्षणे । ओकारोऽनिडर्थः । पूर्ववल्लडादिषु कृतेषु मध्ये कर्तरि शप् । तस्य ह्वदादेरुजुबित्युप्—

७०७ ॥ चर्खरि । ४ । ४ । १५५ । झलां चर् भवति खरि परे । इति चर्त्वे । अद्मि । अद्वः । अद्मः । अत्सि । अत्थः । अत्थ । अत्ति । अत्तः । अदंति । झोऽन्तः । "थादत्" इति प्रस्तुत्य—

७०८ ॥ देऽनतः । ५ । १ । ५ । दाविषयस्यानकारांताद्धोः

परस्य झस्य अदित्ययमादेशो भवति । व्यत्यदे । व्यत्यद्वहे । व्यत्यद्महे । व्यत्यत्से । व्यत्यदाथे । व्यत्यद्ध्वे । व्यत्यत्ते । व्यत्यदाते । व्यत्यदते ॥ शीङ् स्वप्ने । ङकारो दार्थः । पूर्ववल्लडादिः ।

७०९ ॥ **शीङो गे** । ५ । २ । १४४ । शीङः एप् भवति गे परतः । इत्यकारः ।

७१० ॥ **शीङो रत्** । ५ । १ । ६ । शीङः परस्य झस्य रदादेशो भवति । शये । शेवहे । शेमहे । शेषे । शयाथे । शेध्वे । शेते । शयाते । शेरते ॥ ब्रूञो व्यक्तायां वाचि । ञकारो कारावितौ । पूर्ववल्लडादिषु—थस्य गे पित्यर्चात्यधिकृत्य—

७११ ॥ **ब्रुव ईट्** । ५ । २ । १०१ । ब्रू इत्येतस्माद् परस्य हलादेः पितो गस्येडागमो भवति । ब्रवीमि । ब्रूवः । ब्रूमः । ब्रवीषि । ब्रूथः । ब्रूथ ॥ ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रुवे । ब्रूवहे । ब्रूमहे । ब्रूषे । ब्रुवाथे । ब्रूध्वे । ब्रूते । ब्रुवाते । ब्रुवते ।

७१२ ॥ **ब्रुव आहश्च** । २ । ४ । ७२ । ब्रुवः परस्य लटो मानां णशादयो भवंति वा तत्संनिधाने च ब्रुव आहश्चादेशः । अकार उच्चारणार्थः ।

७१३ ॥ **न थास्मदः** । २ । ४ । ७३ । ब्रुवः परस्य लटो मानां थस्यास्मदश्च ये प्राप्ता आदेशास्ते न भवंति । तत्संनियोगशिष्ट आहादेशश्च । सिपस्थे कृते—झलो झलीति वर्तमाने—

७१४ ॥ **आहस्थः** । ५ । ३ । ७० । ब्रू आदेशस्याहः थकारादेशो भवति झलि परतः । पुनश्चर्त्वं । ब्रवीमि । ब्रूवः । ब्रूमः । आत्थ । आहथुः । ब्रूथ । आह । आहतुः । आहुः । लङि—

७१९ ॥ रुद्भ्योऽट् चादोट् । ५ । २ । १०४ ।

रुदादिभ्यो जक्षपर्यंतेभ्यः केवले हालि पिति गे परतः अडागमो भवति ईट् च । अदेः पुनरडेव भवति । इत्यदेरट् । टकारो देश विध्यर्थः । लुङ्लङ्लृङ् इत्यट् । अटश्चेत्यैप् । आदं, आद्व । आद्म । आदः । आत्तं । आत्त । आदत् । आत्तां । आदन् ॥ व्यत्यादि । व्यत्याद्वहि । व्यत्याद्महि । व्यत्यात्थाः । व्यत्यादाथां । व्यत्याद्ध्वं । व्यत्यात्त । व्यत्यादातां । व्यत्यादत । अशयि । अशेवहि । अशेमहि । अशेथाः । अशयाथां । अशेध्वं । अशेत । अशयातां । अशेरत ॥ अब्रुवं । अब्रूव । अब्रूम । अब्रवीः । अब्रूतं । अब्रूत । अब्रवीत् । अब्रूतां । अब्रुवन् ॥ अब्रवि । अब्रूवहि । अब्रूमहि । अब्रूथाः 'अब्रुवाथां ।अब्रूध्वं । अब्रूत । अब्रुवातां अब्रुवत । लिङि-अद्यां । अद्याव । अद्याम । अद्याः । अद्यातं । अद्यात । अद्यात् । अद्यातां । अद्युः । उस्यपद इति पररूपं । व्यत्यदीय । व्यत्यदीवहि । व्यत्यदीमहि । व्यत्यदीथाः । व्यत्यदीयाथां । व्यत्यदीध्वं । व्यत्यदीत । व्यत्यदीयातां । व्यत्यदीरन् । शयीय । शयीवहि शयीमहि । शयीथाः । शयीयाथां । शयीध्वं । शयीत । शयीयातां । शयीरन् । ब्रूयां । ब्रूयाव । ब्रूयाम । ब्रूयाः । ब्रूयातं । ब्रूयात । ब्रूयात् । ब्रूयातां । ब्रूयुः । ब्रुवीय । ब्रुवीवहि । ब्रुवीमहि । ब्रुवीथाः । ब्रुवीयाथां । ब्रुवीध्वं । ब्रुवीत ब्रुवीयातां । ब्रुवीरन् ॥ लोटि – सेर्हिभावे धिभावे च-अदानि । अदाव । अदाम, अद्धि । अत्तात् वा । अत्तं । अत्त । अत्तु । अत्तात् वा । अत्तां अदंतु । व्यत्यदै । व्यत्यदावहै । व्यत्यदामहै । व्यत्यत्स्व । व्यत्यदाथां व्यत्यद्ध्वं । व्यत्यत्तां । व्यत्यदातां । व्यत्यदतां । शयै । शयावहै । शयामहै । शेष्व । शयाथां । शेध्वं । शेतां । शयातां । शेरतां । से-

र्हित्वं ङित्वं च। ब्रुवाणि। ब्रुवाव। ब्रुवाम। ब्रूहि ब्रूतात्। ब्रूतं ब्रूत। ब्रवीतु। ब्रूतात् वा। ब्रूतां। ब्रुवंतु। ब्रवै। ब्रवावहै। ब्रवामहै। ब्रूष्व। ब्रुवाथां ब्रूध्वं। ब्रूतां ब्रुवातां। ब्रुवतां॥ इत्यदादिः॥

दिवु क्रीडाजयेच्छापणिद्युतिगातिषु। उकारो वेडर्थः। पूर्ववल्लुडादयः। दिवादेः श्यः। इति मध्ये श्यः। शपोऽपवादः। शकारः शित्कार्यार्थः। तेन "घ्युङः" इत्येप न भवति "हल्यभकुर्च्छुरः" इति दीर्त्वं। दीव्यामि। दीव्यावः। दीव्यामः इत्यादि। व्यतिदीव्ये। व्यतिदीव्यावहे। व्यतिदीव्यामहे। इत्यादि। ऊषूङो प्राणिप्रसवे। ऊकारौकारङकारा इतः। घ्वादेः ष्णोऽष्ठ्याष्ठिवष्वस्कः स्वमिति षकारस्य सकारः। सूये। सूयावहे। सूयामहे। इत्यादि। णहौञ् बंधने। औकारञकाराविती। घ्वादेः ष्ण इत्यादिना णकारस्य नकारः। नह्यामि। नह्यावः। नह्यामः। इत्यादि। नह्ये। नह्यावहे। नह्यामहे इत्यादि। लङि—प्राग् धोः सम्प्रयोगः। समदीव्यं। समदीव्याव। समदीव्याम। इत्यादि। व्यत्यदीव्ये। व्यत्यदीव्यावहि। व्यत्यदीव्यामहि। इत्यादि। प्रपूर्वो दीत्वं। प्रासूये। प्रासूयावहि। प्रासूयामहि। इत्यादि। समनह्यं। समनह्याव। समनह्याम। इत्यादि। समनह्ये। समनह्यावहि। समनह्यामहि इत्यादि। लिङि-दीव्येयं। दीव्येव। दीव्येम। इत्यादि। व्यतिदीव्येय। व्यतिदीव्येवहि। व्यतिदीव्येमहि। इत्यादि। प्रसूयेय। प्रसूयेवहि। प्रसूयेमहि। इत्यादि. संनह्येयं। संनह्येव। सनह्येम। इत्यादि। सन्नह्येय। सन्नह्येवहि। सन्नह्येमहि। इत्यादि। लोटि-परिपूर्वः। परिदीव्यानि। परिदीव्याव परिदीव्याम। इत्यादि। व्यतिदीव्यै। व्यतिदीव्यावहै। व्यतिदीदीव्यामहै। इत्यादि। प्रसूयै। प्रसूयावहै। प्रसूयामहै। इत्यादि

७१६॥ य्यंतरोऽदुरो विकृतः। ५। ४। ११६।

दुर्वर्जिताद् गेरंतःशब्दाच्च परस्य विकृतेर्नकारस्य णकारो भवति। इति णत्वं। परिणह्यानि। परिणह्याव। परिणह्याम। इत्यादि। परिणह्यै। परिणह्यावहै। परिणह्यामहै। इत्यादि। इति दिवादिः॥

षूञ् अभिषवे। मंथनं पीडिनं वाऽभिषवः। ञकार इत्। ध्वादेः ष्ण इत्यादिना सकारः। पूर्ववल्लडादयः।

७१७॥ स्वादेः श्नुः। २। १। ८७। स्वादिभ्यो धुभ्यः कर्तरि गे परतः श्नुर्विकरणो मध्ये भवति। शकारः शित्कार्यार्थः। तेन–गे पीति ङिद्वद्भावादेप् न भवति। उतोऽस्फादिति वर्तमाने–

७१८॥ वा म्वोः खं। ४। ४। १०५। अस्फात्परो य उकारस्तदंतस्य गोर्निमित्तभूतस्य खं वा भवति वकारादौ मकारादौ च परतः। इति पक्षे-उतः खं। एवं वहिमह्योरपि। सुनोमि। सुन्वः सुनुवः सुन्मः। सुनुमः। सुनोषि। सुनुथः, सुनुथ। सुनोति। सुनुतः सुन्वंति। सुन्वे। सुन्वहे। सुनुवहे। सुन्महे। सुनुमहे। सुनुषे। सुन्वाथे। सुनुध्वे। सुनुते। सुन्वाते। सुन्वते। अशूङ् व्याप्तौ। ङकारोकाराविती। न शादिति नकारस्य चुत्वनिषेधः। अश्नुवे। अश्नुवहे। अश्नुमहे। अश्नुषे। अश्नुवाथे। अश्नुध्वे। अश्नुते। अश्नुवाते। अश्नुवते। चिञ् चयने। चिनोमि। चिन्वः। चिनुवः। चिन्मः। चिनुमः। चिनोषि। चिनुथः। चिनुथ। चिनोति। चिनुतः। चिन्वंति। चिन्वे। चिन्वहे। चिनुवहे। चिन्महे। चिनुमहे। चिनुषे चिन्वाथे। चिनुध्वे। चिनुते। चिन्वाते। चिन्वते। लङ्-असुनवं। असुन्व, असुनुव। असुन्म। असुनुम। असुनोः। असुनुतं। असुनुत। असुनोत्। असुनुतां। असुन्वन्। असुन्वि। असुन्वहि। असुनुवहि। असुन्महि। असुनुमहि। असुनुथाः। असुन्वाथां। असुनुध्वं। असुनुत। असुन्वातां। असुन्वत। आश्नु-

वि । आश्नुवहि । आश्नुमहि । आश्नुथाः । आश्नुवाथां । आश्नुध्वं । आश्नुत । आश्नुवातां । आश्नुवत ॥ अचिनवं । अचिन्व । अचिनुव । अचिन्म । अचिनुम । अचिनोः । अचिनुतं । अचिनुत । अचिनोत् । अचिनुतां । अचिन्वन् । अचिन्वि । अचिन्वहि । अचिनुवहि । अचिन्महि । अचिनुमहि । अचिनुथाः । अचिन्वाथां । अचिनुध्वं । अचिनुत । अचिन्वातां । अचिन्वत ॥ लिङि—सुनुयां । सुनुयाव । सुनुयाम । सुनुयाः । सुनुयातं । सुनुयात । सुनुयात् । सुनुयातां । सुनुयुः । सुन्वीय । सुन्वीवहि । सुन्वीमहि । सुन्वीथाः । सुन्वीयाथां । सुन्वीध्वं । सुन्वीत । सुन्वीयातां । सुन्वीरन् । अश्नुवीय । अश्नुवीवहि । अश्नुवीमहि । इत्यादि । निस्पूर्वः । निश्चिनुयां । निश्चिनुयाव । निश्चिनुयाम । इत्यादि । निश्चिन्वीय । निश्चिन्वीवहि । निश्चिन्वीमहि । इत्यादि ॥ लोटि—अभिपूर्वः ।

७१९ ॥ गेः सुञ्सूसोस्तुस्तुभोऽट्यपि । ९ । ४ । ४७। गेरिण्णंतात् परेषां सुनोति सुवति स्यति स्तौति स्तुभति इत्येतेषां सकारस्य षत्वं भवति अडागमे मध्ये सत्यसत्यपि । अतो हेरित्यधिकृत्य—

१२० ॥ उतोऽस्फात् । ४ । ४ । १०४ । अस्फात् परो य उकारस्तदंतादुत्तरस्य हेर्गुनिमित्तभूतस्योप् भवति । अभिषुणवानि । अभिषुणवाव । अभिषुणवाम । अभिषुणु । अभिषुणुताद् वा । अभिषुणुतं । अभिषुणुत । अभिषुणोतु । अभिषुणुतात् वा । अभिषुणुतां । अभिषुण्वंतु । अभिषुणवै । अभिषुणवावहै । अभिषुणवामहै । अभिषुणुस्व । अभिषुण्वाथां । अभिषुणुध्वं । अभिषुणुतां । अभिषुण्वातां । अभिषुण्वतां । विपूर्वः । व्यश्नवै । व्यश्नवावहै ।

व्यश्नवामहै । व्यश्नुष्व । व्यश्नुवाथां । व्यश्नुध्वं । व्यश्नुतां व्यश्नुवातां । व्यश्नुवतां ॥ निश्चिनवानि । निश्चिनवाव । निश्चिनवाम । निश्चिनु । निश्चिनुतात् वा । निश्चिनुतं । निश्चिनुत । निश्चिनोतु । निश्चिनुताद्वा । निश्चिनुतां । निश्चिन्वंतु । निश्चिनवै । निश्चिनवावहै । निश्चिनवामहै । निश्चिनुष्व । निश्चिन्वाथां । निश्चिनुध्वं । निश्चिनुतां । निश्चिन्वातां । निश्चिन्वतां । इति स्वादिः ।

तुदांञ् व्यथने—अकारोकाराविती ।

७२१ ॥ **तुदाद्यः शः २ । १ । ९१** । तुदादिभ्यो धुभ्यः कर्तरि गे शो भवति । शपोऽपवादः । शकारः शित्कार्यार्थः । तेन गेऽपीति ङित्वात् "ध्युङः" इत्येप् न भवति । तुदामि । तुदावः तुदामः । इत्यादिः । तुदे । तुदावहे । तुदामहे । इत्यादि । मृ प्राणत्यागे । शदेगार्द् । इति वर्तमाने—

१२२ ॥ **मुलुङ्लिङोश्च । १ । २ । ६९** । म्रियतेर्गेपराल्लुङ्लिङोश्च दो भवति । रीङ् ऋतः" इति वर्तमाने—

७२३ ॥ **रिङ् यग्लिङ्क्शे । ५ । २ । १५० ।** गोर ऋकारांतस्य रिङादेशो भवति । यकि यकारादावगे लिङि शे च परतः । इति रिङादेशः । म्रिये । म्रियावहे । म्रियामहे इत्यादि । मुचॢञ् मोक्षणे । ऌकारञकारावितौ ।।"इदिद्धोर्नुम्" इत्यधिकृत्य-

७२४ ॥ **शे मुचां । ५ । १ । ३८** । मुचादीनां शे परतो नुम् भवति । मुंचामि । मुंचावः मुंचामः इत्यादि । मुंचे । मुंचावहे मुंचामहे । इत्यादि । लङि—अतुदं । अतुदाव । अतुदाम । इत्यादि । अतुदे । अतुदावहि । अतुदामहि । इत्यादि । अम्रिये । अम्रियावहि । अम्रियामहि । इत्यादि । अमुंचं । अमुंचाव । अमुंचाम । इत्यादि । अमुंचे । अमुंचावहि । अमुंचामहि । इत्यादि । लिङि—तुदेयं । तुदेव ।

तुदेम । इत्यादि । तुदेय तुदेवहि । तुदेमहि । इत्यादि । म्रियेय: म्रियेवहि । म्रियेमहि । इत्यादि । मुंचयं मुंचेव । मुंचेम । मुंचेय । मुंचेवहि । मुंचेमहि । इत्यादि । लोटि–तुदानि तुदाव तुदाम । इत्यादि । तुदं । तुदावहै । तुदामहै । इत्यादि । म्रियै । म्रियावहै । म्रियामहै । इत्यादि । मुंचानि मुंचाव । मुंचाम । इत्यादि । मुंचै । मुंचावहै । मुंचामहै । इत्यादि ।

इति तुदादि: ॥

रुधिर्‌ आवरणे । इरादेरितो निवृत्ति: ।

७२५ ॥ **रुधां श्नं । २ । १ । ९२ ।** रुधादीनां कर्तरि गे परत: श्नं भवति । शपोऽपवाद: । मकारो देशविध्यर्थ: । शकार: शित्कार्यार्थ: । तेन ङित्वादेबभाव: । णत्वं । गेऽत: क्ङितीति वर्तमाने—

७२६ ॥ श्नऽस्त: खं । ४ । ४ । १०८ । श्नमो विकरणस्यास्तेश्च गोरत: खं भवति गे क्ङिति परत: । चर्त्वं ।

७२७ ॥ झ:ध: । ५ । ३ । ७७ । दधातेरन्यस्माद् झषंताद्धो: परयो: तथोर्भष् भवति । इति धत्वं । झलो जश् झशीति पूर्वस्य दत्वं । रुणध्मि । रुंध्व: । रुंध्म: । रुणत्सि । रुंद्ध: । रुंद्ध । रुणद्धि । रुंद्ध: । रुंधंति । रुंधे । रुंध्वहे । रुंध्महे । रुंत्से । रुंधाथे । रुंद्ध्वे । रुंद्धे । रुंधाते । रुंधते । भुजो रक्षाशनयो: । ओकार इत् । ङेदितो द:''इति वर्तमाने—

७२८ ॥ **भुजोऽत्रे । १ । २ । ७५ ।** न त्रायते न पालयतीत्यत्र: । अस्मिजत्रेऽत्रातरि वर्तमानात् भुजेर्दो भवति । चो: कुत्वं चर्त्वं । भुञ्जे । भुञ्ज्वहे । भुञ्ज्महे । भुंक्षे । भुञ्जाथे । भुङ्ग्ध्वे । भुङ्क्ते । भुञ्जाते । भुञ्जते ॥ युजिर्‌ योगे । इरादिरित् । युनज्मि ।

युंज्वः । युञ्ज्मः । युनक्षि । युङ्क्थः । युङ्क्थ । युनक्ति । युङ्क्तः । युञ्जंति ।

७२९ ॥ ग्युदुद्भ्योऽयज्ञपात्रे । १।२ । ७३ । गिपूर्वादुत्पूर्वाच्च युजेरयज्ञपात्रे दो भवति । प्रयुङ्क्ते । प्रयुञ्ज्वहे । प्रयुञ्ज्महे । इत्यादि । उद्युङ्क्ते । उद्युञ्ज्वहे । उद्युञ्ज्महे । इत्यादि । नियमार्थमुद्ग्रहणं । हलंतेषूद एव नान्यस्माद् ।तेन-निर्युनजिम । इत्यादि । लङि-हल्ङ्याब्भ्यः । सुसिप्त्यनजिति सिपः खे पूर्वस्य च जश्त्वे सिपि रिर्वेति वर्तमाने—

७३० ॥ दः । ५ । ३ । ११० । धोर्दकारांतस्य पदस्य रिर्वा भवति सिपि परतः पक्षे द एव । अरुणध । अरुन्ध्व । अरुन्ध्म । अरुणः । अरुणत् वा । अरुन्द्धं । अरुन्द्ध । अरुणत् । अरुन्द्धां । अरुंधन् । अरुंधि । अरुंद्वहि । अरुंद्महि । अरुंद्धाः । अरुंधाथां । अरुंध्वं । अरुंद्ध । अरुंधातां । अरुंधत । अभुंजि । अभुञ्ज्वहि । अभुञ्ज्महि । अभुङ्क्थाः । अभुंजाथां । अभुङ्ग्ध्वं । अभुङ्क्त । अभुंजातां । अभुंजत । अयुनजं । अयुंज्व । अयुंज्म । अयुनक् । अयुंक्तं । अयुंक्त । अयुनक् अयुंक्तां, अयुंजन् । अयुंजि । अयुंज्वहि । अयुंज्महि । अयुङ्क्थाः । अयुंजाथां । अयुग्ध्वं । अयुंक्त । अयुंजातां । अयुंजत ॥ लिङि— रुंध्यां । रुंध्याम । रुंध्याव । इत्यादि । रुंधीय । रुंधीवहि । रुंधीमहि । इत्यादि । भुंजीय । भुंजीवहि । भुंजीमहि । इत्यादि । युंज्यां । युंज्याव । युंज्याम । युंजीय । युंजीवहि । युंजीमहि । इत्यादि । लोटि । रुणधानि । रुणधाव । रुणधाम । रुंद्धि । रुंद्धात् वाः । रुंद्धं । रुंद्ध । रुणद्धु । रुंद्धात् वा । रुन्द्धां । रुंधंतु । रुणधै । रुणधावहै । रुणधामहै । रुंत्स्व । रुंधाथां । रुंद्ध । रुंद्धां । रुंधातां । रुंधतां । भुनजै । भुनजा-

वहे । युनजामहै । युंक्ष्व । युंजाथां । युंग्ध्वं । युक्तां । युंजातां । युंजतां । युनजानि । युनजाव । युनजाम । युंग्धि, युंक्तात् वा । युंक्तं । युंक्त । युनक्तु, युंक्तात् वा । युंक्तां । युंजंतु । युनजै । युनजावहै । युनजामहै । युंक्ष्व । युंजाथां । युंग्ध्वं । युंक्तां । युंजातां । युंजतां । इति रुधादिः ॥

तनुञ् विस्तारे । ञकारोकाराविती ।

७३१ ॥ **कृञ्तनादेरुः** । २ । १ । ९३ । कृञस्तनादिभ्यश्च कर्तरि गे परतः उर्विकरणो भवति । शपोऽपवादः । तस्य पित्स्वेप् नापित्सु । वकारमकारादौ "वा म्वोः खं" इति उकारस्य खं । तनोमि । तन्वः । तनुवः । तन्मः । तनुमः । तनोषि । तनुथः । तनुथ । तनोति । तनुतः । तन्वंति । तन्वे । तन्वहे । तनुवहे । तन्महे । तनुमहे । तनुषे । तन्वाथे । तनुध्वे । तनुते । तन्वाते । तन्वते । मनुङ् बोधने । ङकारोकाराविती । मन्वे । मन्वहे । मनुवहे । मन्महे । मनुमहे । इत्यादि ॥ डुकृञ् करणे ञकारडुशब्दाविती । लादेश उत्वे एपि च कृते "कुर्यि च" इति वर्तमाने—

७३२ ॥ **गेऽतः कङित्युत्** । ४ । ४ । १०७ । गे कङिति परतः करोतेरुकारांतस्यात उकारादेशो भवति । तकारात्पुनरप् न भवति । "वा म्वोः खं" इति वर्तमाने—

७३३ ॥ **कुर्यि च** । ४ । ४ । १०६ । करोतेः परस्य उतः खं नित्यं भवति यकारादौ म्वोश्च परतः । करोमि । कुर्वः । कुर्मः । करोषि । कुरुथः । कुरुथ । करोति । कुरुतः । कुर्वंति । कुर्वे । कुर्वहे । कुर्महे । कुरुषे । कुर्वाथे । कुरुध्वे । कुरुते । कुर्वाते । कुर्वते । लङि-सम्-पूर्वः । समतनवं । समतन्व । समतनुव । समतन्म । समतनुम । समतनोः । समतनुतं । समतनुत । समतनोत् । सम-

तनुतां । समतन्वन् । समतन्वि । समतन्वहि । समतनुवहि । समतन्महि । समतनुमहि । समतनुथाः । समतन्वाथां । समतनुध्वं । समतनुतं । समतन्वातां । समतन्वत ॥ अमन्वि । अमन्वहि । अमनुवहि । इत्यादि । समपूर्वः ।

७३४ । संपर्युपात् कृः सुट् भूषे । ४ । ३ । १२९ । सम् परि उप् इत्येतेभ्यः परस्य कृञः सुडागमो भवति भूषे भूषायामर्थे । गेर्धोः कार्यस्यांतरंगत्वात् सुटि कृते पश्चादडागमः । समस्कुरुवं । समस्कुर्व । समस्कुर्म । समस्कुरोः । समस्कुरुतं । समस्कुरुत । समस्करोत् । समस्कुरुतां । समस्कुर्वन् । समस्कुर्वि । समस्कुर्वहि । समस्कुर्महि । समस्कुरुथाः । समकुर्वाथां । समस्कुरुध्वं । समस्कुरुत । समस्कुर्वातां । समस्कुर्वत । लिङि–तनुयां । तनुयाव । तनुयाम । इत्यादि । तन्वीय । तन्वीवहि । तन्वीमहि । इत्यादि । मन्वीय । मन्वीवहि । मन्वीमहि । इत्यादि । कुर्यां । कुर्याव । कुर्याम । इत्यादि । कुर्वीय । कुर्वीवहि । कुर्वीमहि । इत्यादि ॥ लोटि–वितनवानि । वितनवाव । वितनवाम । वितनु, वितनुतात् वा । वितनुतं । वितनुत । वितनोतु, वितनुतात् वा । वितनुतां । वितन्वंतु । वितनवै । वितनवावहै । वितनवामहै । इत्यादि । मनवै । मनवावहै । मनवामहै । इत्यादि । करवाणि । करवाव । करवाम । कुरु, कुरुतात् वा । कुरुतं । कुरुत । करोतु, कुरुतात् वा । कुरुतां । कुर्वंतु । करवै । करवावहै । करवामहै । कुरुष्व । कुर्वाथां । कुरुध्वं । कुरुतां । कुर्वातां । कुर्वतां । इति तनादिः ।

डुक्रीञ् द्रव्यविनमये । डुञावितौ । लडादयः ।

७३५ ॥ क्र्यादेः श्ना । २ । १ । ९५ । डुक्रीञ् इत्येवमादिभ्यः कर्तरि गे श्नेत्ययं विकरणो भवति । शकारः शित्कार्यार्थः ।

तेन ङित्वादेप् न भवति । "हल्यभोरी:" इति ईकारः । श्नरंतादेशः । "श्नाभ्योरातः" इत्यात्वं । क्रीणामि । क्रीणीवः । क्रीणीमः । क्रीणासि । क्रीणीथः । क्रीणीथ । क्रीणाति । क्रीणीतः । क्रीणंति । क्रीणे । क्रीणीवहे । क्रीणीमहे । क्रीणीषे । क्रीणाथे । क्रीणीध्वे । क्रीणीते । क्रीणाते । क्रीणते ॥ वृञ् संभक्तौ । वृणे । वृणीवहे । वृणीमहे । वृणीषे । वृणाथे । वृणीध्वे । वृणीते । वृणाते । वृणते । ग्रहञ् उपादाने । "लिट्यग्यणः साचोऽर्य्याऽऽज्यं" इति वर्तमाने—

७३६॥वशिव्यधिज्याविव्यग्रहिव्रश्चिप्रच्छिभ्रस्जां क्ङिति ।४।३।२५। वश्यादीनां किति ङिति च साचो यणः इग् भवति। इति ग्रहेः ऋकारः । गृह्णामि । गृह्णीवः । गृह्णीमः । गृह्णासि । गृह्णीथः । गृह्णीथ । गृह्णाति । गृह्णीतः । गृह्णंति । गृह्णे । गृह्णीवहे । गृह्णीमहे । गृह्णीषे गृह्णाथे । गृह्णीध्वे । गृह्णीते । गृह्णाते । गृह्णते ॥ लङि-अक्रीणां । अक्रीणीव । अक्रीणीम । अक्रीणाः । अक्रीणीतं । अक्रीणीत । अक्रीणात् । अक्रीणीतां । अक्रीणन् । अक्रीणि । अक्रीणीवहि । अक्रीणीमहि । अक्रीणीथाः । अक्रीणाथां । अक्रीणीध्वं । अक्रीणीत । अक्रीणातां । अक्रीणत । अवृणि । अवृणीवहि । अवृणीमहि । अवृणीथाः । अवृणाथां । अवृणीध्वं । अवृणीत । अवृणातां । अवृणत । अगृह्णां । अगृह्ण अगृह्णीम । अगृह्णाः । अगृह्णीतं । अगृह्णीत । अगृह्णात् । ह्णीतां । अगृह्णन् । अगृह्णि । अगृह्णीवहि । अगृह्णीमहि । अगृह्णीथाः । अगृह्णाथां । अगृह्णीध्वं । अगृह्णीत । अगृह्णातां । अगृह्णत ॥ लिङि–क्रीणीयां । क्रीणीयाव । क्रीणीयाम । क्रीणीयाः । क्रीणीयातं । क्रीणीयात । क्रीणीयात् । क्रीणीयातां । क्रीणीयुः । क्रीणीय । क्रीणीवहि । क्रीणीमहि । क्रीणीथाः । क्रीणीयाथां । क्रीणीध्वं । क्रीणीत । क्रीणीयातां । क्रीणीरन् । वृणीय । वृणीवहि ।

वृणीमहि । इत्यादि । गृह्णीयां । गृह्णीयाव । गृह्णीयाम । इत्यादि । गृह्णीय । गृह्णीवहि । गृह्णीमहि । इत्यादि ॥ लोटि- क्रीणानि । क्रीणाव । क्रीणाम । क्रीणीहि, क्रीणीतात् वा । क्रीणीतं । क्रीणीत । क्रीणातु, क्रीणीतात् वा । क्रीणीतां । क्रीणंतु । क्रीणै । क्रीणावहै । क्रीणामहै । क्रीणीष्व । क्रीणाथां । क्रीणीध्वं । क्रीणीतां । क्रीणातां । क्रीणतां । वृणै । वृणावहै । वृणामहै । वृणीष्व । वृणाथां । वृणीध्वं । वृणीतां । वृणातां । वृणतां ॥

७३७ ॥ **हौ हलः श्नः शानः** । २ । १ । ९७ । हलंताद्धोः परस्य श्नात्यस्य हौ परे शानादेशो भवति । अतो हेरुप् । गृह्णानि । गृह्णाव । गृह्णाम । गृहाण, गृह्णीतात् वा । गृह्णीतं । गृह्णीत । गृह्णातु, गृह्णीतात वा । गृह्णीतां । गृह्णंतु । गृह्णै । गृह्णावहै । गृह्णामहै । गृह्णीष्व । गृह्णाथां । गृह्णीध्वं । गृह्णीतां । गृह्णातां । गृह्णतां ॥ इति क्र्यादिः ।

चुर स्तेये । अकार उच्चारणार्थः ।

७३८ ॥ **चुरादिभ्यो णिच्** । २ । १ । ३६ । चुरादिभ्यो धुभ्यः स्वार्थे णिच् त्यो भवति । चकारो णिङ्णिचोः सामान्यग्रहणविघातार्थः । णकारो णीति सामान्यग्रहणार्थः ।

७३९ ॥ **ध्युङः** । ५ । २ । ९३ । घेरुङः एप् भवति गे चागे च परतः ।

७४० ॥ **सदंता धवः** । २ । १ । ४४ । सन्नाद्यंताः शब्दा धुसंज्ञा भवंति । इति धुसंज्ञायां ततो लडादयः । शबन्नयादेशाः । चोरयामि । चोरयावः । चोरयामः । इत्यादि । छदै संवरणे । ऐकार

---

१ । ण्युक्षः । २ । ३ । ८६ । इत्यादि सूत्रेष्विति भावः ।

इत् । तेन—एकदेशकृतं लिंगं समुदायस्य विशेषणमिति णिजंताद्दो भवति । ऐबिति ञ्णीति च वर्तमाने—

७४१ ॥ उङोऽतः । ५ । २ । ४ । गोरुङोऽकारस्य ङिणति परतः ऐप् भवति । इत्याकारः । छादये । छादयावहे । छादयामहे । इत्यादि । लक्षञ् दर्शनांकयोः । पूर्ववदन्यत् । लक्षयामि । लक्षयावः । लक्षयामः । इत्यादि । लक्षये । इत्यादि । लङि-अचोरयमित्यादि । अच्छादये । अच्छादयावहि । इत्यादि । अलक्षयमित्यादि । अलक्षये । अलक्षयावहि । अलक्षयामहि । इत्यादि । लिङि-चोरयेयं । चोरयेव । चोरयेम । इत्यादि । छादयेय । छादयेवहि । छादयेमहि । इत्यादि । लक्षयेयं । लक्षयेव । इत्यादि ॥ लक्षयेय । लक्षयेवहि । लक्षयेमहि । इत्यादि । लोटि-चोरयाणि । चोरयाव । चोरयाम । इत्यादि । छादयै । छादयावहै । छादयामहै । इत्यादि । लक्षयाणि । लक्षयाव । लक्षयाम । इत्यादि । लक्षयै । लक्षयावहै । इत्यादि । युज पृच संयमे । "चुरादिभ्यो णिच्" इति वर्तमाने—

७४२ ॥ युजादेर्वा । २ । १ । ३७ । युजादिभ्यो धुभ्यः स्वार्थे णिच् स्यो वा भवति । पक्षे-न्याय्यविकरणः शप् । पूर्ववच्छेषं । योजयामि । योजयावः । योजयामः । योजामि । योजावः । योजामः । इत्यादि ॥ अर्चै पूजायां । ऐकार इत् । णिजभावपक्षे ऐदित्सावकाश इति णिचि दो न भवति । अर्चयामि । अर्चे । इत्यादि । वृञ् आवरणे । अकार इच्चरितार्थोऽणिच्पक्षे इति णिजंताद्दो न भवति । वारयामि । वरामि । वरे इत्यादि । लङि-अयोजयं । अयोजमिति । आर्चयं, आर्चे इत्यादि । अवारयं । अवरं । अवरे । इत्यादि । लिङि-योजयेयं । योजेयम् । इत्यादि । अर्चयेयं । अर्चेय । इत्यादि । वारयेयं । वरेयं । इत्यादि । लोटि-योजयानि । इत्यादि । अर्चयानि ।

अर्चै । वारयाणि । वराणि । वरै । इत्यादि समुन्नेयं ।

इति कर्तृगलकारपरिच्छेदः ।

यदा तु—

७४३ ॥ लः कर्मणि च भावे च धेः । २ । ४ । ५७ । नव लकारास्त्यक्तविशेषणाः सकमकेभ्यो धुभ्यः कर्माणि चकारात्कर्तरि भवंति । धिसंज्ञभ्यो भावे कर्तरि च भवंति । इति कर्मभावयोर्ला भवंति । तदा—

७४४ ॥ लौ । १ । २ । ७ । भावे कर्मणि च यो लकारस्तस्य दो भवति । तत्र—

७४५ ॥ गे यक् । २ । १ । ८१ । ङित्वाचिनि गे परतो धोर्यक् त्यो भवति, न शबादयः । ककारः किस्कार्यार्थः । पूर्ववदेत्वादि । भावकर्मणोस्तुल्यं रूपं । परं भावे त एव भवति । लकाराभिधेयभावस्यैकत्वाद्युस्मदस्मद्विषयत्वाच्च लकारेण नाभिहिते कर्तरि कर्तृवाचिनो मृदोभा ॥ भू सत्तायाः क्रियायाः अकर्मकत्वाच्च भू इत्ये तस्मात् भावे लकाराः भवंति । भूयते देवदत्तेन विदुषा । भूयते देवदत्ताभ्यां विद्वद्भ्यां । भूयते देवदत्ताजिनदत्तगुरुदत्तैर्विद्वद्भिः । त्वया भूयते । मया भूयते । यद्यपि साधनभेदे वास्तवः क्रियाभेदः । तथापि स शब्देन नोपादीयते । इत्येकवचनमेव भवति । "अकर्मका अपि धवः सगयः सकर्मका भवंति" इति वचनादयं गिपूर्वः सकर्मको भवति । इति अनुपूर्वः । अनुभूये । अनुभूयावहे । अनुभूयामहे । अनुभूयसे । अनुभूयाथे । अनुभूयध्वे । अनुभूयते । अनुभूयेते । अनुभूयंते । एवमभिपूर्वः । अभिभूये । अभिभूयावहे । अभिभूयामहे । इत्यादि । तथा—लङादिषु—अभूयत । अन्वभूये । इत्यादि । भूयेत । अनुभूयेय । इत्यादि । भूयतां । अनुभूयै । इत्यादि । एवं—एध्यते । ऐध्यत ।

एध्येत । एध्यतां । पच्यते । अपच्यत । पच्येत । पच्यतां । नंद्यते । अनंद्यत । नंद्येत । नंद्यतां । "हल्डुकः क्ङित्यनदितः, इति नखं । प्रध्वस्यते । प्राध्वस्यत । प्रध्वस्येत । प्रध्वस्यतां । एधोऽश्या इत्यधिकृत्य-

७४६ ॥ ध्योऽलिटि । ४ । ३ । ४५ । ध्येञो धोरलिटि अशिद्विषये आत्वं भवति । स्वञ्यच्छ्वादेरिति साचो यण इक् । हलो यणिक इति दीः । धीयते । अधीयत । धीयेत । धीयतां । "यि क्ङित्ययङ्" इति वर्तमाने—

७४७ ॥ दीश्च्व्यकृद्रे । ५ । २ । १४८ । च्वावकृद् यकारे अगयकारे च गोर्दीर्भवति । हूयते । अहूयत । हूयेत । हूयतां हायते । अहायत । हायेत । हायतां । "ईंघं" इति वर्तमाने—

७४८ ॥ भूमास्थागापाहाक्सां हलि । ४ । ४ । ६९ । भूसंज्ञकानां मा स्था गा पा हाक् सा इत्येतेषां च घूनां हलादौ क्ङित्यगे परतः ईत्वं भवति । विधीयते । व्यधीयत । विधीयेत । विधीयतां । अद्यते । आद्यत । अद्येत । अद्यतां ।

७४९ ॥ यि क्ङित्ययङ् । ५ । २ । १४५ । शीङो यकारादौ क्ङिति परतः अयङादेशो भवति । अधिशय्यते । अध्यशय्यत । अधिशय्येत । अधिशय्यतां । क्तिल्येऽदोऽगे जग्धिरिति वर्तमाने-

७५० ॥ ब्रस्तेर्वच्भूः । १ । ४ । १११ । ब्रूञोऽस्तेश्च यथासंख्यं वच् भू इत्येतावादेशौ भवतोऽगे परतः । स्वञ्यच्छ्वादेरिति साचो यण इक् । उच्यते । औच्यत । उच्येत । उच्यतां । दीव्यते । अदीव्यत । दीव्येत । दीव्यतां । प्रसूयते । प्रासूयत । प्रसूयेत । प्रसूयतां । सन्नह्यते । समनह्यत । सन्नह्येत । सन्नह्यतां । अभिषूयते । अभ्यषूयत । अभिषूयेत । अभिषूयतां । अश्यते ।

आश्यत । अश्येत । अश्यतां । निश्चीयते । निरचीयत । निश्चीयेत । निश्चीयतां । तुद्यते । अतुद्यत । तुद्येत । तुद्यतां । म्रियते । अम्रियत । म्रियेत । म्रियतां । मुच्यते । अमुच्यत । मुच्येत । मुच्यतां । रुध्यते । अरुध्यत । रुध्येत । रुध्यतां । भुज्यते । अभुज्यत । भुज्येत । भुज्यतां । युज्यते । अयुज्यत । युज्येत । युज्यतां ।

७५१ ॥ **तनेर्यकि** । ४ । ३ । ४८ । तनोतेराकारो यकि परतो वा भवति । तायते । तन्यते । अतायत । अतन्यत । तायेत । तन्येत । तायतां । तन्यतां । मन्यते । अमन्यत । मन्येत । मन्यतां । क्रियते । अक्रियत । क्रियेत । क्रियतां । विक्रीयते । व्यक्रीयत । विक्रीयेत । विक्रीयतां । संव्रियते । समव्रियत । संव्रियेत । संव्रियतां । गृह्यते । अगृह्यत । गृह्येत । गृह्यतां । "अगे" खमिति चानुवर्तमाने ।

७५२ ॥ **णेः** । ४ । ४ । ५६ । णेः खं भवत्यगे परतः । चोर्यते । अचोर्यत । चोर्येत । चोर्यतां । छाद्यते । अछाद्यत । छाद्येत । छाद्यतां । लक्ष्यते । अलक्ष्यत । लक्ष्येत । लक्ष्यतां । योज्यते । अयोज्यत । योज्येत । योज्यतां । युज्यते । अयुज्यत । युज्येत । युज्यतां । अर्च्यते । आर्च्यत । अर्च्येत । अर्च्यतां । णिजभावेऽप्यविशेषः । वार्यते । अवार्यत । वार्येत । वार्यतां । व्रियते । अव्रियत । व्रियेत । व्रियतां । इत्यादि सप्रपंचमत्रगम्यान्नेयं ॥ अपि च कस्यचित् धोः कश्चिदर्थभागः कर्मस्थप्रधानः फलरूपी विक्लेदादिः । कश्चिद् कर्तृस्थप्रधानः भावनाक्रियाधिश्रयणादिः । तत्र यदा कर्मस्थे स्वस्यार्थभागे सुकरत्वेन वा कर्मण्यध्यारोपितायां भावनायां धुर्वर्तते, तदा तत्कर्मकर्ता भवति । तत्र लकारे—

७५३ । **कर्मवल्लेऽस्नुादीनां** ।२।१।७६। कर्मकर्तरि लकारो

सति तदंतस्य धोः स्नत्स्यादिवार्जितस्य कर्मणीव कार्यं भवति । यथा कर्मणि दयक्ञिटो भवंति । तथा तत्रापीत्यर्थः । कर्मकर्तर्यपि तान्येवोदाहरणानि भवंति । कर्मकर्तृभावाभिव्यक्त्यर्थं स्वयमेवेत्यनुप्रयुज्यते । अनुभूयेऽहं स्वयमेव । अनुभूयावहे । अनुभूयामहे स्वयमेव । इत्यादि । एवं पच्यते ओदनः स्वयमेव । विक्लिद्यतीत्यर्थः । इत्यादि नेयं ।

इति यक्परिच्छेदो द्वितीयः ।

कर्तरि शेषलकारा नीयंते । भू इति स्थिते "लोट् चाशिषि" इति पक्षे लिङ् । ङकारेकारौ पूर्ववदितौ । मिङादयश्च । "लेः सीयुट्" "ङ्यासुण्मे" इति वर्तमाने—

७५४ ॥ **किदाशिषि** । २ । ४ । ८६ । आशिष्यर्थे लिङो ङ्यासुट् किद् भवति । शेषोऽग इत्यधिकारे लिङाशिषीत्यगसंज्ञत्वाच्छवनंत्यसखे न भवतः । स्फादेः स्कोऽने चेति झलि सखं । भूयासं । भूयास्व । भूयास्म । भूयाः । भूयास्तं । भूयास्त । भूयात् । भूयास्तां । भूयासुः । दविधौ सीयुट् । झटो रन्नतौ ।

७५५ ॥ **तथोः सुट्** । २ । ४ । ८८ । लिङादेशावयवयोस्तकारथकारयोः सुडागमो भवति । व्योः ख वल्कात्रिति यखं । वलादेरिडिति इट् । स्यादेशयोरिति षत्वं ष्टुत्वं ।

७५६ ॥ **वेणञः** । ४ । ५ । ६४ । इणः परस्मात् इटो ञेश्चोत्तरेषां षीध्वंलुङ्लिटां धकारस्य ढकारादेशो भवति वा । एववादेशौ । व्यतिभविषीय । व्यतिभविषीवहि । व्यतिभविषीमहि । व्यतिभविषीष्ठाः । व्यतिभविषीयास्थां । व्यतिभविषीध्वं । व्यतिभविषीढ्वं । व्यतिभविषीष्ट । व्यतिभविषीयास्तां । व्यतिभविषीरन् ॥ एधिषीय । एधिषीवहि । एधिषीमहि । एधिषीष्ठाः । एधिषीयास्थां । एधिषीध्वं । एधिषीष्ट । एधिषीयास्तां । एधिषीरन् ॥ पच्यासं । प-

ष्यास्व । पच्यास्म । पच्याः । पच्यास्तं । पच्यास्त । पच्यात् । पच्यास्तां । पच्यासुः । एकाच् घस इति "न वृद्ध्यः" इति च वर्तमाने—

७५७ ॥ लौदिदचोऽपश्विश्रिशीडीरुषद्कोदृदतः ।
५ । १ । १२३ । लकारेत औकारेतोऽजंताच्च गोरेकाचः परस्य वलाद्यगस्येट् न भवति पत् श्वि श्रि शी डी रुषद्कं ऊदंत वृ ऋदंत अदंत इत्येतान् वर्जयित्वा । औकारेत्त्वात् पचेः सीयुट इट् न भवति । पक्षीय । पक्षीवहि । पक्षीमहि । पक्षीष्ठाः । पक्षीयास्थां । पक्षीध्वं । पक्षीष्ट । पक्षीयास्तां । पक्षीरन् ॥ नंद्यासं । नंद्यास्व । नंद्यास्म । इत्यादि । ध्वंसिषीय । ध्वंसिषीवहि । ध्वंसिषीमहि । इत्यादि । वियासं । वियास्व । वियास्म । इत्यादि । लौदिदच इत्यजंतत्वात् व्येञ इट् न भवति । व्यासीय । व्यासीवहि । व्यासीमहि । इत्यादि । हूयासं । हूयास्व । हूयास्म । इत्यादि ।

७५८ ॥ इणः षीध्वंलुङ्लिटां धो ढः । ५ । ४ । ६३ । इणः परेषां षीध्वं लुङ् लिटां धकारस्य ढकारो भवति । इति ढत्वं । व्यतिहोषीय । व्यतिहोषीवहि । व्यतिहोषीमहि । व्यतिहोषीष्ठाः । व्यतिहोषीयास्थां । व्यतिहोषीढ्वं । व्यतिहोषीष्ट । व्यतिहोषीयास्तां । व्यतिहोषीरन् । हासीय । हासीवहि । हासीमहि । इत्यादि ।

७५९ ॥ लिङ्येत् । ४ । ४ । ७० । भूमादीनां क्ङिति लिङि परतः एकारो भवति । विधेयासं । विधेयास्व । विधेयास्म । इत्यादि । श्रत्पूर्वः । श्रद्धासीय । श्रद्धासीवहि । श्रद्धासीमहि । इत्यादि । अद्यासं । अद्यास्व । अद्यास्म । इत्यादि । औकारेदित्वादनिट् । व्यत्यस्सीय । व्यत्यस्सीवहि । व्यत्यस्सीमहि । इत्यादि । "वेणूत्रेः" इति पक्षे ढत्वं । शयिषीय । शयिषीवहि । शयिषीमहि । शयिषीष्ठाः । शयिषीयास्थां । शयिषीढ्वं, शयिषीध्वं । शयिषीष्ट ।

शयिषीयास्तां। शयिषीरन्॥ उच्यासं । उच्यास्व । उच्यास्म। इत्यादि। ब्रूञः स्थानिवद्भावेन वचेरनिडर्थः औकार इत्यनिट्। वक्षीय । वक्षीवहि। वक्षीमहि। इत्यादि। दीव्यासं। दीव्यास्व। दीव्यास्म। इत्यादि। व्यतिदीविषीय । व्यतिदीविषीवहि। व्यति-दीविषीमहि। इत्यादि। वा लिङ्सिचाविति वर्तमाने—

७६० ॥ ऊदिद्भ्यः । ५ । १ । १०० । ऊदितो धोर्घ्न-श्च परस्य वलादेरिड् वा भवति। पक्षे इट्। इट्पक्षे वण्ङ्ग्रिरिति वा ह्रस्वं। प्रसविषीय। प्रसविषीवहि। प्रसविषीमहि। प्रसविषीष्ठाः। प्रसविषीयास्थां। प्रसविषीध्वं, प्रसविषीढ्वं। प्रसविषीष्ट। प्रसविषी-यास्तां। प्रसविषीरन्। अनिट्पक्षे—इणः षीध्वमिति नित्यं ढत्वं। प्रसोषीय। प्रसोषीवहि। प्रसोषीमहि। प्रसोषीष्ठाः। प्रसोषीयास्थां। प्रसोषीढ्वं। प्रसोषीष्ट। प्रसोषीयास्तां। प्रसोषीरन्॥ संनह्यासं। संनह्यास्व। संनह्यास्म। इत्यादि। औकारत्त्वादनिट्।

७६१ ॥ नहो धः । ५ । ३ । ६९ । नहेर्धोझलि प पदांते च धकारो भवति। इति धत्वं। नत्सीय । नत्सीवहि। नत्सीमहि। इत्यादि। अभिषूयासं । अभिषूयास्व। अभिषूयास्म। इत्यादि। सोषीय। सोषीवहि। सोषीमहि। इत्यादि। "ऊदिद्भ्यः" इति ऊदित्वात्पक्षे इट्। अशिषीय । अशिषीवहि। अशिषीमहि। इत्यादि। अनिट्पक्षे—ब्रश्चेत्यादिना षत्वं।

७६२ ॥ षढोः कस्सि । ५ । ३ । ७९ । षकारढका-रयोः ककारादेशो भवति सकारादौ परतः। इति ककारः। अक्षीय। अक्षीवहि। अक्षीमहि। इत्यादि॥ निश्चियासं। निश्चियास्व। निश्चि-यास्म। निश्चिषीय। तुद्यासं॥ सीकः, हल्कीति च वर्तमाने—

७६३ ॥ सिजौ दे । १ । १ । १०० । दपरे सिच्ये लौ

लिङि च सकारादौ परे यो हल् तस्मिन् परे य इक् तस्य किद्वद् कार्यं भवति । इति कित्वात् "ध्युङः" इत्येब् न भवति । तुत्सीय ।

७६४ ॥ उः । १ । १ । १०१ । ऋवर्णांतस्य धोः सकारादौ सिलौ दे परे किद्वद् कार्यं भवति । कित्वात् गागयोरित्येप् न भवति । मृषीय । मुच्यासं । मुक्षीय । रुध्यासं । रुत्सीय । भुक्षीय । भुज्यासं । युक्षीय । तन्यास । तनिषीय । मनिषीय । क्रियासं । कृषीय । क्रियासं । क्रिषीय । वृतो वेति वर्तमाने—

७६५ ॥ लिङ्स्योर्दे । ५ । १ । ९८ । वृञः परयोः लिङ् सि इत्येतयोः दविषययोरिड्वा भवति । वरिषीष्ट, वृषीष्ट वा । गृह्यात् ।

७६६ ॥ गृहोऽलिट्येकाचो दीः । ५ । १ । ९९ । गृहेरेकाचः परस्य इटो दीर्वा भवति न चेत् स इट् लिटि विहितः । बलादेरिटो दीः । गृहिषीष्ट । गृहीषीष्ट । णेरिति णिखं । चोर्यासं । चादयिषीष्ट । लक्ष्यासं । लक्षयिषीष्ट । योज्यासं । युज्यासं । अर्च्यासं । अर्चिषीष्ट । वार्यासं । व्रियासं । वरिषीष्ट । वृषीष्ट । इत्यादि सविस्तरमधिगंतव्यं ॥ लिड्डुदाह्रियते । भू इति स्थिते-" भूते " अनद्यतने,, इति चानुवर्तमाने—

७६७ ॥ परोक्षे लिट् । २ । २ । १०८ । अक्षेभ्यःपरावृत्तं परोक्षं स्वयं साक्षादनाधिगतं तत्र परोक्षे भूतेऽनद्यतनेऽर्थे वर्तमानाद्धोः लिडित्ययं त्यो भवति । टकारो टिद्दटेरेरिति विशेषणार्थः । इकारो लिटः क्वसुकानाविति विशेषणार्थः । पूर्ववन्मिबादयः । तेषां—

७६८ ॥ मानां णल्वमथाथुसणल्तुसुसः ।२।४।६१। लिटो लेरादेशानां मानां नवानां यथासंख्यं णल् व म थ अथुस अस्

णश् अतुस् उस् इत्येते नवादेशाः भवंति। इति णशादयः। णशावितौ। शित् सर्वादेशार्थः। परत्वादेपि प्राप्ते–नित्यत्वाद्-"अचि" भ्व-" इति चानुवर्तमाने—

७६९ ॥ **लुङ्लिटोर्वुक्** । ४ । ४ । ८५ । लुङ्लिटोराचि परतो भवतेर्वुगागमो भवति। ककारोकारावितौ। शेषोऽग एव, इति वर्तमाने—

७७० ॥ **लिट्** । २ । ४ । ९६ । लिट् चागसंज्ञो भवति। इत्यगस्य वलादेरिट् प्राप्तः।

७७१ ॥ **लिटींध्यस्फाद् किद्वत्** । १ । १ । ९३ । इंधेरन्यस्माच्च धोरस्फादापिति लिटि परतः कितीव कार्यं भवति। इति कित्त्वात्—"एकाचः" न वृद्धयः" इत्यधिकृत्य—

७७२ ॥ **कित्यूर्णुञ्श्र्युकः** । ५ । १ । १२५ । ऊर्णुञः श्रयतेरुगंताच्चैकाचो विहिते किति नेट् भवति। इति निषिद्धः।

७७३ ॥ **भृसृवृस्तुद्रुस्रुश्रोर्लिटि** । ५ । १ । १२७ । भृ सृ वृ स्तु द्रु स्रु श्रु इत्येतेभ्य एव लिटि नेट् भवति नान्येभ्यः। इति नियमान्निषिद्धो निवर्तते। पुनर्भवत्येवेट्। आदेरकाचो द्वे, इत्यधिकृत्य-लिडुचूकाचि धोः, इति द्वित्वं।

७७४ ॥ **पूर्वश्चः** । ४ । ३ । ११ । द्विरुक्तयोः पूर्वोऽवयवः चसंज्ञो भवति। इति चसंज्ञायां। चस्येति वर्तमाने-

७७५ ॥ **हलोऽनादेः** । ५ । २ । १८० । चस्य संबंधिनो हलोऽनादेरुप् भवति। इति वकारस्योप्।

७७६ ॥ **ह्रः** । ५ । २ । १८२ । चस्य संबंधिनोऽचः ह्रादेशो भवति। इत्यूकारस्य उकारः।

७७७ ॥ भुवोऽत् । ५ । २ । १९६ । भवतेश्वस्य लिटः अकारादेशो भवति । इत्युकारस्यात्वं । झलो जशीति भकारस्य बकारः । बभूव । बभूविव । बभूविम । बभूविथ । बभूवथुः । बभूव । बभूव । बभूवतुः । बभूवुः । दस्य–ढिट्टेरेरित्यत्वं । थासः सेभावः । वण्ञेरिति ध्वमो वा ढत्वं ।

७७८ ॥ लस्तझस्यैशिरे । २ । ४ । ६९ । लेर्लिटस्तझयोर्यथासंख्यं एश् इरे इत्येतावादेशौ भवतः । पूर्ववल्लिट् वुक् च कार्यं । व्यतिबभूवे । व्यतिबभूविवहे । व्यतिबभूविमहे । व्यतिबभूविषे । व्यतिबभूवाथे । व्यतिबभूविढ्वे । व्यतिबभूविध्वे । व्यतिबभूवे । व्यतिबभूवाते । व्यतिबभूविरे । लिड्वत्कृञोऽमीति वर्तमाने–

७७९ ॥ सर्विजादिदयायासोऽनृच्छूर्णोः । २ । १ । ४८ । सह रुणा वर्तमानात् इजादेर्धोर्दय् अय् आस् इत्येतेभ्यश्चाम् भवति लिड्वत् कृञि परतः ऋच्छत्यूर्णोतिं वर्जयित्वा । कृञोऽमीति प्रत्याहारेण कृभ्वस्तीनां त्रयाणां ग्रहणं । तस्मिन्नामंतं पदमिदमनतरं प्रयुज्यते ।

७८० ॥ आम्वत्तत्कुः । १ । २ । ७१ । आमंतस्यैव तत्कृञो दो भवति । इति लिटो दः । तस्य पूर्ववदेत्वादि । कित्त्वा ल्लिट्येप् न भवति । यणादेशस्यानिवद्भावेन द्वित्वं ।

७८१ ॥ उरः । ५ । २ । १८३ । चस्य ऋकारस्य अकारादेशो भवति । झित्वादामंतस्य सुप उप् । त्यखे त्याश्रयमिति पदत्वं । नुम्मोऽमित्यनुस्वारः । वा नुक् पदांतस्येति विकल्पेन परस्वत्वं । एधाञ्चक्रे । एधाञ्चकृवहे । एधाञ्चकृमहे । एधाञ्चकृषे । एधाञ्चक्राथे । एधांचकृढ्वे । एधांचक्रे । एधांचक्राते । एधांचक्रिरे । एधांबभूव । एधांबभूविव । एधांबभूविम । एधांबभूविथ । एधांबभूवथुः । एधांबभूव ।

एधांबभूव । एधांबभूवतुः । एधांबभूवुः । असू आसिति द्वित्वं । हलोऽनादेरिति स उप् । चस्येति दीरिति च वर्तमाने—

७८२ ॥ आद्यतः । ५ । २ । ११३ । लिटि परतः आदेरतश्चस्य दीर्भवति । इति दीत्वं । पुनः स्वेको दीः । एधामास । एधामासिव । एधामासिम । एधामासिथ । एधामासथुः । एधामास । एधामास । एधामासतुः । एधामासुः । "उश्चोऽतः" इत्यैप् । "भ्वसो ह्यचखे" इति वर्तमाने—

७८३ ॥ हल्मध्ये लिट्यतः । ४ । ४ । ११७ । हलो मध्ये वर्तमानस्यात एत्वं भवति चस्य च खं लिटि परतः । इत्येचखे । थे भ्रादिनियमात् नित्यमिटि प्राप्ते—

७८४ ॥ वाऽस्वदृचसृजृदृशो नित्यानिट्तासस्थेऽस्कद्व्यार्त्तेः । ५ । १ । ११७ । नित्यानिट् तास् येषां तेभ्योऽकारवद्भ्योऽजन्तेभ्यः सृज्दृश् इत्येताभ्यां च विहिते थे वा इट् भवति स्कु अद् व्या अर्त्ति इत्येतान् वर्जयित्वा । इति यदा इट् तदा सेटीत्येत्वचखे भवतः । अन्यत्र चोः कुत्वं । पूर्ववदन्यत् । पपच । पपाच । पेचिव । पेचिम । पपक्थ । पेचिथ । पेचथुः । पेच । पपाच । पेचतुः । पेचुः । पेचे । पेचिवहे । पेचिमहे । इत्यादि । पेचिषे । पेचाथे । पेचिध्वे । पेचे । पेचाते । पेचिरे ॥ ननंद । ननंदिव । ननंदिम । इत्यादि । दध्वंसे । दध्वंसिवहे । दध्वंसिमहे । इत्यादि । "द्वे" चस्येति च वर्तमाने—

७८५ ॥ लिट्यग्यणः साचोऽय्र्याऽऽज्यं । ४ । ३ । १७ । आ ज्या इत्येतस्माद् यो धुर्निर्दिश्यते तस्य लिटि द्वित्वे सति चस्य साचः परेणाचा सह वर्तमानस्य अर्य्य—अरेफयकारपरस्य यणः स्थाने इगादेशो भवति ॥ ञ्णित्यच इत्यैप् । आयादेशः । अपित्सु लिटः

क्दिद्भावात स्वव्यच्छयोदेरिति साचो यण इक । " एर्गिवाक्चादु-
ष्णोऽसुधयः, इति यणादेशः। पूर्ववच्छेषं। विव्याय। विव्यय। विव्यिव।
विव्यिम। विव्ययिथ। विव्यथुः। विव्य। विव्याय। विव्यतुः।
विव्युः॥ पूर्ववत् णशादिषु कृतेषु पित्स्वबादि। कित्युवादेशः। थे वेट्।
स्थानिवद्भावेन द्वित्वादि। जुहुव। जुहाव। जुहुविव। जुहुविम।
जुहुविथ। जुहोथ। जुहुवथुः। जुहुव। जुहाव। जुहुवतुः। जुहुवुः।
व्यतिजुहुवे। व्यतिजुहुविवहे। व्यतिजुहुविमहे। व्यतिजुहुविषे।
व्यतिजुहुवाथे। व्यतिजुहुविध्वे। व्यतिजुहुविद्वे। व्यतिजुहुवे।
व्यतिजुहुवाते। व्यतिजुहुविरे। पक्षे लिङ्कृञामीति वर्तमाने —

७८६ ॥ **भीह्रीभृहोरुज्वत्**। २। १। ५०। भी ह्री भृ
हु इत्येतेभ्यो लिङ्याम् कृञ्यां भवति वा स च उज्वत्। उचि कार्यं द्वित्व-
मित्वं चातिदिश्यते। द्वित्वे जश्त्वे च सत्येबवादशौ। फलेशे दःप्राप्तः।

७८७ ॥ **न**। १। २। ७२। आम्वत तत्कृञः फलेशे
दो न भवति। इति प्रतिषिद्धः। वलादावि्ट् प्राप्तः।

७८८ ॥ **कृञोऽस्कुः**। ५। १। १२८। सुट्वर्जितात्कृञो
विहिते लिटि नेट् भवति। इति निषिद्धः। थेऽप्ययमेव परत्वान्निषेधो,
न विकल्पः। शेषं पूर्ववत। जुहुवांचकार। जुहुवांचकर।

७८९ ॥ **वाऽस्मणणश्**। ५।१७२। अस्मदो णश् वा णिद्
भवति। इति पक्षे णिद्भावः। जुहुवांचकृव। जुहुवांचकृम। जुहु-
वांचकर्थ। इत्यादि। व्यतिजुहुवांचक्रे। व्यतिजुहुवांचकृवहे। व्यति
जुहुवांचकृमहे। इत्यादि।

७९० ॥ **इटि चाखं**। ४। ४। ६७। इटि अजादौ चागे
क्ङिति परे आकारांतस्य खं भवति। इत्याखं। जहे। जहिवहे।
जहिमहे।

७९१ ॥ आतो णल औ । ५ । २ । ३६ । गोरांकारांतात्परस्य लिटो णलः औकारादेशो भवति । इत्यौत्वं । दधौ । दधिव । दधिम । दधिथ । दधाथ । दधथुः । दध । दधौ । दधतुः । दधुः । दधे । दधिवहे । दधिमहे । इत्यादि । अदः,, घस्लृ,, इति चानुवर्तमाने

७९२ ॥ लिटि वा । १ । ४ । १३० । अदो घस्लृभावो वा भवति लिटि परतः । लृकार इत् । द्वित्वादि कार्यं ।

७९३ ॥ गमहनजनखनघसोऽनाङि । ४ । ४ । २४ । गमादीनां हलुङः क्ङित्यजादावनाङि खं भवति । "शास्वस्घसां" इति षत्वं । पूर्ववच्छत्वं । जघस । जघास । जक्षिव । जक्षिम । जघसिथ । जक्षथुः । जक्ष । जघास । जक्षतुः । जक्षुः । व्यतिजक्षे । व्यतिजक्षिवहे । व्यतिजक्षिमहे । व्यतिजक्षिषे इत्यादि । घस्लादेशाभावे-आद । आदिव । आदिम । आदिथ । आदथुः । आद । आद । आदतुः । आदुः । व्यत्यादे । व्यत्यादिवहे । व्यत्यादिमहे । इत्यादि । अतिशिश्ये । अतिशिश्यिवहे । अतिशिश्यिमहे । अतिशिश्यिषे । अतिशिश्याथे । अतिशिश्यिढ्वे । अतिशिश्यिध्वे । अतिशिश्ये । अतिशिश्याते । अतिशिश्यिरे ॥ पूर्ववद् ब्रूञो वचः साचो यणः इक् । अपिति स्वब्वच्छ्यादेरिति इक् । उवचे । उवाच । ऊचिव । ऊचिम । उवचिथ । उवक्थ । ऊचथुः । ऊच । उवाच । ऊचतुः । ऊचुः । ऊचे । ऊचिवहे । ऊचिमहे । इत्यादि । द्वित्वादिकं । "य्युङः" एप् च । दिदेव । दिदिविव । दिदिविम । दिदिविथ । दिदिवथुः । दिदिव । दिदेव । दिदिवतुः । दिदिवुः । व्यतिदिदिवे । व्यतिदिदिविवहे । व्यतिदिदिविमहे । इत्यादि ॥ सुषुवे । सुषुविवहे । सुषुविमहे । सुषुविषे । इत्यादि ॥ ननह । ननाह । नेहिव । नेहिम । नेहिथ । ननद्ध । नेहथुः । नेह । ननाह । नेहतुः । नेहुः । नेहे । नेहिवहे ।

नेहिमहे । इत्यादि । सुषव । सुषाव । सुषुविव । सुषुविम । सुषु-
विथ । सुषोथेत्यादि । सुषुवे । सुषुविवहे । सुषुविमहे । इत्यादि ।
"आद्यतः" इति दीत्वं । "नुक्" इत्यधिकृत्य–

७९४ ॥ अश्नोः । ५ । २ । १९५ । अश्नोतेर्लिटि चस्य कृतद्वित्वस्य नुगागमो भवति । व्यानशे । व्यानशिवहे । व्यानशि-
महे । व्यानशिषे । इत्यादि ।

७९५ ॥ वा चेः । ५ । २ । ७१ । चिनोतेश्चात्परस्य वा कुत्वं भवति सन्लिटोः परतः । चिकय, चिकाय । चिक्यिव । चि-
क्यिम । चिकयिथ, चिकेथ । चिक्यथुः । चिक्य । चिकाय । चिक्य-
तुः । चिक्युः । चिचय । चिचाय । चिच्यिव । चिच्यिम । चिचयिथ,
चिचेथ । चिच्यथुः । चिच्य । चिचाय । चिच्यतुः । चिच्युः । चि-
क्ये । चिक्यिवहे । चिक्यिमहे । इत्यादि । चिच्ये । चिच्यिवहे ।
चिच्यिमहे । इत्यादि । तुतुदे । तुतुदिवहे । तुतुदिमहे । तुतुदिषे ।
"न वृद्भ्यः" थे इति च वर्तमाने—

७९६ ॥ ऋतः । ५ । १ । ११८ । ऋकारांताद्धोर्विहिते थे नेट् भवति । ममर । ममार । मम्रिव । मम्रिम । ममर्थ । इत्यादि ।
मुमोच । मुमुचिव । मुमुचिम । मुमोचिथ इत्यादि । मुमुचे । मुमु-
चिवहे । मुमुचिमहे । इत्यादि । रुरोध । रुरुधिव । रुरुधिम ।
रुरोधिथ । रुरुधे । रुरुधिवहे । रुरुधिमहे । इत्यादि । बुभुजे ।
बुभुजिवहे । बुभुजिमहे । बुभुजिषे । इत्यादि । युयोज । युयुजिव ।
युयुजिम । युयोजिथ । इत्यादि । युयुजे । युयुजिवहे । युयुजिमहे ।
इत्यादि । ततन । ततान । तेनिव । तेनिम । तेनिथेत्यादि । तेने ।
तेनिवहे । तेनिमहे । मेने । मेनिवहे । मेनिमहे । इत्यादि । "कृञो-
ऽस्कुः" इत्यनिट् । चकर । चकार । चकृव । चकृम । चकर्थ ।

इत्यादि । चक्रे । चकृवहे । चकृमहे । इत्यादि । तस्यैव संपूर्वस्य "संपर्युपात् कुः सुट् भूषे,, इति सुट् ।

१९७ ॥ स्फायृदर्तेरेप् । ५ । २ । १३५ । स्फादेः ऋदकारांतस्य गोरर्तेश्च लिटि परतः एप् भवति । संचस्कार । संचस्करिव । संचस्करिम । संचस्करिथ । इत्यादि । संचस्करे । संचस्करिवहे । संचस्करिमहे संचस्करिषे । संचस्कराथे संचस्करिध्वे । संचस्करिढ्वे । संचस्करे संचस्कराते । संचस्करिरे ॥ चिक्रय । चिक्राय । चिक्रयिव । चिक्रयिम । चिक्रयिथ । चिक्रेथ । चिक्रियथुः । चिक्रिय । चिक्राय । चिक्रियतुः । चिक्रियुः । चिक्रिये । चिक्रियिवहे । चिक्रियिमहे । चिक्रियिषे ॥ इत्यादि । वव्रे । ववृवहे । ववृमहे । ववृषे । वव्राथे । ववृढ्वे । वव्रे । वव्राते । वव्रिरे । वशिव्यधिव्यचिज्याग्रहीत्यादिना यण इक् । अनुजग्राह । अनुजगृहिव । अनुजगृहिम । अनुजगृहिथ । इत्यादि । अनुजगृहे । अनुजगृहिवहे । अनुजगृहिमहे । इत्यादि । चोरयांचकार, चोरयांचकर । चोरयांचकृव । चोरयांचकृम । इत्यादि । छादयांचक्रे । छादयांचकृवहे । छादयांचकृमहे । इत्यादि । लक्षयांचकार । लक्षयांचकर । लक्षयांचकृव । लक्षयांचकृम । इत्यादि । लक्षयांचक्रे । लक्षयांचकृवहे । लक्षयांचकृमहे । इत्यादि । योजयांचकार । योजयांचकर । युयोज । अर्चयांचकर । अर्चयांचकार । आनर्च । वारयांचकार । ववार । वव्रे । इत्यादि संप्रपंचं सर्वमवगंतव्यं ॥ लुङ् प्रदर्श्यते । "भूते,, इत्यनुवर्तमाने–

१९८ ॥ लुङ् । २ । २ । ११७ । भूतेऽर्थे वर्तमानाद्धोर्लुङ् स्यो भवति । ङकारो ङितः सखमिति विशेषणार्थः । उकारो लुङ्लङिति विशेषणार्थः । स्यतासी लृलुटोरिति लोस्तासिः प्राप्तस्तदपवादः ।

१९९ ॥ सिलुङि । ३ । १ । ५२ । धोर्लुङि परतो मध्ये

सिस्त्यो भवति । इकारः "सार्वैम्मे" इति विशेषणार्थः । "यङ उप्" इत्यधिकृत्य—

८०० ॥ भुभूस्थेणिक्पिबः सेर्म्मे । १ । ४ । १४९ । भुसंज्ञकेभ्यो भू स्था इण् इक् पिब इत्येतेभ्यश्च परस्य सेरुब्भवति मे परतः। इति सेरुप् । त्यखे त्याश्रयन्यायेन सार्वैप् प्राप्तः, "नोमता गोः" इति निषिद्धः । "लुङ्लङ्लृङ्क्ष्वमाङ्गाद्" इत्यट् । पूर्ववन्मिबादिः । "एर्मे" इत्यादि च ङिल्लकारकार्यं । पित्त्वैप् प्राप्तः । "नेटः" इति वर्तमाने—

८०१ ॥ सूभ्वोऽथस्य मिङि । ५ । २ । ९६ । सू भू इत्येतयोरथसंज्ञकयोर्मिङि पित्यैप् न भवति । "लुङ्लिटोर्वुक्" इत्यजादौ वुक् । अभूवं । अभूव । अभूम । अभूः । अभूतं । अभूत । अभूत् । अभूतां । अभूवन् । दविधौ—सेरुप् न भवति । तत्र सेरिट् । एववादेशौ । "झस्य देऽनतः" इत्यदादेशः । व्यत्यभविषि । व्यत्यभविष्वहि । व्यत्यभविष्महि । व्यत्यभविष्ठाः । व्यत्यभविषाथां । व्यत्यभविध्वं । व्यत्यभविढ्वं । व्यत्यभविष्ट । व्यत्यभविषातां । व्यत्यभविषत । "स्फांतस्य खं" इति "रास्सः" इति च वर्तमाने—

८०२ ॥ धि वा । ५ । ३ । ६१ । धकारादौ परतो वा सकारस्य खं भवति । पक्षे जश्त्वे डकारः । ऐधिषि । ऐधिष्वहि । ऐधिष्महि । ऐधिष्ठाः । ऐधिषाथां । ऐधिध्वं । ऐधिड्ढ्वं । ऐधिष्ट । ऐधिषातां । ऐधिषत ॥ "सार्वैम्मे" इति वर्तमाने—

८०३ ॥ हलामचः । ५ । १ । ८८ । हलंतस्य गोरचः ऐप् भवति मपरे सौ परतः । इत्यैप् । "ध्रुव ईट्" इति वर्तमाने—

८०४ ॥ हल्यस्सेः । ५ । २ । १०३ । अस्तेस्सेश्च गुनिमित्तात् ईडागमो भवति हलि केवले परतः । इति ईट् ।

८०५ ॥ **झलो झलि । ५ । ३ । ६२** । झलः परस्य सकारस्य खं भवति झलि परतः । इति सखं । "थविस्सेः" इति झेर्जुस् । अपाक्षं । अपाक्ष्व । अपाक्ष्म । अपाक्षीः । अपाक्तं । अपाक्त । अपाक्षीत् । अपाक्तां । अपाक्षुः । अपाक्षि । अपक्ष्वहि । अपक्ष्महि । अपक्थाः । अपक्षाथां । अपग्ध्वं । अपक्त । अपक्षातां । अपक्षत ।

८०६ ॥ **नेटि । ५ । १ । ८९** । हलंतस्य गोरचः ऐप् न भवति मे परे साविडादौ परतः । "रः खं" इति वर्तमाने—

८०७ ॥ **ईटीटः । ४ । ४ । १९** । इटः परस्य सेरीडादौ त्ये परतः खं भवति । स्वको दीः । अनंदिषं । अनंदिष्व । अनंदिष्म । अनंदीः । इत्यादि । अध्वंसिषि । अध्वंसिष्वहि । अध्वंसिष्महि । इत्यादि । "सौ, मे" इति च वर्तमाने–

८०८ ॥ **यमृरमृनमातां सक् च । ५ । १ । १४६** । यम् रम् नम् इत्येतेभ्यः आकारांतेभ्यश्च मपरे सौ परतः इट् भवति सक् चागमं एषां । अव्यासिषं । अव्यासिष्व । अव्यासिष्म । अव्यासीः । इत्यादि । अव्यासि । अव्यास्वहि । अव्यास्महि । इत्यादि । "सावेम्मे" इत्यादि पूर्ववत । अहोषं । अहौष्व । अहौष्म । अहौषीरित्यादि । व्यत्यहोषि । व्यत्यहोष्वहि । व्यत्यहोष्महि । व्यत्यहोष्ठाः । व्यत्यहोषाथां । व्यत्यहोध्वं । धि वेति यदा सेर्न खं, तदा त्यादशयोरिति षत्वं । जश्त्वे डकारः । ष्टुत्वे च परस्य ढकारः । व्यत्यहोड्ढ्वं । व्यत्यहोष्ट । व्यत्यहोषातां । व्यत्यहोषत । अहासि । अहास्वहि । अहास्महि । इत्यादि । भुभूस्थेत्यादिना सेरुप् ।

८०९ ॥ **आतः । २ । ४ । ९२** । आकारांतात् यः सिः तस्मात् परस्य झेर्जुस् भवति । अधां । अधाव । अधाम । अधुः । इत्यादि । "यमस्सौ सिलौ दे" इति वर्तमाने–

८१० ॥ भुस्थोरिः । १ । १ । १९६ । भुसंज्ञकस्य स्था इत्येतस्य च धोः सकारादौ दपरे साविकारादेशो भवति किद्वच । झलि—

८११ ॥ माङ्गोः । ५ । ३ । ६३ । मांतात् गोरुत्तरस्य सकारस्य खं भवति झलि । इति खं । अधिषि । अधिष्वहि । अधिष्महि । अधिथाः । अधिषाथां । अधिध्वं । अधित । अधिषातां । अधिषत ।

८१२ ॥ घस्लजलुङ्घञसनि । १ । ४ । १२९ । अदेर्घस्लृ इत्ययमादेशो भवति अचि लुङि घञि सनि च परतः । लृकारो लित्कार्यार्थः । "वक्त्यसुख्यातेरङ्" इत्यधिकृत्य—

८१३ ॥ द्युत्पुष्यादिलित्सर्तिशास्तेर्मे । २ । १ । ६१ । द्युतादिभ्यः पुषादिभ्यश्च लृकारेद्भ्यः सर्तिशास्तिभ्यां च कर्तरि मपरे लुङि परतो अङ् भवति । ङकारो ङित्कार्यार्थः । अघसं । अघसाव । अघसाम । इत्यादि । दविधौ-सिरेव । "मरुदेऽस्तोऽचः" इति वर्तमाने–

८१४ ॥ स्यगे सः । ५ । २ । १६४ । सकारादावगे परतो गोरचः परस्य सकारस्य तकारादेशो भवति । इति तकारः । झलि-सेःखं । व्यत्यघत्सि । व्यत्यघत्स्वहि । व्यत्यघत्स्महि । व्यत्यघत्थाः । इत्यादि । अशायिषि । अशायिष्वहि । अशायिष्महि । इत्यादि ।

८१५ ॥ वक्त्यसुख्यातेरङ् । २ । १ । ५८ । वक्ति-वचै परिभाषणे ब्रूञादेशश्च, असु क्षेपणे, ख्या-प्रकथने चक्षादेशश्च । एतेभ्यो धुभ्यः कर्तरि लुङि परतोऽङ् भवति । इत्यङ् । "नशोऽङीम्" इति वर्तमाने—

८१६ ॥ श्व्यस्पत्वचोऽथुक्पुमुम् । ५ । २ । १४२ । श्वि अस् पत् वच् इत्येतेषां यथासंख्यमकार थुक् पुम् उम् इत्येते

आगमा भवति अङि परतः । इति वचेरुमागमः । अवोचं । अवोचाव । अवोचाम । इत्यादि । अवोचे । अवोचावहि । अवोचामहि । इत्यादि । सिरिट् । सिमिपोरीट् । "इटीटः" इति सखं । त्यखे त्याश्रयमिति "हलामचः" इति एपि प्राप्ते नेटीति निषिद्धः । 'व्युकः' इत्येप् । अदेविषं । अदेविष्व । अदेविष्म । अदेवीरित्यादि । व्यत्यदेविषि । व्यत्यदेविष्वहि । व्यत्यदेविष्महि । इत्यादि । असविषि । असविष्वहि । असविष्महि असोषि । असोष्वहि । असोष्महि । इत्यादि । अनात्सं । अनात्स्व । अनात्स्म । अनात्सीरित्यादि । अनत्सि । अनत्स्वहि । अनत्स्महि । इत्यादि । "सावंजः" इत्यधिकृत्य—

८१७ ॥ स्तुधूञ्सोर्मे । ५ । १ । १४६ । स्तु धूञ् सुञ् इत्येतेभ्यो मे परे साविट् भवति । असाविषं । असाविष्व । असाविष्म । असावीरित्यादि । असोषि । असोष्वहि । असोष्महि । इत्यादि । आशिषि । आशिष्वहि । आशिष्महि । आशिष्ठाः । इत्यादि । अनिट्पक्षे व्रश्चेत्यादिना षत्वं । षढोः कस्सीति कत्वं । टुत्वादि च । आक्षि । आक्ष्वहि । आक्ष्महि । आष्ठाः । आक्षाथां । आढ्ढ्वं । आष्ट । आक्षातां । आक्षत । निरचैषं । निरचैष्व । निरचैष्म । निरचैषीरित्यादि । समचेषि । समचेष्वहि । समचेष्महि । इत्यादि । "हलामचः" इत्यैप् । सिप्तिपोरीट् । झलि सेःखं । अतौत्सं । अतौत्स्व । अतौत्स्म । अतौत्सीः । अतौत्तं । अतौत्त । अतौत्सीत् । अतौत्तां । अतौत्सुः । "सिलौ दे" इति सेः किद्वद्भावात् "घ्युङः" इत्येप् न भवति । झलि सेः खं । धि वेत्यखपक्षे झलो जश् झशीति सेर्जश्त्वं । तस्य "झरो झरि स्वे" इति खं । अतुत्सि । अतुत्स्वहि । अतुत्स्महि । अतुत्थाः । अतुत्साथां । अतुद्ध्वं । अतुत्त । अतुत्सातां । अतुत्सत । अमृषि । अमृष्वहि । अमृष्महि । अमृथाः । इत्यादि । द्युत्पुष्यादीत्यादिना अङ् । अमुचं ।

अमुचाव । अमुचाम । इत्यादि । अमुक्षि । अमुक्ष्वहि । अमुक्ष्महि । इत्यादि ।

८१८ ॥ वेरितः । २ । १ । ६२। इर्शब्देतो घोर्लुङि मे परतो वा अङ् भवति कर्तरि । पक्षे सिः । दे तु सिरेव । किद्वद्भावादनेप्च । अरुधं । अरुधाव । अरुधाम । इत्यादि । अरौत्सं । अरौत्स्व । अरौत्स्म । अरौत्सीः । अरौद्धं । इत्यादि । अरुत्सि । अरुत्स्वहि । अरुत्स्महि । अरुद्धाः । अरुत्साथां । अरुद्ध्वं । अरुद्ध । अरुत्सातां । अरुत्सत । अभुक्षि । अभुक्ष्वहि । अभुक्ष्महि । इत्यादि । अयुजं । अयुजाव । अयुजाम । इत्यादि । अयौक्षं । अयौक्ष्व । अयौक्ष्म । अयौक्षीः । अयौक्तं । अयौक्त । इत्यादि । प्रायुक्षि । प्रायुक्ष्वहि । प्रायुक्ष्महि । प्रायुक्थाः । इत्यादि । "वोर्णुञः" इति वर्तमाने—

८१९ ॥ अतोऽनादेर्घेः । ५ । १ । ८२ । घेः परतोऽनादेरिडादौ मपरे सात्रैप् वा भवति । इत्यैप् । अतानिषं । अतानिष्व । अतानिष्म । अतानीरित्यादि । पक्षे-अतनिषं । अतनिष्व । अतनिष्म । इत्यादि । दविधौ-थास्तयोः— उञिति सेरिति वेति च वर्तमाने—

८२० ॥ तन्भ्यस्थास्ते । १ । ४ । १५१ । तनादिभ्यः परस्य सेरुब्वा भवति थास्तयोः परतः । इत्युपि—क्ङितीति वर्तमाने—

८२१ ॥ हन्मन्यमूरमूनमूगमूवनतितनां ङ्खं झलि । ४ । ४ । ३९ । हनादीनां वनतेस्तनादीनां च गूनां झलादौ किङ्ति ल्ये परे ङखं भवति । इति नकारस्य खं । अतनिषि । अतनिष्वहि । अतनिष्महि । अतथाः । अतनिष्ठाः । अतनिषातां । अतनिध्वं । अतनिढ्वं । अतत । अतनिष्ट । अतनिषातां । अतनिषत । पूर्ववद् सेरुबादि । अमनिषि । अमनिष्वहि । अमनिष्महि ।

इत्यादि । अकार्षं । अकार्ष्व । अकार्ष्म । अकार्षीः । इत्यादि । अकृषि । अकृष्वहि, अकृष्महि । अकृथाः । इत्यादि । अक्रैषं । अक्रैष्व । अक्रैष्म । अक्रैषीः । इत्यादि । अक्रीषि । अक्रीष्वहि । अक्रीष्महि । अक्रीष्ठाः । इत्यादि । "वृतो वा,, इति वर्तमाने ।

८२२ ॥ लिङ्स्योर्दे । ५ । १ । ९८ । वृङ् वृञ् इत्येताभ्यां ऋकारांताच्च परौ यौ लिङ्सौ तयोर्देविषययोरिड् वा भवति । यदेद्--तदा ।

८२३ ॥ वृतो वाऽलिमसौ । ५ । १ । ९९ । वृतः परस्य इटो वा दीर्भवति न चेत्स इट् लौ लिङि लिटि मपरे सौ च भवति । इति दीत्वं । अवरीषि । अवरीष्वहि । अवरीष्महि । इत्यादि । इडभावे—सिलौ दे,, उरिति किद्वद्भावादेप् न भवति । अवृषि । अवृष्वहि । अवृष्महि । इत्यादि । ग्रहोऽलिटयेकाचो दीरिति दीत्वं ।

८२४ ॥ हृम्यक्षण्श्वस्श्व्येदितां । ५ । १ । ९० । हमयांतानां क्षण् शश् श्वि इत्येषां एदितां च गूनामिडादौ सावैप् न भवति । इत्येबभावः । अगृहीषं । अगृहीष्व । अगृहीष्म । इत्यादि । अगृहीषि । अगृहीष्वहि । अगृहीष्महि । इत्यादि ।

८२५ ॥ णिकम्श्रिद्रुश्रोः कर्त्तरि कच् । २ । १ । ५६ । ण्यंतेभ्यो धुभ्यः कम् श्रि द्रु श्रु इत्येतेभ्यश्च कर्तृवाचिनि लुङि परतः कच् भवति । सेरपवादः । ककारः कित्कार्यार्थः । चकारो "लिङ्च्काचि धोः" इति विशेषणार्थः ।

८२६ ॥ णौ कच्युङः प्रोऽशास्वक्ख्यृदितः । ५ । २ । १२८ । शासु अक्खिन् ऋदित् इत्येतत्वर्जितस्य गोरुङः प्रादेशो भवति कच्परे णौ परतः ।

८२७ ॥ द्वित्वेऽचि । १ । १ । ६८ । द्वित्वनिमित्तेऽचि अजादेशो स्थानिवद्भवति । स्थानिवद्भावेन "लिड्चङ्कचि धोः" इति द्वित्वं। हलोऽनादेरित्यादि च कार्यं ।

८२८ ॥ घेर्दीरनजादेः । ५ । २ । २१२ । णौ कच्परे ऽनक्खे णावनजादेर्गोश्चस्य घेर्दीर्भवति । णिखमङ् च। अचूचुरं। अचूचुराव । अचूचुराम । अचूचुरः । अचूचुरतं । अचूचुरत । अचूचुरत् । अचूचुरतां । अचूचुरन् ।

८२९ ॥ णौ कच्यनक्खे सन्वत् । ५ । २ । २११ । न विद्यतेऽकः खं यस्मिन् तदनक्खं तस्मिन्ननक्खे णौ कच्परे परतश्चस्य घिसंज्ञके वर्णे परे सनीव कार्यं भवति। किं तत् । चस्यति "भृहाङ्मामिः,, इति च वर्तमाने—

८३० ॥ सन्यतः । ५ । २ । २०० । सनि परतश्चस्याकारस्य इत्वं भवति । इतीत्वं । घेर्दीरनजादेरिति दीत्वादंतरंगत्वेन "छे च" इति तुक् । पुनः घित्वाभावान्न दीत्वं । अचिच्छदं । अचिच्छदावहि। अचिच्छदामहि । इत्यादि । अललक्षं । अललक्षाव। अललक्षाम । इत्यादि । अललक्षि । अललक्षावहि । अललक्षामहि । इत्यादि । अयूयुजं । अयूयुजाव । अयूयुजाम । इत्यादि । अयौक्षं। अयौक्ष्व इत्यादि । "आदेरेकाचो द्वे" इति वर्तमाने—

८३१ ॥ अचः ।४ । ३ । ३। आदेरचः परस्य एकाचो द्वे रूपे भवतः । आदिद्वित्वापवादः ।

८३२ ॥ न स्फादौ न्द्रोऽयि ।४। ३ । ४ ।आदेरचः परे स्फादौ वर्तमाना नकारदकाररेफवकारा न द्विरुच्यंतेऽयकारे । आर्चिचं । आर्चिचाव । इत्यादि । आर्चिचिषि । आर्चिच्वहि । इत्यादि । अवीवरं। अवीवराव । इत्यादि । प्राबारिषं । प्रावारिष्व । इत्यादि ।

प्रावरिषि । प्रावरीषि । प्रावृषि । प्रावृष्महि । इत्यादि सविस्तरमभ्यूह्यं । लुडुदाह्रियते । "गम्यादिर्वर्त्स्यति,, इत्यधिकृत्य—

८३३ ॥ शोकानद्यतने लुट् । २ । ३ । ३ । वर्त्स्यत्यर्थे वर्तमानाद्धोर्लुट् भवति ऌटोऽपवादः शोकानद्यतने ॥ शोकोऽनुशोचनं पश्चात्ताप इत्यर्थः । टकारः पूर्ववत् । उकारः "स्यतासी ऌलुवोः,, इति विशेषणार्थः ।

८३४ ॥ स्यतासी ऌलुवोः ।२।१।४१। ऌ इति ऌटि ऌङि ऌौ लुटि परतो मध्ये तासिस्स्यो भवति । इकारो "हलुङः क्ङित्यनदितः, इति विशेषणार्थः । तस्य "वलादेरिट्" इति इट् । ततो मिबादयः ।

८३५ ॥ लुटोऽन्यस्य डारौरस् ।२ । ४ । ९७। लुडादेशानामन्यसंज्ञकानां तिप् तस् झि इत्येतेषां यथासंख्यं डा रौ रस् इत्येते आदेशा भवंति । "तास्थानेऽतेऽलः,, इति तिप इकारस्य डादेशः। डिति टेरिति आस्तशब्दरूपस्य खं । "स्यगे सः" इति वर्तमाने—

८३६ ॥ तासस्त्योः खं ।५ । २ । १६९। तासेरस्तेश्च सकारस्य खं भवति सकारादौ स्ये ।

८३७ ॥ रि । ५ । २ । १७० । तासेरस्तेश्च धोःरेफादौ सकारस्य खं भवति । एवावादेशौ । भवितास्मि । भवितास्व । भवितास्म । भवितासि । भवितास्थः । भवितास्थ । भविता । भवितारौ । भवितारः ।

८३८ ॥ एसि हः ।५ । २ । १७१। तासेरस्तेश्च सकारस्य हकारादेशो भवति एकारादौ स्ये परतः । व्यतिभविताहे । व्यतिभवितास्वहे । व्यतिभवितास्महे । व्यतिभवितासे । व्यतिभवितासाथे । व्यतिभविताध्वे । व्यतिभविता । व्यतिभवितारौ । व्यतिभवितारः । एधिताहे । एधितास्वहे । एधितास्महे । एधितासे । इत्यादि ।

पक्तास्मि । पक्ताहे । सुनंदितास्मि । प्रध्वंसिताहे । सन्यातास्मि । संव्याताहे । होतास्मि । व्यतिहोताहे । हाताहे । प्रणिपूर्वाद्धात्र:—

८३९ ॥ **नेर्गदनदपतपदघुमास्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धौ** । ५ । ४ । १२० । गेरदुरोऽन्त:शब्दाच्च परस्य नेर्गदादिषु परतो णत्वं भवति । इति णत्वं । प्रणिधातास्मि । प्रणिधाताहे । अत्तास्मि । व्यत्यत्ताहे । अतिशयिताहे । वक्ताहे । वक्तास्मि । देवितास्मि । व्यतिदेविताहे । सविताहे । सोताहे । "ण्यंतरोऽदुरोऽविकृत:" इति णत्वं । परिणद्धास्मि । परिणद्धाहे । अभिषोतास्मि । अभिषोताहे । अशिताहे । अष्टाहे । चेतास्मि । चेताहे । तोत्तास्मि । तोत्ताहे । मर्त्तास्मि । व्यतिमर्त्ताहे । मोक्तास्मि । मोक्ताहे । रोद्धास्मि । रोद्धाहे । भोक्ताहे । भोक्तास्मि । प्रयोक्ताहे । तनितास्मि । तनिताहे । कर्त्तास्मि । कर्त्ताहे । क्रीतास्मि । क्रीताहे । वरितास्मि । वरिताहे । गृहीतास्मि । गृहीताहे । चोरयितास्मि । छादयिताहे । लक्षयितास्मि । लक्षयिताहे । योजयितास्मि । योक्तास्मि । अर्चयितास्मि । अर्चयिताहे । वारयितास्मि । वारयिताहे । वरितास्मि । वरिताहे । इत्यादि सर्वमुन्नेयं ॥ लृट् व्याख्यायते । गम्यादिर्वर्त्स्यतीत्यधिकृत्य—

८४० ॥ **लृट्** । २ । ३ । २ । वर्त्स्यत्यर्थे वर्तमानाद्धोर्लृट् भवति । टकार: पूर्ववत् । ऋकार: स्यतासी लृलुटोरिति विशेषणार्थ: । तेनैव मध्ये स्येति विकरण: । इडवादेशास्ततो मिबादय: । भविष्यामि । भविष्याव: । भविष्याम: । भविष्यसि । भविष्यथ: । भविष्यथ । भविष्यति । भविष्यत: । भविष्यंति । व्यतिभविष्ये । व्यतिभविष्यावहे । व्यतिभविष्यामहे । व्यतिभविष्यसे । व्यतिभविष्येथे । व्यतिभविष्यध्वे । व्यतिभविष्यते । व्यतिभविष्येते । व्यतिभविष्यंते । एधिष्ये ।

पक्ष्यामि । पक्ष्ये । नंदिष्यामि । ध्वंसिष्ये । व्यास्यामि । व्यास्ये । होष्यामि । व्यतिहोष्ये । हास्ये । श्रद्धास्यामि । श्रद्धास्ये । अतस्यामि । व्यत्यत्स्ये । शयिष्ये । वक्ष्यामि । वक्ष्ये । देविष्यामि । व्यतिदेविष्ये । प्रसविष्ये । प्रसोष्ये । नत्स्यामि । नत्स्ये । अभिषोष्यामि । अभिषोष्ये । अशिष्ये । अक्ष्ये । निश्वेष्यामि । निश्वेष्ये । तोत्स्यामि । तोत्स्ये ।

८४१ ऋद्धन इट् स्ये । ५ । १ । १४४ । ऋकारांताद्धोर्हन्तेश्चागे स्ये इट् भवति । मरिष्यामि । व्यतिमरिष्ये । मोक्ष्यामि । मोक्ष्ये । रोत्स्यामि । रोत्स्ये । भोक्ष्ये । योक्ष्यामि । योक्ष्ये । तनिष्यामि । तनिष्ये । कारिष्यामि । कारिष्ये । क्रीष्यामि । क्रीष्ये । वरिष्ये । वरीष्ये । ग्रहिष्यामि । ग्रहीष्ये । चोरयिष्यामि । छादयिष्ये । लक्षयिष्ये । योजयिष्यामि । योक्ष्यामि । अर्चयिष्यामि । अर्चिष्ये । वारयिष्यामि । वरिष्यामि । वरीष्यामि । वारिष्ये । इत्यादि सप्रपंचमधिगंतव्यं ॥ लृङुदाह्रियते । गम्यादिर्वर्त्स्यतीत्याधिकृत्य—

८४२ ॥ लिङ्हेतौ लृङ् क्रियाऽवृत्तौ । २ । ३ । १३० । हेतुस्तत्फलप्रभृतिर्लिङ्गो हेतुर्वक्ष्यते । तत्र लिङो हेतौ वर्त्स्यति काले लृङ् भवति क्रियायाश्चेदवृत्तिरातिपत्तिर्भवति ।

८४३ ॥ भूते । २ । ३ । १३१ । भूते काले लिङ्हेतौ क्रियावृत्तौ लृङ् भवति । टकारः पूर्ववत् । ऋकारः स्यतासी लृल्वोरिति सामान्यग्रहणार्थः । मध्ये स्यः । इडेबवादेशाः । अडागमः । अभविष्यं । अभविष्याव । अभविष्याम । अभविष्यः । अभविष्यतं । अभविष्यत । अभविष्यत् । अभविष्यतां । अभविष्यन् । दाविधौ-व्यत्यभविष्ये । व्यत्यभविष्यावहि । व्यत्यभविष्यामहि । व्यत्यभविष्यथाः । व्यतिभविष्येथां । व्यत्यभविष्यध्वं । व्यत्यभविष्यत । व्यत्यभविष्येतां । व्यत्यभविष्यंत । ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि । सर्वमभ्यूह्यं ।

इति कर्तृपरिच्छेदः ।

अथ भावकर्मकर्मकर्तृषु लिङादयो निर्दिश्यंते ।

८४४ ॥ सिस्यसीयुट्तासां ञौ गृहाञ्झनदृशो ञीट् । ४ । ४ । ६५ । ग्रहेरजंतभ्यो हनदृशिभ्यां च परेषां सि स्य सीयुट् तास् इत्येतेषां ञावर्थे विहितानां ञीडागमो भवति वा । पक्षे-इट् । ञीटि--ञ्णित्यचः,, इत्यैप् । तत्र-भावे--भाविषीष्ट, भविषीष्ट देवदत्तेन । कर्मणि-अनुभाविषीय । अनुभविषीयेत्यादि । कर्मकर्तरि-अनुभाविषीय स्वयमेव । अनुभविषीय इत्यादि । सर्वं कर्तृवन्नेयं । एधिषीष्ट । पक्षीष्ट । नंदिषीष्ट । ध्वांसिषीष्ट । "ञौ" इति "आतः" इति चानुवर्तमाने—

८४५ ॥ कृञ्ञौ युक् । ५ । २ । १७ । गोराकारांतस्य युगागमो भवति कृति ञ्णिति ञीटि च परतः । संव्यायिषीष्ट । संव्यासीष्ट । हाविषीष्ट । होषीष्ट । हायिषीष्ट । हासीष्ट । धायिषीष्ट । धासीष्ट । अत्सीष्ट । शायिषीष्ट । शयिषीष्ट । वक्षीष्ट । निश्वायिषीष्ट । निश्विषीष्ट । तुत्सीष्ट । मारिषीष्ट । मृषीष्ट । मुक्षीष्ट । रुत्सीष्ट । भुक्षीष्ट । युक्षीष्ट । तनिषीष्ट । मनिषीष्ट । कारिषीष्ट । कृषीष्ट । क्रायिषीष्ट । क्रीषीष्ट । वारिषीष्ट । वरिषीष्ट । वृषीष्ट । ग्राहिषीष्ट । ग्रहिषीष्ट । चोरयिषीष्ट । चोरिषीष्ट । छादयिषीष्ट । छादिषीष्ट । लक्षयिषीष्ट । लक्षिषीष्ट । योजिषीष्ट । योजयिषीष्ट । युक्षीष्ट । अर्चिषीष्ट । अर्चयिषीष्ट । वारिषीष्ट । वारयिषीष्ट । वरिषीष्ट । वृषीष्ट । इत्यादि । सर्वं प्रत्येयं । लिटि—भावे—बभूवे देवदत्तेन । कर्मणि-कर्मकर्तरि च-अनुबभूविवहे । इत्यादि । एधांचक्रे । पेचे । ननंदे । दध्वंसे । संविव्ये । जुहवांचक्रे । जुहुवे । जहे । विदधे । आदे । जक्षे । शिश्ये । ऊचे । दिदिवे । प्रसुषुवे । नेहे । अभिषुषुवे । आनशे । चिक्ये । चिच्ये । तुतुदे । मम्रे । मुमुचे । रुरुधे । बुभुजे । युयुजे ।

तेने । मेने । चक्रे । चिकीर्षे । वव्रे । जगृहे । चोरयांचक्रे । छादयांचक्रे । लक्षयांचक्रे । योजयांचक्रे । युयुजे । अर्चयांचक्रे । आनर्चे । वारयांचक्रे । वव्रे । इत्यादि पूर्ववज्ज्ञेयं ॥ लुङि–भावे–कर्मणि तवचनं । "लुङि" इति "त ञिः" इति च वर्तमाने –

८४६ ॥ **कौ** । २ । १ । ६८ । लावर्थे भावकर्मणि लुङि तवचने परे धोर्ञिस्यो भवति । सेरपवादः । ञकार ऐवर्थः ।

८४७ ॥ **ञेरुप्** । १ । ४ । १०१ ; ञेरुत्तरस्य गोनिर्मितस्य उप् भवति । अभावि देवदत्तेन । अन्वभावि कम्बलो देवदत्तेन । कर्मकर्तरि–

८४८ ॥ **कर्मवल्लेऽस्त्वादीनां** । २ । १ । ७६ । स्नवस्यादिवर्जितस्य धोः कर्मकर्तरि विहिते लकारे कर्मवत् कार्यं भवति । व्यतिदेशान्नित्यं औ प्राप्ते–

८४९ ॥ **कर्मणि** २ । १ । ६६ । कर्तरीति वर्तते । कर्तृत्वेन विवक्षिते कर्मणि लुङि ते परतो ञिर्वा भवति । पक्षे सिः । यदा सिस्तदा ञीट् । अन्वभावि कंबलः स्वयमेव । अन्वभाविष्ट । अन्वभविष्ट । इति त्रैरूप्यं । अन्यत्र ञीट्तदभावाद् द्वैरूप्यं । अन्वभाविषि । अन्वभविषि । अन्वभविष्वहि । अन्वभविष्महि । इत्यादि । "दुहश्च"इति हलंतनियमादन्येषां ञिविकल्पो न भवति । ऐधि । अपाचि । अपक्षातां । अनंदि । प्रानंदिषातां । अध्वंसि । अध्वंसिषातां । अव्यायि । अव्यायिष्ट । अव्यास्त । अव्यायिषातां । अहोषि । अहासातां । अधायि । अधायिष्ट । अधित । अधायिषातां । अधिषातां । अघत्सातां । अशायि । अवाचि । अवक्षातां । अदेवि । अदेविषातां । असावि । असाविष्ट । असविष्ट । असोष्ट । असाविषातां । असविषातां । असोषातां । अनाहि । अनत्सातां । असावि । असा-

विष्ट । असोष्ट । असाविषातां । असोषातां । आशि । आशिषातां । आक्षातां । निरचायि । निरचायिष्ट । निरचिष्ट । निरचायिषातां । निरचिषातां । अतोदि । अतुद्ध । अतुत्सातां । अमारि । अमोचि । अमुक्षातां । ञिरिति वर्तमाने—

८५० ॥ **न रुधः । २ । १ । ६ ।** रुधेर्धो: कर्मकर्तरि ञि-र्न भवति । ह्वाविति नित्यं प्राप्तः । कर्मणि तु भवत्येव । अरोधि । कर्मकर्तरि—अरुद्ध । अरुत्सातां । अभोजि । अभुक्षातां । अयोजि । अयुक्षातां । अतानि । अतानिषातां । अमानि । अमानिषातां । अकारि । अकारिष्ट । अकृत । अकारिषातां । अकृषातां । अकारि-षत । अकृषत । अक्रायि । अक्रायिष्ट । अक्रीष्ट । अक्रायिषातां । अक्रीषातां । अवारि । अवारिष्ट । अवरिष्ट । अवरीष्ट । अवृत । अवा-रिषातां । आवारीषातां । अवरिषातां । अवरीषातां । अवृषातां । अग्रा-हि । अग्राहिषातां । अग्रहीषातां । "यग्दुहः" इति " नमः " इति चाधिकृत्य—

८५१ ॥ **दृधिणिश्रिश्रंथिग्रंथिवचूश्नोश्च ञिश्च । २ । १ । ७३** दे धीनां ण्यंतानां श्रि श्रंथि ग्रंथि वच श्नु इत्येतेषां नमेश्च कर्मकर्तरि ञियक् च न भवतः । इति कर्मकर्तरि ञिप्रतिषेधः । अचूचुरत स्वयमेव । कर्मणि-अचोरि । अचोरिषातां । अचोरयिषातां । अचिच्छदत स्वयमेव । कर्मणि-अच्छादि । अच्छादिषातां । अच्छा-दयिषातां । अललक्षत स्वयमेव । कर्मणि-अलक्षि । अलक्षिषातां । अयूयुजत स्वयमेव । कर्मणि-अयोजि । अयोजिषातां । अयोजयिषातां । अयुक्षातां । आर्चिचत स्वयमेव । कर्मणि--आर्चि । आर्चिषातां । आ-र्चयिषातां । अवीवरत स्वयमेव । कर्मणि-अवारि । अवारिष्ट । अवृत । अवारिषातां । अवारयिषातां । अवृषातामित्यादि सर्वमधि-

गंतव्यं । लुटि तासौ चीटि च विकल्पः । अन्यत्रेट् । भाविता । अनुभाविताहे । अनुभविताहे । एधिता । पक्ता । पक्ताहे । नंदिता । अभिनंदिताहे । ध्वंसिता । ध्वंसिताहे । संव्यायिता । संव्याता । संव्यायिताहे । संव्याताहे । हाविता । होता । हाविताहे । होताहे । हायिता । हाता । हायिताहे । हाताहे । परिधायिता । परिधाता । परिधायिताहे । परिधाताहे । अत्ता । अत्ताहे । शायिता । शयिता । अतिशायिताहे । अतिशयिताहे । वक्ता । वक्ताहे । देविता । देविताहे । साविता । सविता । सोता । साविताहे । सविताहे । सोताहे । परिणद्धा । परिणद्धाहे । साविता । सोता । साविताहे । सोताहे । अशिता । अष्टा । अशिताहे । अष्टाहे । चायिता, चेता । चायिताहे । चेताहे । तोत्ता । तोत्ताहे । मारिता । मर्ता । परिमारिताहे । परिमरिताहे । मोक्ता । मोक्ताहे । रोद्धा । रोद्धाहे । भोक्ता । भोक्ताहे । योक्ता । योक्ताहे । तनिता । तनिताहे । मनिता । मनिताहे । कारिता । कर्ता । कारिताहे । कर्ताहे । क्रायिता । क्रीता । क्रायिताहे । क्रीताहे । वारिता । वरिता । वरीता । वारिताहे । वरिताहे । वरीताहे । ग्राहिता । ग्रहिता । ग्राहिताहे । ग्रहिताहे । चोरिता । चोरयिता । चोरिताहे । चोरयिताहे । छादिता । छादयिता । छादिताहे । छादयिताहे । लक्षिता । लक्षयिता । लक्षिताहे । लक्षयिताहे । योजिता । योजयिता । योक्ता । योजिताहे । योजयिताहे । योक्ताहे । अर्चिता । अर्चयिता । वारयिता । वरिता । वरीता । इत्यादि सर्वमभिलक्ष्यं । लृटि-चीटि तदभावेन च द्विधा नीतिः । भाविष्यते देवदत्तेन । कर्मणि-कर्मकर्तरि च-अनुभाविष्यते । अनुभविष्यते । एधिष्यते । पक्ष्यते । नंदिष्यते । ध्वंसिष्यते । व्यायिष्यते । व्यास्यते । हाविष्यते । होष्यते । हायिष्यते । हास्यते । विधायिष्यते । विधा-

स्यते । अत्स्यते । अतिशायिष्यते । अतिशयिष्यते । वक्ष्यते । देवि-ष्यते । साविष्यते । सविष्यते । सोष्यते । नत्स्यते । अभिपाविष्यते । अभिपोस्यते । अशिष्यते । अक्ष्यते । निश्वायिष्यते । निश्वष्यते । तोत्स्यते । मारिष्यते । मरिष्यते । मोक्ष्यते । रोत्स्यते । भोक्ष्यते । योक्ष्यते । तानिष्यते । मानिष्यते । कारिष्यते । करिष्यते । क्रायि-ष्यते । क्रीष्यते । वारिष्यते । वरिष्यते । ग्राहिष्यते । ग्रहिष्यते । छादिष्यते । छादयिष्यते । लक्षयिष्यते । लक्षिष्यते । योजयिष्यते । योजिष्यते । योक्ष्यते । अर्चिष्यते । अर्चयिष्यते । वारिष्यते । वारयिष्यते । वरीष्यते । वरिष्यते । इत्यादि सर्वमुन्नेयं ॥ अथ लृङि भीटिङ्भ्यां द्विधा नीतिः । अभाविष्यत, अभविष्यत देवदत्तेन । कर्मणि-कर्मकर्तरि च-अन्वभाविष्यत । अन्वभविष्यत । ऐधिष्यत । अपक्ष्यत । अनंदिष्यत । अध्वंसिष्यत । अध्यायिष्यत । अध्यास्यत । अहाविष्यत । अहोष्यत । इत्यादि सविस्तरमूहितव्यं । एवं परमप्र-कृतेर्दश लकारा उदाहृताः ॥

अथ त्यांतेषु सन्नंताः

भवितुमिच्छतीति विगृह्य "किद्गुप्तिजः सन् भिषज्यादिनि-दाक्षमे" इति वर्तमाने-

८५२॥ तुमीच्छायां धोर्वोप् । २ । १ । ५ । "इच्छार्थे ल्डिङ्लोङ्" इत्यधिकृत्य-"तुमेककर्तृके" इति इच्छार्थे यो विहितः तुम् तस्मिन्निच्छायां तुमि परतो धोः परस्त्यसंज्ञा भूत्वा सन् वा भवति यदा सन् तदा तुमः उप् ॥ "निमित्ताभावे नैमित्तकस्याप्यभावः" इति इटो निवृत्तिः । भू सन् इति स्थिते-नकारः "सन्यङोः" इति विशेषणार्थः । वलादेरिडिति प्राप्तः । "न वृद्भ्यः" कित्यूर्णुग्रूयुकः" इति च प्रस्तुत्य-

८५३॥ सनि ग्रहिगुहश्च । ५ । १ । १२६ । ग्रहगुहा-

भ्यामुगंतेभ्यश्च धुभ्यः सनि किति इट् न भवति । इति निषिद्धः । "किद्वद्" इति "सनि" इति च वर्तमाने-

८५४ ॥ सीकः । १ । १ । ९८ । इगंतस्य धोः सकारादौ सनि परतः किद्वद् कार्यं भवति । इति किद्वद्भावात् "गागयोः" इत्येप् न भवति ।

८५५ ॥ सनुयङोः । ४ । ३ । १३ । सन्नंतस्य यङंतस्य च धोः आदेरचो द्वे रूपे भवतः । इति द्वित्वं । हलोऽनादेरित्यादि चकार्यं । भू भू ष इति स्थिते—

८५६ ॥ तदंता धवः । २ । १ । ४४ । ते सन्नादयोऽते येषां ते तदंताः धुसंज्ञा भवंति । इति धुत्वे पूर्ववल्लडादिः । शपि "एप्यतः" इति पररूपं । बुभूषामि । बुभूषावः । बुभूषामः । इत्यादि । कर्मव्यतिहारे-व्यतिबुभूषे । व्यतिबुभूषावहे । व्यतिबुभूषामहे । इत्यादि । लङि-अबुभूषं । व्यत्यबुभूषि । लिङि-बुभूषेयं । व्यतिबुभूषेय । लोटि-बुभूषाणि । व्यतिबुभूषै । यकि-अतः" इत्यखं । बुभूष्यते देवदत्तेन । अनुबुभूष्यते कम्बलो देवदत्तेन । नेति ञिगिति ञीडिति च वर्तमाने—

८५७॥ भूषार्थसन्किरादीनां यक् च । २ । १ । ७४ भूषार्थानां सन्नंतानां किरादीनां च कर्मकर्तरि यक ञि ञीट् च न भवति । इति निषेधात् यक् न भवत्येव । कर्मवादत्यतिदेशात् दविधिश्च । अनुबुभूषते कम्बलः स्वयमेव । लङि—अन्वबुभूषत । अन्वबुभूष्यत । अन्वबुभूषत । लिङि—बुभूष्येत । अनुबुभूष्येत । अनुबुभूषेत । लोटि-बुभूष्यतां । अनुबुभूष्यतां । अनुबुभूषतामित्यादि । लोट् चाशिषि-बुभूष त्वं । बुभूषताद् वा । बुभूषतु भवान्, बुभूष-

ताद् वा। लिङि च-अतः खं। बुभूष्यासं। व्यतिबुभूषिषीय। लिटि-बुभूषांचकार। बुभूषांचकर। व्यतिबुभूषांचक्रे। लुङि-अबुभूषिषं। व्यत्यबुभूषिषि। लुटि—बुभूषितास्मि। व्यतिबुभूषिताहे। लृटि—बुभूषिष्यामि। व्यतिबुभूषिष्ये। लृङि-अबुभूषिष्यं। व्यत्यबुभूषिष्ये। इत्यादि। बुभूषिषीष्ट देवदत्तेन। अनुबुभूषिषीय। बुभूषांचक्रे। अबुभूषि। अन्वबुभूषि। अन्वबुभूषीष्ट कटः स्वयमेव। बोबुभूषिता। अनुबुभूषिताहे। बुभूषिष्यते देवदत्तेन। अनुबुभूषिष्ये। लृङि-अबुभूषिष्यत। अन्वबुभूषिष्ये। इत्यादि। "अचः" इति द्वित्वं।

८५८ ॥ प्राग्वत् सनः। १। २। ६८। सनः प्राचः प्रकृतेः परस्य लकारस्य यथा दो भवति तदा सन्नंतादपि। इति दः। र्धिधिषे। इत्यादि।

८५९ ॥ सन्यतः। ५। २। १००। सनि परे यः तस्याकारस्य इकारादेशो भवति। पिपक्षामीत्यादि। निनंदिषामि। इत्यादि। दिध्वंसिषे। विव्यासामि। विव्यासे। इत्यादि।

८६० ॥ हन्यर्था सनि। ४। ४। १३। हंतेरिणिगिङादेशस्य गमेरजंतस्य च धोर्दीर्भवति झलादौ सनि परतः। जुहूषामि। जिहासे।

८६१ ॥ स्मनिर्मीमाभूरभलभशक्पत्पदोऽच इस्। ५। २। १७४। मी मा भृइत्येवमादीनामचः स्थाने इसादेशो भवति सकारादौ सनि परतः चस्य चोप्। "स्यगे सः" इति तकारः। धित्सामि। धित्से। "घस्लजल्लुङ्घञ्सनि" इत्यदेर्घस्लभावस्य "स्यगे सः" इति तत्वं। द्वित्वादि। जिघत्सामि। व्यतिजिघत्से। शिशयिषे। विवक्षामि। विवक्षे।

. ८६२ ॥ **सनीवंतर्द्धभ्रस्जदम्भुस्वृश्रियूर्णुभरज्ञपिसनतन्पतेः** । ५ । २ । १०४ । इवंतेभ्यो धुभ्यः ऋधादिभ्यश्च सनि परतः इट् वा भवति । इड्पक्षे—**ष्युकः**,, इत्येप् । दिदेविषामि । इडभावे "किद्वत्सनि सीकः" इति वर्तमाने—

८६३ ॥ **हलि** । १ । १ । ९९ । सकारादौ सनि परतो यो हल् तस्मिन् परे य इक् तस्य किद्वद् कार्यं भवति । इत्येप् निषिद्धः। "च्छ्वः शूठ् ङे च" इति वस्य ऊठि यण् ततो द्वित्वादि । दुद्यूषामि । पूर्ववदिडभावः कित्त्वं च ।

८६४ ॥ **षणि चाण्णिस्तोरेवाऽस्विन्त्स्वत्महः** । ५ । ४५ । षणि षत्वभूते सनि परतः चादिण्णंतात् परेषां व्यसानां स्विदिस्वदिसहवर्जितानां स्तौतेरेव सकारस्य षत्वं भवति । इति नियमादषत्वं । प्रसुसूषे । निनत्सामि । निनत्से ।

८६५ ॥ **सुञः सनस्ये** । ५ । ४ । ९७ । सुनोतेः सनि स्ये च परे षत्वं न भवति । सुसूषामि । सुसूषे ।

८६६ ॥ **स्मिङ्पूङ्ऋञ्ज्वशः सनि** । ५ । १ । १४८ । स्मिङ् पूङ् ऋ अंजू अश् इत्येतेभ्यः इट् भवति सनि परे । अशिशिषे । निश्चिकिषामि । निश्चिचिषामि । निश्चिकिषे । निश्चिचिषे । "हलि" इति "किद्वद्भावादेप् न भवति । तुतुत्सामि । तुतुत्से । "हन्यचां सनि" इति दीः । "ऋतामिद्धोः" इति वर्तमाने—

८६७ ॥ **पुवादुत्** । ९ । १ । ८५ । पवर्गाद् वकाराच्च धोरवयवात् परस्य ऋकारस्य उकारादेशो भवति । रंतत्वं । "दीर्वोरिगुकः" इति दीः । मुमूर्षे । मुमुक्षामि । मुमुक्षे । कर्मकर्तरि—

८६८ ॥ वौन्मुचो धेः । ५ । १ । १७८ । घिसंज्ञकस्य मुचेरचः ओकारादेशो भवति वा सनि सकारादौ परतश्चस्योप् । भूपेत्यादिना न यक् । मोक्षते । मुमुक्षते वत्सः स्वयमेव । रुरुत्सामि । रुरुत्से । बुभुक्षे । युयुक्षामि । युयुक्षे । सनीवंतेत्यादिना वेट् । तितनिषामि । इडभावे—

८६९ ॥ तनो वा । ४ । ४ । १४ । तनोतेर्झलादौ सनि परतो वा दीर्भवति । तितांसामि । तितंसामि । तितनिषे । तितांसे । तितंसे । मिमनिषे । हन्यचां सनीति दीः ।

८७० ॥ ऋतामिद्धोः । ५ । १ । ८३ । ऋकारांतस्य गोर्घोरिकारादेशो भवति । रंतत्वं । दीत्वं । चिकीर्षामि । चिकीर्षे । चिक्रीषामि । चिक्रीषे । वृतो वा लिमसाविति वर्तमाने-

८७१ ॥ सनीट् । ५ । १ । ९७ । वृतः सनि परतो धोर्वेट् भवति । इडभावे-पुवादुद्'' इत्युत्वादि । विवरिषे । विवरीषे । वुवूर्षे । सनि ग्रहगुहश्चेति वेट् ।

८७२ ॥ रुद्विद्मुष्ग्रहस्वप्प्रच्छां सनि च । १ । १ । ९७ । रुद् विद् मुष् ग्रह् स्वप् प्रच्छ इत्येतेषां सनि क्त्वात्ये च परे किद्वद् भवति । किद्वद्भावाद्-वशिरुयधि—इत्यादिना यण इक् । ढत्वकत्वे भष्भावादि । जिघृक्षामि । जिघृक्षे । चुचोरयिषामि । चिच्छादयिषामि । लिलक्षयिषामि । लिलक्षयिषे । युयोजयिषामि । युयुक्षामि । अर्चिचयिषामि । अर्चिचिषे । विवारयिषामि । विवरीषामि । वुवूर्षामीत्यादि । सर्वं पूर्ववत् । कर्तरि नवलकारेषु भावे कर्मणि कर्मकर्तरि च यथासंभवमभ्यूह्यं । इति सन्नंताः ।

भृशमभीक्ष्णं वा भवतीति विगृह्य-

८७३ ॥ धोर्यङ् भृशेऽभीक्ष्ण्येऽशुभ्रुचेः । ३ । १ । १२ ।
शुभिरुचिवर्जिताद्धोः भृशेऽभीक्ष्ण्ये चार्थे वर्तमानात् यङ्त्यो भवति । ङकारो ङकार्यार्थः । सन्यङोरिति द्वित्वं । भूयभूय इति स्थिते— हलोऽनादेरित्यादि चकार्यं ।

८७४ ॥ यङुपोरेप्ध्यकिदाहाकः । ५ । २ । २०३ ।
याङि यङुपि च चस्याकित आकारांतहाकृवर्जितस्य एप् भवति दीर्घं च । इति इक एवन्यत्र दीः । बोभूय् इत्यतः पूर्ववल्लडादयः । "ङदितो दः" इति दः । एत्वं । बोभूये । बोभूयावहे । इत्यादि । ङौ-यकि-

८७५ ॥ अनः । ४ । ४ । ५६ । गोरकारांतस्य अतः खं भवत्यगे परतः । बोभूय्यते देवदत्तेन । कर्मणि कर्मकर्तरि च— अनुबोभूय्ये, अनुबोभूय्ये स्वयमेव । लङि-अबोभूये । ङौ—अबोभूय्यत । अन्वबोभूय्ये । लिङि—बोभूयेय । ङौ—बोभूय्येत । अनुबोभूय्येय । लोटि-बोभूयै । ङौ—बोभूय्यतां, अनुबोभूय्यै । लिङाशिषि—बोभूयिषीय । ङौ—बोभूयिषीष्ट देवदत्तेन । अनुबोभूयिषीय । लिटि—बोभूयांचक्रे । बोभूयांबभूव । बोभूयामास । ङौ—बोभूयांबभूवे । अनुबोभूयांबभूवे । बोभूयामासे । "कृभ्वस्तिञ्, इत्यस्तिग्रहणसामर्थ्यात् "ब्रस्तेर्वचभू" इति अस्तेर्भूभावो न भवति । लुङि-अबोभूयिषि । ङौ-अबोभूयि देवेन । अन्वबोभूयि । अन्वबोभूयिष्ट वा । अन्वबोभूयिषातां । लुटि-बोभूयिताहे । ङौ— बोभूयिता देवेन । अनुबोभूयिताहे । लृटि—बोभूयिष्ये । ङौ— बोभूयिष्यते देवेन । अनुबोभूयिष्ये । लृङि—अबोभूयिष्ये । ङौ—अबोभूयिष्यत देवेन । अन्वबोभूयिष्ये ।

८७६ ॥ सुचिसूत्रिमूत्र्यट्यर्त्यशूर्णोः । ३ । १ । ३३ ।

सूचि सूत्रि मूत्रिभ्य एव हलाद्यनेकाच्भ्योऽट्यश्चत्यूर्णुभ्य एव चाजादिभ्यो भृशाभीक्ष्ण्ये यङ् भवति नान्येभ्यः। इति नियमादेव 'एध वृद्धौ, इत्यस्य यङ् नास्ति। तथा–पापच्ये। ङौ यकि–अतः खे च–

८७७ ॥ हलो यः। ४। ४। ५४। हलंताद् गोः परस्य यकारस्य खं भवति अगे परतः। पापच्यते देवेन। कर्तरि भावे कर्मणि च कर्मकर्तरि च समानं। अपापच्यत। पापच्येत। पापच्यतां। पापचांचक्रे। पापचिषीष्ट। अपापचिष्ट। पापचिता। पापचिष्यते। अपापचिष्यत। इत्यादि। अपापचि देवेन। नानद्यते। यङुपोरिति वर्तमाने–

८७८ ॥ नीग् वंचुस्रंसुध्वंसुभ्रंसुकसपतपद्स्कंदां। ५। २। १०४। वंचुप्रभृतीनां यङुबंतानां चस्य नीगागमो भवति। दनीध्वस्यते। "लिटीग्यणः साचोऽय्यांज्यं" वशो याङि" इति च वर्तमाने–

८७९ ॥ स्वप्स्यमृव्यः। ४। ३। २९। स्वप् स्यम् व्या इत्येतेषां याङि साचोऽय्यंपरस्य यण इग् भवति। वेवीयते। "दीश्च्व्यकृद्गे" इति दीः। जोहूयते।

८८० ॥ गत्यर्थात् कुटिले। २। १। ३४। गत्यर्थात् कुटिले वर्तमानात् यङ् भवति। जाहायते। भूमेत्यादिनेत्व। अभिदिधीयते। तन्नियमाददेर्यङ् नास्ति। यि क्ङित्ययङ्,, शाशय्यते। वाव्रश्च्यते। देदीव्यते। ङौ-देदीव्यते देवेन। लिङ्वत् कृञ्यामिति दीत्वस्य पूर्वत्रासिद्धत्वादेप् प्राप्तः। "परेऽचः प्राचः" इत्यत्खस्य स्थानिवद्भावान्नास्ति। देदिवांचक्रे। सोषूयते। नानह्यते। सोसूयते। अशाश्यत। चचीयते। तोतुद्यते। अतोतुद्यत। तोतुद्येत। तोतु-

यतां । तोतुदिषीष्ट । तोतुदांचक्रे । अतोतुदिष्ट । अतोतुदि । तोतुदिता । तोतुदिष्यते । अतोतुदिष्यत । "रीङ् ऋतः,, इति रीङादेशः । मेम्रीयते । मोमुच्यते । रोरुध्यते । बोभुज्यते । योयुज्यते ॥

८८१ ॥ ङस्यातो नुक् । ५ । २ । २०५ । ङसंज्ञकांतस्य गोर्यङ्पोर्यश्चस्तस्याकारांतस्य नुगागमो भवति । तस्यानुस्वारादिः । तंतन्यते । मंमन्यते । चक्रीयते । चक्रीयते । वव्रीयते । वशित्यादिना यण इक् । यङ्पोरिति वर्तमाने—

८८२ ॥ रीगृत्वतो । ५ । २ । २०९ । ऋकारवतो गोर्यङि चस्य रीगागमो भवति । जरीगृह्यते । इत्यादि । सर्वं पूर्ववन्नय ॥ इति यङंताः । किं च—

८८३ ॥ यङ उप् । १ । ४ । १४४ । यङो बहुलमुप् भवति । त्यखे त्याश्रयन्यायेन द्वित्वादि । ततो लडादिः । चर्करीतं चेत्यदादिषु भवत्सु पाठात् यङ्लुबंतस्यादादित्वं । तेन शप उप्मविधिश्च ।

तिपा शपानुबंधेन निर्दिष्टं यद् गणेन च ।
यच्चैकाच्ग्रहणं किंचित् पंचैतानि न यङ्लुपि ॥१॥

इति यङो ङित्वाद् स्थानिवद्भावेन दो न भवति । थस्य ग पित्यचि हल्युण्योरौ" इति वर्तमाने—" ब्रुव ईट् " इत्यनुवर्त्य—

८८४ ॥ यङ्तुरुस्तोर्बहुलं । ५ । २ । १९२ । यङ्लुबंतात्तु रु स्तु इत्येतभ्यश्च परस्य हलादेः पितो गस्य बहुलं ईडागमो भवति । पित्स्वेव न ङित्सु । झस्य थादित्यत् । बोभवीमि । बोभोमि । बोभूवः । बोभूमः । बोभवीषि । बोभोषि । बोभूथः । बोभूथ । बोभवीति । बोभोति । बोभूतः । बोभवति । थवित्सेरिति झर्जुस् । अबोभवं । अबोभूव । अबोभूम । अबोभवीः । अबोभूः ।

अबोभूतं । अबोभूत । अबोभवीत् । अबोभोत् । अबोभूतां । अबोभवुः । बोभूयां । बोभूयाव । बोभूयाम । इत्यादि । सेर्हेरादेशो क्डिदित्यर्वाट् नास्ति । बोभवानि । बोभवाव । बोभवाम । बोभूहि । बोभूतात् वा । बोभूतं । बोभूत । बोभवीतु । बोभोतु, बोभूतात् वा । बोभूतां । बोभवतु । बोभूयते देवेन । इत्यादि । बोभूयात् । बोभूयास्तां । बोभूयांचकार । अबोभवीत् । अबोभवीष्टां । अबोभवीषुः । प्रकृतिग्रहणे यङुबंतस्यापि ग्रहणमिति क्वचिदेव न सर्वत्र । तेन-भुभू इत्यादिना सरुव् नास्ति । तथा च कश्चित्-

लुङ्लिट्प्रतिपदोक्तानि सानुबंधकृतानि च ।
यङुबंतस्य नेष्टानि संख्यागणकृतानि च ॥ २ ॥

इत्याहुः । परे पुनरत्राप्युपमिच्छति । अबोभोत् । अबोभूतां । अबोभवुरित्यादि । बोभविता । बोभवितारौ । बोभवितारः । बोभविष्यति । अबोभविष्यत् । ञीटादि च-बोभाविषीष्ट । बोभविषीष्ट । बोभवांचक्रे । अबोभावि । इत्यादि । पापचामि । पापच्मि । पापच्वः । पापच्मः । पापचीषि । पापक्षि । पापक्थः । पापक्थ । पापचीति । पापक्ति । पापक्तः । पापचति । नानंदीति । नानंत्ति । दनीध्वंसीति, दनीध्वंस्ति वा । वावेति । वाव्याति । जोहवीति । जोहोति । जोहूतः । जाहेति । जाहाति । जाहीतः । दाधेति । दाधाति । धात्तः ।

८८९ ॥ थस्य गे पित्यचि । ५ । १ । ९५ । थसंज्ञकस्य गोर्धेरुङ् एप्न भवति पित्यजादौ गे परतः । देदिवीति अनिड्पक्षे-घ्युङः,, इत्येपि "व्योः खे वल्कौ" इति वखे च सति-देदेति । "कस्य झल्क्व्योः क्ङिति" इत्येदनुवर्त्य-छ्वः शूठ् ङे चेति झलि कौ च केचिदूठमिच्छंति । तेनोठि यण्येपि च कृते-देद्योति । देद्यूतः । देदिवति । देदिवांचकार । सोषवीति । सोषोति । नानहीति ।

नानद्धि । सोषवीति । सोषोति । अशाशीति । अशाष्टि । चेचयीति । चेचेति । तोतुदीति । तोतोत्ति । रीगृत्वतामिति वर्तमाने–

८८६ ॥ रुग्रिग् चोपि । ५ । २ । २१० । ऋत्वतो गोर्यङ्लुपि चस्य रुग् रिग् चागमो भवति । मर्मरीति । मरिमरीति । मरीमरीति । मर्मर्ति । मरीमर्ति । मरिमर्ति । चर्करीति । चरिकरीति । चरीकरीति । चर्कर्ति । चरिकर्ति । चरीकर्ति । जर्गृहीति । जर्गर्ढि । इत्यादि नेयं । वृतुञ् वृत्तौ । वर्वृतीति । वर्वर्त्ति । इत्यादि । गृधु अभिकांक्षायां । जर्गृधीति । जर्गर्द्धि । इत्यादि । लङि–अजर्गृद्ध । ईडभावे--ध्युङः,, एप् । सिपः खं । भष्भावः । ततो धकारस्य जश्त्वं । "सिपि रिर्वा" इत्यधिकृत्य–दः,, इति विकल्पेन रिः । रो री- ति पूर्वस्य रखं । द्विखऽणः " इति दीः । अजर्घाः । अजगृद्धं । अजगृद्ध । अजगृधीन् । अजघार्त्ति । अजगृद्धां । अजगृधुः । इत्यादि सप्रपंचप्रयोगतः प्रयोज्यं ॥ इति यङ्लुबंताः ॥

भवति कश्चित् तं भवंतं भावितस्य भवनं वा प्रयोजयतीति विगृहे–णिजिति वेति च प्रस्तुत्य—

८८७ ॥ हेतुमति । २ । १ । ३९ । हेतुमति स्वार्थे धोर्वा णिच् भवति । णकार ऐबर्थः । चकारो णाविति सामान्यग्रहणाविघातार्थः । ऐबावादेशौ । धुसंज्ञा च । ततः पूर्ववल्लुडादयः । भावयामि । भावयावः । भावयामः । इत्यादि ।

८८८ ॥ णिचः । १ । २ । ८६ । णिजंताद्धोः फलेशे कर्तरि लस्य दो भवति । भावये । भावयावहे । भावयामहे । इत्यादि । डौ–यकि णेः खं । भाव्यते । अभाव्यत । भाव्यत । भाव्यतां । कर्मकर्तरि—दाधिणिश्रिश्रंथिस्नुद्रोश्च त्रिश्चेति णिजंतद्

ञियकौ न भवतः । ततः शबादयः । भावयते स्वयमेव । इत्यादि । अभावयत । भावयेत । भावयतां । कौ—अभाव्यत देवेन । अन्वभाव्यत । अभावयत् । भावयेत् । भावयीत । कौ—भाव्येत । देवेन । कर्मकर्तरि यक् नास्ति शबेव । भावये स्वयमेव । भावयतु । भावयतात् वा । भावयतां । कौ—भाव्यतां । कर्मकर्तरि—भावयतां । भाव्यात् । भावयिषीष्ट । कौ—भविषीष्ट । भावयिषीष्ट देवेन । भावयांचकार । भावयांबभूव । भावयामास । भावयांचक्रे । भावयांबभूव । भावयामाहे । एति हः,, इति हकारः । णिश्रिद्रुस्रोः कर्तरि कजिति कच् । भावि अ अम् इति स्थिते—लिङ्चूकाचि धोरिति द्वित्वं ततो यणादेशस्तदपवादः पुनरियादेशः णः खं च प्राप्तं । परत्वात् णेरिति णः खं । "णौ कच्युङः प्रोऽशास्वक्ल्यृदितः" इत्युङः प्रादेशः । "स्थानीवानल्विधौ" परेऽचः प्राचः,, इति च प्रस्तुत्य —

८८९ ॥ द्वित्वेऽचि । १ । १ । ५८ । द्वित्वनिमित्तेऽचि अजादेशो द्वित्वे कर्तव्ये स्थानिवद् भवति । इति स्थानिरूपं । एतच्च—

८९० ॥ ओः पुयण्ज्ये । ५ । २ । ११० । सनि परे द्विर्भावे चस्य उवर्णस्य पवर्गे यणि जकारे अकारे परे इकारादेशो भवति । इति इकारः । इति चस्योवर्णस्येत्वशासनाज्ज्ञायते । तेन भू इ अ अम् इति स्थिते पश्चाद्द्वित्वं चकार्यं । पूर्ववत् णिखंवावादेशप्रादेशाः । "घौ कच्यनक्खे सन्वद्" इति सन्वद्भावः । "ओः पुयण्ज्ये" इति चस्येत्वं । धेर्दीर्घनजादेरिति दीत्वं । अबीभवं । अबीभवे । इत्याद्यूह्यं ॥ एधयामि । लुङि—ऐदिधं । पाचयामि । अपीपचं । कौ—अभावि देवेन । अभाविष्ट । अभावयिषि । ञीटि णिखं । अबीभवं । लुटि—भावयितास्मि । भावयिताहे । कौ—भाविता देवेन । भाविताहे । भावयिताहे । भावयिष्यते । कौ—भविष्यते । भावयिष्यते ।

अभावयिष्यत् । अभावयिष्यत । कौ—अभाविष्यत । अभावयिष्यत । इत्याद्युन्नेयं । एधयामि । ऐदिधं । पाचयामि । अपीपचं । नंदयामि । अननंद । प्रध्वंसयामि । प्रादध्वंसं । ह्रीव्लीभीत्यादिना णाविति वर्तमाने—

८९१ ॥ शाच्छासाह्वाव्यावेपां युक् । ५ । २ । ४१ ।
शा प्रभृतीनां णौ परतो युगागमो भवति । संव्याययामि । समविव्ययं । ह्वाययामि, अजुहवं ।

८९२ ॥ ह्रीव्लीरीक्नूय्यर्तिक्ष्माय्यातां पुग्णावेप् । ५ । २ । ४२ । ह्री प्रभृतीनां णौ परतः पुगागमो भवति । ह्रापयामि अजीह्रपं । अद्धापयामि । अददीधपं । आदयामि । आदीदं । अतिशाययामि । अत्यशीशयं । वाचयामि । अवीवचं । देवयामि । अदीदिवं । सावयामि । असूषवं । सन्नाहयामि । समनीनहं । सावयामि असूषवं । आशयामि । आशीशं ।

८९३ ॥ चिस्फुरोर्वा । ४ । ३ । ५५ । चि स्फुर इत्येतयोरेचो णावात्वं वा भवति । ततः पुक् । निश्चापयामि । निश्चाययामि । निरचीचयं । तोदयामि । अतूतुदं । मारयामि । अमीमरं । मोचयामि । अमूमुचं । रोधयामि । अरूरुधं । भोजयामि । अबूभुजं । प्रयोजयामि । प्रायूयुजं । वितानयामि । व्यतीतनं । मानयामि । अमीमनं । कारयामि । अचीकरं । णाविति वर्तमाने ।

८९४ ॥ क्रीङ्जेः । ४ । ३ । ५३ । क्री इङ् जि इत्येतेषामेचो णावात्वं भवति । ततः पुक् । क्रापयामि । अचीक्रपं । वारयामि । अवीवरं । अनुग्राहयामि । अन्वजीग्रहं । चोरयामि । अचूचुरं । छादयामि । अचीच्छदं । लक्षयामि । अललक्षं । योज-

यामि। अयूयुजं। अर्चयामि। आर्चिचं। वारयामि। अवीवरमित्यादि योज्यं॥ घटादीनां तु विशेषः। गोहेरूद्डः, इति "दोषो णाविति चाधिकृत्य।

८९५॥ **घटादिकगेवनुजनीजृष्णसक्रसरञ्ज्यमोऽपर्यपस्खदकमूचम्यमः प्रोऽमञ्ज्योस्तु दीर्वा**। ४। ४। ९०। परि अप पूर्वस्खदिवर्जितानां घटादीनां कगे वनु जनी जृष् ष्णस् क्रस् रंजि इत्येतेषां कमिचमिअमिवर्जितानाममंतानां च गूनामुङः प्रो भवति णौ परतः अम्ञि परे तु णौ दीर्वा भवति। घटै चेष्टायां। घटयामि। अघटि। अघाटि। व्यथैष् चलभीत्योः। व्यथयामि। अव्यथि। अव्याथि। कगे इति सौत्रो धातुः। कगयति। अकगि। अकागि। वनुङ् याचने। वनयति। अवनि। अवानि। जनीङ् प्रादुर्भावे। जनयति। अजनि। अजानि। जृष्य् वयोहानौ। जरयति। अजरि। अजारि। ष्णस् नीरसने। स्नसयति। अस्नसि। अस्नासि। क्रस् हारणदीप्त्योः। क्रसयति। अक्रसि। अक्रासि। रंजौञ् रागे॥ हल्ङः, इति श्नान्खमिति रंजेरिति चाधिकृत्य—

८९६॥ **णौ मृगरमणे**। ४। ४। ९७। रंजेरुङो नकारस्य खं भवति णौ परतो मृगाणां क्रीडायामर्थे। रजयति मृगान् व्याधः। अरजि। अराजि। गम्लृ गतौ। गमयति। अगमि। अगामि। शमु दमु उपशमने। दमयति। अदमि। अदामि। अपर्यपस्खदादेरिति किं? स्खदैष् खनने। परिस्खादयति। अपस्खादयति। पर्यस्खादि। अपास्खादि। कमङ् कांतौ। कमृतेर्णिङीयाङिति णिङ्। कामयते। चमु अदने। आचामयति। अमु रोगे। आमयति।

८९७॥ **शमोऽदर्शे**। ४। ४। ८१। शमोऽदर्शेऽर्थे वर्तमानस्योङः शस्य प्रो भवति णौ परतः अम्ञि परे तु वा दीर्भवति।

शमयति रोगं । निशमयति श्लोकान् । अशमि । अशामि । अदर्शे इति किं ? निशामयति । शमो दर्शे इत्येके । णौ कच्युङ: प्रोऽशास्वक्ल्यृदित:, इत्यत्र अशास्वक्ल्यृदित:,, इति निषेधवचनात् प्रो न भवति । शास् अनुशिष्टौ । अनुशासयति । अन्वशशात् । माल मुख्ये । मालयति । अममालत् । गाधृङ प्रतिष्ठालिप्साग्रंथेषु । गाथयति । अजगाथत् । डुयाचृञ् चातिञ् चदिञ् याचने । याचयति । अययाचत् । सिकृङ् स्रिकृङ् श्रिकृङ् श्लिकृङ् शकिङ् श्लकिङ् ककिङ् स्वकिङ् त्रकिङ् ढौकृङ् लौकृङ् ष्वस्कै वष्कै मष्कै तिकै टिकै टिकृङ् रमिङ् आमिङ् गतौ । सेकयति । असिसेकत् । श्रिकयति । अशिश्रिकत् । ढौकयति । अडुढौकत् । ष्ठा गतिनिवृत्तौ । सत्वं । प्रस्थापयति । जिघ्रति:,, इति वर्तमाने—

८९८ ॥ । तिष्ठते: । ५ । २ । १३२ । स्था इत्येतस्य कच् परे णौ परत: उङ: इकारो भवति । चस्योविति वर्तमाने—

८९९ ॥ शर: खयि । ५ । २ । १८१ । चस्य शर उप् भवाति खयि परत: । हलोऽनादेरुबपवाद: । प्रातिष्ठपन् । इत्यादि सर्व मूह्यं ॥ इति सनंतयङंतयङुबंतणिजंताभ्यश्चतसृभ्य: प्रकृतिभ्य: लकारा: प्रदर्शिता: ॥ तेभ्य एव परा: निर्दिश्यंते । बुभूषति कश्चित् तमन्य: प्रयुङ्क्ते इति सन्नताद्धेतुमति णिचि अत इत्यखे धुत्वे च सति पूर्ववल्लडादय: । बुभूषयामि । इत्यादि । बुभूषये । इत्यादि । अबुभूषयं । अबुभूषये इत्यादि । बुभूषयेय । इत्यादि । बुभूषयाणि । बुभूषयै । इत्यादि । ण्यंतस्य सकर्मकत्वात् भावे नोदाहरणानि । कर्मणि—बुभूष्ये । इत्यादि । कर्मकर्तरि—दाधिणीत्यादिना ण्यंतत्वात् यक् नास्ति शप् भवत्येव । बुभूषये । अबुभूष्ये । अबुभूषये । बुभूष्येय । बुभूषयेय । बुभूष्यै । बुभूषयै । कर्तरि—बुभूष्यासं । बुभूषयिषीय । कर्मणो:—बुभूषिषीय ।

बुभूषयिषीय। बुभूषयांचकार । कौ—बुभूषयांचक्रे। बुभूषयां बभूवे। "णिकम्श्रिद्रुस्रोः कर्तरि काजिति काचि द्वित्वं । बुभूषि अ अमिति स्थिते—"चस्यैके" इति चस्य बु बु इति द्वित्वं। हलोऽनादेरिति उबादि। अबुबुभूषम्। "चस्यैके" इति चस्य द्वित्वाभावे अबुभूषं। अबुबुभूषे॥ कौ—अबुभूषि। अबुभूषिषि। अबुभूषयिष्ट। कर्मकर्तरि ञिट् नास्ति। बुभूषयितास्मि। बुभूषयिताहे। कौ—बुभूषिताहे। बुभूषयिताहे। बुभूषयिष्यामि। बुभूषयिष्ये। कौ—बुभूषिष्ये। बुभूषयिष्ये। अबुभूषयिष्यं। अबुभूषयिष्यं। कौ—अबुभूषिष्ये। अबुभूषयिष्ये॥ इत्यादि॥ बोभूयते कश्चित्तमन्यः प्रयुङ्क्ते तस्मिन् यङंतात् णिचि धुत्वे लडादयः। बोभूययामि। बोभूयये। अबोभूययं। अबोभूयये। बोभूययेयं। बोभूययेय। बोभूययानि। बोभूययै॥ इत्यादि सनंतणिजंतेन तुल्यं॥ बोभवीति कश्चित्तमन्यः प्रयुङ्क्ते इति यङ्लुबंताण्णिचि—बोभवयामि। बोभवये। इत्यादि। अबोभवयं। अबोभवये। बोभवयेयं। बोभवयेय। बोभवयानि। बोभवयै। इत्यादि॥ भावयति कश्चित्तमन्यः प्रयुङ्क्ते इति णिजंतात् णिचि—पूर्वस्य णेः खं। भावयामि। भावये। इत्यादि। अबीभवं। अबीभवे। एधयामि। ऐदिधं। पाचयामि। अपीपचं। इत्यादि। सन्नंतात् सन्नास्ति। "न सनः" इति निषेधात्। बोभूयितुमिच्छतीति यङंतात्सनि वलादेरिडितीटि अतः खे द्वित्वे च सति "प्राग्वत् सनः" इति दः। बुबोभूयिषे। द्वित्वाभावे—बोभूयिषे। कौ—बोभूयिष्यते। अनुबोभूयिष्ये। अबोभूयिषे। कौ—अबोभूयिष्यत। अन्वबोभूयिष्ये। बोभूयिषेयं। कौ—बोभूयिष्येत। अनुबोभूयिष्येय। बोभूयिषै। कौ—बोभूयिष्यतां। अनुबोभूयिष्ये॥ इत्यादि पूर्ववदुन्नेयं॥ बोभवितुमिच्छतीति यङ्लुबंतात् सनि—बुबो-

भविषामि । बोभविषामि । कै—बोभविष्यते । अनुबोभविष्ये । इत्यादि नेयं। भावयितुमिच्छतीति णिजंतात्सनि इटि "द्वित्वेऽचि" इति णेरेवयादेशयोः स्थानिवद्भावः । "ओः पुयण्ज्ये" इति ज्ञापकात् णौ च ऐबावादेशयोः स्थानिवद्भावः । भू इ इति स्थिते भू भू इति द्वित्वमन्यत् पूर्ववत् । बिभावयिषामि । बिभावयिषे । कर्मणि—बिभावयिष्ये । एवं—एदिधयिषामि । पिपाचयिषामि । इत्यादि ॥ बुभूषयितुमिच्छतीति वाक्यमेव ॥ सनंतणिजंतात् सनि—द्वित्वादौ च—बुबोभूषयिषति । बुबोभूषयिषते । द्वित्वाभावे—बोभूषयिषति । बोभूषयिषते । यङ्प्णिजंतात् सनि—द्वित्वे च—बुबोभावयिषति । बुबोभावयिषते । द्वित्वाभावे—बोभावयिषति । बोभावयिषते ॥ णिजंतणिजंतात् सन्नोदाह्रियते णिजंतसनंतादविशेषात् । एताभ्य एवोदाहृतपंचप्रकृतिभ्यो णिज् विधीयते । यङंतसंनतात् णिचि—बुबोभूयिषयति । बुबोभूयिषयते । लुङि—कचि द्वित्वे च—अबुबुबोभूयिषत् । अबुबुबोभूयिषत । द्वित्वाभावे—बोभूयिषयति । बोभूयिषयते । अबोभूयिषत् । अबोभूयिषत । यङ्लुवंतसनंताण्णिचि—बुबोभविषयति । लुङि—कचि—अबुबुबोभविषत् । अबुबुबोभविषत । द्वित्वाभावे—बोभविषयति । अबोभविषत् । णिजंतसनंतात् णिचि—बिभावयिषयति । लुङि—कचि—अबिबिभावयिषत् । द्वित्वाभावे—अबिभावयिषत । यङंताणिजंतसनंताण्णिचि—द्वित्वे च—बुबोभूययिषयति । अबुबुबोभूययिषत । द्वित्वाभावे—बोभूययिषयति । अबोभूययिषत ॥ यङ्लुवंतणिजंतसनंताण्णाचि—बुबोभावयिषयति । लुङ—कचि—अबुबुबोभावयिषत् । द्वित्वाभावे—बोभावयिषयति । अबोभावयिषत । इति पंचभ्यो निर्दर्शिताः । इत्यादिसर्वं विभाव्य यथासंभवमभ्यूह्यं । एवं—एकोनविंशतिप्रकृतिभ्यो विहिताः । तदाह—

प्रकृतेस्सन्यङ्लुगणिच् णिच् सन्नादेर्यङादितः ।
सन्यङ्ण्यादेस्सन्यङ्सन्नादेर्णिजयङ्णिचूसन्नादेश्चतस्रोऽपि ॥

अथ कण्ड्वादयः ।

कण्डूञ् गात्रघर्षणे ।

९०० ॥ **कण्ड्वादेर्यक्** । २ । १ । ४० । कंडूञ् इत्येवमादिभ्यो धुभ्यो यगित्ययं स्यो भवति । ककारः किद्कार्यार्थः । पुनर्धुसंज्ञायां – पूर्ववल्लडादयः । कण्डूयति । कंडूयते । अकंडूयत् । अकंडूयत । कण्डूयेत् । कंडूयेत । कंडूयतु । कंडूयतां । कंडूय्यात् । कण्डूयिषीष्ट । कंडूयांचकार । कंडूयांचक्रे । अकंडूयीत । अकंडूयिष्ट । कंडूयिता । कंडूयिष्यति । कंडूयिष्यते । अकंडूयिष्यत् । अकंडूयिष्यत । सनि—सन्यङोरित्यादेरकाचो द्वित्वं भवत्येकेषां मतं । चिकण्डूयिषामि । इत्यादि । यकस्तृतीयस्येत्यत्र "अचः" इति "एके" इति च विभागापेक्षयानुवर्तमाने–तेनादेरनादेश्चाचस्तृतीयस्यैकाचो द्वे भवतः" इत्यपरे । तेषां कण्डूयियिषामि । इत्यादि । यगंतस्य यङ्यङ्लुपौ न संभवतः । णिचि—कंडूययति । कण्डूययते । अकंडूययत् । अकंडूययत । कण्डूययेत् । कंडूययेत । कण्डूययतु । कण्डूययतां । कण्डूय्यात् । कण्डूययिषीष्ट । कण्डूययांचकार । कण्डूययांचक्रे । लुङि—अचकण्डूयत ॥ यकस्तृतीयस्येत्यत्र "अचः" इत्यनुवर्तते इत्यस्मिन् दर्शने द्वित्वादिर्नास्ति "अचः" इत्यस्याभावात् – अकंडूयत । "अचः,, इति नानुवर्तते इत्यत्र तु–य य इति द्वित्वं । अकंडूययत । कण्डूययिता । कण्डूययिष्यति । कण्डूययिष्यते । अकंडूययिष्यत् । अकंडूययिष्यत । एवं -मंतु–रोषाप्रीणनयोः । मंतूये इत्यादि । वल्गु माधुर्ये । वल्गयामि । इत्यादि । असू परगुणासहने । असूयामि । इत्यादी ।

सनि—असूयियिषामि । इत्यादि । असूययामि । इत्यादि । आसूयत । हृणीञ् रूपलज्जयोः । हृणीयते । इत्यादि । सुखदुःख तत्करणे "अतः" इत्यखं । सुख्यामि । इत्यादि । सनि–हलो यः" इति यखं । सुखिषामि । इत्यादि । णिचि—सुख्यायामि । इत्यादि । "वा क्यः" इति सूत्रे क्ययकोर्वेति केचित् पठंति । तेषां सुखयामीत्यादि ॥

इति कंड्वादयः ।

प्रकृतेः सुबंतप्रकृतिकाः ।

आत्मनः पुत्रमिच्छतीति विग्रहे—

९०१ ॥ **स्वेपः काम्यः । २ । १ । ७** । स्वस्यात्मनः संबंधि यदिबंतं तस्मादिच्छायामर्थे काम्यस्त्यो भवति वा । "तदंता धवः" इति धुसंज्ञायां—सुपो धुमृदोरिति सुप उप् । ततः पूर्ववल्लुडादयः । पुत्रकाम्यति । एवं—वस्त्रकाम्यति । कन्याकाम्यति । कविकाम्यति । राजकाम्यति । इदंकाम्यति । स्वःकाम्यति । अंतर्वर्त्तिनं सुपमाश्रित्य पदसंज्ञायां पदकार्यं नखादि । अपुत्रकाम्यत् । पुत्रकाम्येत् । पुत्रकाम्यतु । पुत्रकाम्यात् । पुत्रकाम्यात् । इति हलो य यगिति खमिति पक्षे यखं । पुत्रकाम्यांचकार । अपुत्रकाम्यीत ।

९०२ ॥ **हलो यः । ४ । ४ । ५४** । हलन्ताद्धोः परस्य यकारस्य खं । इतीह न भवति । पुत्रकाम्यिता । पुत्रकाम्यिष्यति । अपुत्रकाम्यिष्यत् । इत्यादि । सनि—

९०३ ॥ **सुपः । ४ । ३ । २** । सुबवयवस्य धोर्यस्य कस्यचिद् एकाचो द्वे रूपे भवतः । इति द्वित्वे पांचरूप्यं । पुपुत्रकाम्यिषति । पुतित्रिकाम्यिषति । पुत्रचिकाम्यिषति । पुत्रकामिम्यिषति । पुत्रकाम्यियिषति । एवं—वस्त्रकाम्यतीत्यादिषु नेयं । यङस्य नास्ति । णिचि पुत्रकाम्ययति । लुङि–कचि द्वित्वे चातुरूप्यं । अपुपुत्रकाम्यत् ।

अपुतत्रकाम्यत् । अपुत्रचकाम्यत् । अपुत्रकामम्यत । णावतो नाशादनक्ख इति निषेधात् सन्वद्भावो न भवति । तथा—पुत्रमिच्छत्यात्मन इति विग्रहे—

९०४ ॥ क्यजाक्षमः । २ । १ । ८ । स्वस्य संबंधिन इबंतादिच्छायामर्थे क्यज्वा स्यात् सा चेज्झिसंज्ञकान्मकारांताच्च न भवति । ककारः "नः क्ये,, इति विशेषणार्थः । चकारः सामान्यग्रहणाविघातार्थः । "ई घ्राध्मोः" "अस्य च्वौ इति चानुवर्तमाने—

९०५ ॥ क्याचि । ५ । २ । १५६ । गोरवर्णांतस्य ईकारो भवति क्याचि परतः । पुत्रीय इति स्थिते—पूर्ववल्लुडादयः । पुत्रीयति । कन्यीयति ।

९०६ ॥ नः क्ये । १ । २ ।११७। नकारांतस्य शब्दस्य क्ये परतः पदसंज्ञा भवति । क्य इति क्यङ् क्यच् क्यषित्येतेषां विशेषकाननुबंधानपास्य सामान्येन ग्रहणं । पदत्व नख । तत ईत्वं । राजीयति । शर्म्मीयति । "दीश्च्व्यकृद्ग" इति दीत्वं । कवीयति । शिखीयति । तरुणीयति । दंतिनीयति । पुत्रिणीयति । इक्षूयति । बधूयति । "रीङ् ऋतः" इति रीङ्—पित्रीयति । "एचोऽयवायाव्" इति वर्तमाने—

९०७ ॥ ञ्यि त्ये । ४ । ३ । ७६ । वकारांतो य आदेशः स यथास्थाने भवति यकारादौ त्ये परतः । गव्यति । नाव्यति । वाच्यति । स्रज्यति । सरित्यति । एतद्यति । युष्मद्यति । अस्मद्यति । "त्वमौ त्यद्यौ चैके" इति त्वमौ । त्वद्यति । मद्यति । "दीर्वोरिगुङः" इति वर्तते—

९०८ ॥ वा क्यः । ४ । ४ । ५५ । गोर्हलंतात् परस्य क्यच्क्यङोर्यकारस्य खं वा भवत्यगे परतः । अवाचीत्, अवाच्यीत् ।

इत्यादि । सनि—द्वित्वे—चातुरूप्यं । पुपुत्रीयषति । पुतित्रीयषति । पुत्रीयियिषति । पुत्रीयिषिषति । णिचि—पुत्राययति । लुङि—काचि—त्रैरूप्यं । अपुपुत्रीयत् । अपुतित्रीयत् । अपुत्रीययत् ।

९०९ ॥ अचः । ४ । ३ । ३ । धोः सुब्धोश्च परस्यादेरनादेश्च एकाचो द्वे रूपे भवतः । अशिश्वीयिषति । अश्वीयियिषति । अश्वीयिषिषति । इत्यादि नेयं ॥ प्रासादे इवाचरतीति विग्रहे—

९१० ॥ गौणादीपश्चाचारे । २ । १ । ९ । गौणादीबंतादिबताच्चाम्निम आचारेऽर्थे वा क्यष् भवति । पूर्ववल्लडादयः । प्रासदीयति कुड्यां । पर्यंकीयति मंचके । अश्वीयति वृषभे । इत्यादि । पुत्रमिवाचरतीति पुत्रीयति छात्रमाचार्यः । तल्पीयति किसलयं । राजीयति सेवकमित्यादि । अश्व इवाचरतीति विग्रहे—

९११ ॥ कर्तुः किः । २ । १ । १० । गौणादाचरणक्रियायाः कर्तुराचारेऽर्थे किब्भवति वा । स च सर्वोऽप्रयोगात् । पूर्ववदुस्वे सुबुप् । ततो लडादयः । अश्वति गर्दभः । गर्दभत्यश्वः । हसति बकः । इत्यादि । गल्भ इवाचरतीति विग्रहे—

९१२ ॥ गल्भक्लीबहोडाड्ङित् । २ । १ । ११ । गल्भादिभ्यो गणेभ्यः कर्तृभ्यः आचारेऽर्थे क्विब्ङिद् भवति । ङित्वादः । गल्भते । क्लीबते । होडते । इत्यादि । श्येनायते काकः । अश्वायते गर्दभः । एनीमाचरति एतायते । श्येनीव—श्येतायते । रोहिणीव रोहितायते । श्येन इवाचरतीति विगृह्य—

९१३ ॥ क्यङ् च । २ । १ । १२ । गौणादाचारक्रियायाः कर्तुराचारेऽर्थे क्यङ् भवति । ककारः " नः क्ये,, इति विशेषणार्थः । ङकारो दार्थः । पूर्ववदीत्वादि । श्येनायते काकः । अश्वायते गर्दभः । एनीवाचरति एतायते । श्येनीव—श्येतायते । रोहिणीव—

रोहितायते । कुमारीव--कुमारायते वृद्धा । तरुणीव--तरुणायते जीर्णा । तद्यते । यद्यते । त्वद्यते । मद्यते । इत्यादि ।

९१४ ॥ **सः खं वा** । २ । १ ।१३ । गौणादाचारार्थे क्यङ् भवति । सकारस्यांते वर्तमानस्य खं वा भवति । पयायते, पयस्यते ।

९१५ ॥ **अप्सरसः** । २ । १ । १४ । अप्सरसः क्यङ्, संनिधाने सकारस्य नित्यं खं भवति । अप्सरायते ।

९१६ ॥ **भृशादेश्च्वौ स्तः** । २ । १ । १६ । भृशादेः कर्तुः च्व्यर्थे वर्तमानात् क्यङ् भवति । तत्संनियोगे सकारतकारांतस्य खं भवति । अभृशो भृशो भवति-भृशायते । शीघ्रायते । उन्मनस्-उन्मनायते । वेहत्-वेहायते । इत्यादि । पटदित्यतो " द्विश्चानेकाचोऽव्यक्तानुकरणाड्डाच्,, इति डाच् । " म्रौ डाचि,, इति तकारस्य पररूपं ।

९१७ ॥ **डाच्लोहितादिभ्यः क्यष्** । २ । १ । १७ । डाजंतेभ्यो लोहितादिभ्यश्च कर्तृवाचिभ्यः च्व्यर्थे क्यष् वा भवति ।

९१८ ॥ **क्यषो वा** । १ । २ । १०० । क्यषंताद् मं वा भवति । पटपटायति । पटपटायते । सिमसिमायते । सिमसिमायति । अलोहितो लोहितो भवति लोहितायति, लोहितायते । अचर्म चर्मवान् वा भवति--चर्मायति, चर्मायते इत्यादि । सुखं भुंक्ते इति विगृह्य-

९१९ ॥ **सुखादेर्भुजीपः** । २ । १ । १८ । सुखादेरिबंतात् भुज्यर्थे क्यङ् भवति । क्यष् प्रकृतं क्यङं न बाधते । सुखायते । दुःखायते । कष्टं चिकीर्षति इति विग्रहे—

९२० ॥ **कष्टकक्षकृच्छ्रसत्रगहनात् पापे चिकीर्षौ** । २ । १ । २० । कष्टादेः पापेऽर्थे वर्तमानादीबंतात् चिकीर्षत्यर्थे

क्यङ् भवति । कष्टायते । कक्षायते । पापं कर्तुमिच्छतीत्यर्थः । शब्दं करोतीति विग्रहे—

९२१ ॥ शब्दादिः कृञि । २ । १ । २१ । शब्दादेरिबंतात् कृञ्यर्थे क्यङ् भवति । शब्दायते । वैरायते । हस्तं निरस्यतीति विग्रहे—

९२२ ॥ निरस्यंगेभ्यो णिङ् । २ । १ । २५ । अंगेभ्यः शरीरावयववाचिभ्यः इबंतेभ्यो निरसि क्रियायां णिङ् भवति । णिचोऽपवादः । हस्तयते । पादयते । सूत्रं करोतीति विग्रहे—

९२३ ॥ मृदो ध्वर्थे णिच् बहुलं । २ । १ । २८ । मृदो धूनामर्थे णिच् भवति बहुलं । णकारो "णौ,, इति सामान्यग्रहणार्थः । चकारस्तदविघातार्थः । सुबुप् । " णाविष्ठवन्मृदः,, इत्यतिदेशात्-तुरिष्ठेमेयस्सु टेः,, इति टिखं । ततो लडादयः । सूत्रयति व्याकरणं । मंडयति माणवकं । मिश्रीयत्योदनं । स्वच्छाति वस्त्रं । लवणयति सूपं । व्रतयति पयः । कृतं गृह्णाति—कृतयति । तूस्तानि विहंति वितूस्तयति । केशान् विजटीकरोतीत्यर्थः । पाशं विमोचयति विपाशयाति । रूपं दर्शयति रूपयति । लोमान्यनुमार्ष्टि-अनुलोमयति । अन्वलुलोमत् । पटुमाचष्टे—पटयति । अपटवीत् । वृक्षमाचक्षे—वृक्षयति । अववृक्षत् । मूलमाचक्षे-मूलयति । अमुमूलत् । वहौञ् प्रापणे "तः,, इति क्तः । "स्वञ्वच्छ्यादेः, इति साचो यण इक् । "हो ढः,, इति ढत्वं । "अधः,, इति तकारस्य धकारः । ष्टुत्वं " ढो ढि " इति ढखं । " ढ्रिखेऽणः " इति दीत्वं । ऊढमाचचक्षे णिचि टिखं । ऊढयति । लुङि कचि—द्वित्वं प्रति ढत्वादेरसिद्धत्वात् ' अचः, इति हि हि द्वित्वं । चकार्यं च । णिखं । " द्वित्वेऽचि,, इति स्थानिवद्भावात् सणेर्द्वित्वं । औजिढत् ।

तृणान्युद्धृत्य शातयति—उत्तृणयति । वस्त्रेण समाच्छादयति—संवस्त्रयति । वीणया उपगायति—उपवीणयति । तूलैरनुकृष्णाति-अनुतूलयति । श्लोकैरुपस्तौति – उपश्लोकयति । सेनयाभियाति–अभिषेणयति । वर्मणा संनह्यति—संवर्मयति । चूर्णैरवकिरति अव-स्रंसयति वा—अवचूर्णयति । पासाच्छिनत्ति–पासयति । अश्वेनाति-क्रामति–अत्यश्वयति । अतिहस्तयति । बहुलवचनात् इह न भवति । आख्यानमाचष्टे । इत्यादि सर्वत्र लकारेषु योज्यं ॥

इति सुबंतप्रकृतिकाः ।

अथ शत्रादयः कर्तृकर्मभावेषु कर्मकर्तरि च उदाह्रियंते "लटो वानितौ,, शतृशानौ,, इति वर्तमाने—

१२४ ॥ सल्लटः । २ । ४ । १३ । सति काले यो लट् तस्य शतृशानौ वा भवतोऽनितौ परतः । "लो मं,, इति मविषये शता । " इङानं दः,, इति दविषये शानः । शकारः शित्कार्यार्थः ऋकारः उगित्कार्यार्थः । पूर्ववच्छबादि । भवदिति स्थितौ स्वादयः । शत्राद्यंता वाच्यलिंगत्वात्त्रिष्वपि लिंगेषु योज्याः । तत्र–पुंसि–भवान्, भवंतौ, भवंतः । इत्यादि । नपि–भवत्, भवती, भवंति । इत्यादि । स्त्रियां—भवंती, भवंत्यौ, भवंत्यः । इत्यादि ॥ व्यतिभू शान इति स्थिते—पूर्ववच्छबादौ कृते—

१२५ ॥ आने मुक् ।५।१।१५६ । गोरकारांतादाने परतो मुगागमो भवति । उकारककारावितौ । व्यतिभवमानः । व्यतिभवमानौ । व्यतिभवमानाः । इत्यादि । व्यतिभवमानं, व्यतिभवमाने, व्यतिभवमानानि । इत्यादि । व्यतिभवमाना, व्यतिभवमाने, व्यतिभवमानाः । इत्यादि ॥ एधमानः, एधमानौ, एधमानाः । पचन् । पचत् । पचंती । पचमानः । पचमानं । पचमाना । नंदन् ।

नंदत् । नंदंती । ध्वंसमानः । ध्वंसमानं । ध्वंसमाना । व्ययन् । व्ययत् । व्ययंती । इत्यादि । "न थाद्,, इति नुमो निषेधः । जुह्वत् । जुह्वतौ । " वा नपः,, इति थे वा नुम् । जुह्वत् । जुह्वती । जुह्वति, जुह्वंति कुलानि । जुह्वती, जुह्वत्यौ । उज्जिहानः । दधत् । अभिदधानः । अदन् । अदत् । अदती । भा दीप्तौ–भान्, भाद् । "शीम्वोराद्,, इति वा नुम् । भांती । भाती । व्यत्यदानः । व्यत्यदानं । व्यत्यदाना । शयानः । शयानं । शयाना । ब्रुवन्, ब्रुवत्, ब्रुवती । ब्रुवाणः, ब्रुवाणं, ब्रुवाणा । दीव्यन्, दीव्यत्, दीव्यंती । " शप्श्याद्,, इति नित्यं नुम् । व्यतिदीव्यानः ॥ प्रसूयमानः ३ । नह्यन् ३ । नह्यमानः ३ । सुन्वन् । सुन्वानः । अश्नुवानः । चिन्वन् । चिन्वानः । तुदन्, तुदमानः ३ । म्रियमाणः । मुंचन् । मुंचमानः । रुंधन् । रुंधानः । भुंजानः । प्रयुंजन्, प्रयुंजानः । तन्वन्, तन्वानः । मन्वानः । कुर्वन्, कुर्वाणः । क्रीणान्, क्रीणानः । वृणानः । गृह्णन्, गृह्णानः । चोरयन् । छादयमानः । लक्षयन्, लक्षयमाणः । योजयन्, योजन् । अर्चयन् । अर्चयमानः । वारयन्, वारयमाणः । इत्यादि नेयं । भावे —भूयमानं देवदत्तेनेत्यादि । सर्वत्रैकवचनांतं नपुंसकलिंगमेव भवति । एध्यमानमस्माभिः । शय्यमानं युवाभ्यामित्यादि ॥ कर्मणि–अभिभूयमानो भानू राहुणा । अभिभूयमानं कर्म ध्यानेन । अभिभूयमाना बुद्धिः कर्मणा । इत्यादि त्रिलिंगं ॥ कर्मकर्त्तरि–अनुभूयमानः स्वयमेव । इत्यादि । ऌटि च–भविष्यन्, भविष्यत्, भविष्यती, भविष्यंती वा । इत्यादि । व्यतिभविष्यमाणः । इत्यादि ॥ कौ–भविष्यमाणं । इति । अभिभाविष्यमाणः, अभिभाविष्यमाणो देवदत्तो गुरुदत्तेनेत्यादि । तथा–एधिष्यमाणः । पक्ष्यन् ३ । पक्ष्यमाणः ३ । नंदिष्यन् । इत्यादि । होष्यत् । व्यतिहोष्यमाणः । कौ-

हाविष्यमाणं । होष्यमाणं । हास्यमानः । कौ–हायिष्यमाणं । हास्यमानं वा । श्रद्धास्यन् , श्रद्धास्यमानः । कौ–श्रद्धायिष्यमाणं, श्रद्धास्यमानं वा । अत्स्यन् । अत्स्यत् । अत्स्यती, अत्स्यंती वा । इत्यादि नेयं ।

९२६ ॥ **लिटः क्वसुकानौ** ।२।२।१०३। धोः परस्य लिटः स्थाने क्वसु कानावादेशौ भवतः । क्वसुर्मसंज्ञः । कानो दसंज्ञः । उकारः उगित्कार्यार्थः । ककारः कित्कार्यार्थः । क्वसौ दे नियमाद् इट् प्राप्तः ।

९२७ ॥ **क्वस्येकाच्घसः** । ५ । १ ।१११। आकारांतात् एकाज् घस एव क्वसाविट् भवति नान्यत्र । इति नियमान्निषिद्धः । ततः स्वादयः । बभूवान् । बभूवांसौ, बभूवांसः । इत्यादि । शसादावजादौ–

९२८ ॥ **वसोर्वस्योम्** ।४।४।१३२। गोर्भस्यावयवो यो वस् तस्य च यो वकारस्तस्य उशादेशो भवति । इत्युकारः । बभूवुषः । बभूवुषा । बभूवद्भ्यां । बभूवद्भिरित्यादि । बभूवुषी । इत्यादि । काने—व्यतिबभूवानः । इत्यादि । कौ—बभूवानं देवदत्तेन । बभूवान इत्यादि । "हलमध्ये लिट्यतः" इत्येत्वचखे । ततः एकाच्त्वादिट् । पेचिवान्, पेचिवत्, पेचुषी । पेचानः । ननंद्वान्, ननंद्वत्, ननंदुषी । संविविवान्, संविविवत्, संविव्युषी । इत्यादि । जुहुवान्, जुहुवत्, जुहुवुषी । व्यतिजुहुवानः । जुहुवांचकृवान् । जुहुवांचकृवत्, जुहुवांचक्रुषी । व्यतिजुहुवांचक्राणः । "इटि चात्खं" इत्यात्खं । अभिदधिवान्, अभिदधिवत्, अभिदधुषी । अभिदधानः । जक्षिवान्, जक्षिवत्, जक्षुषी । व्यतिजक्षाणः । कौ–जक्षाणं देवदत्तेन । जक्षाणः । घस्लादेशाभावे—द्वित्वे दीत्वे कृते–एकाच्त्वादिट् । आदिवान्, आदिवत, आदुषी । व्यत्यादानः । आदानं देवेन । आदानः ॥ कृतयणीको द्वित्वे दीत्वे च पूर्ववादिट् ।

ऊचिवान्, ऊचिवत, ऊचुषी । ऊचानः ३ । कौ-ऊचानं । दिदिवान् । दिदिवत् । दिदिवुषी । व्यतिदिदिवानः । संन्नेहिवान्, संन्नेहिवत । संन्नेहुषी । सन्नेहिवानः । ३ । सुषुवान्, सुषुवत्, सुषुवुषी । सुषुवाणः । निश्चिचिवान्, निश्चिचिवत्, निश्चिच्युषी । निश्चिच्यानः निश्चिकिवान्, निश्चिकिवत्, निश्चिक्युषी । निश्चिक्यानः । तुतुद्वान्, तुतुद्वत, तुतुदुषी । तुतुदानः । रुरुध्वान, रुरुध्वत, रुरुधुषी । रुरुधानः । तेनिवान्, तेनिवत्, तेनुषी । तेनानः । चिक्रीवान्, चिक्रीवत्, चिक्रीयुषी। चिक्रीयाणः । चोरयांचकृवान्, चोरयांचकृवत्, चोरयांचक्रुषी । व्यतिचोरयांचक्राणः । इत्यादि ॥ सनि—बुभूषन् । व्यतिबुभूषमाणः । बुभूष्यमाणं देवेन । अनुबुभूष्यमाणः । अनुबुभूष्यमाणः स्वयमेव । बुभूषांचकृवान् । व्यतिबुभूषांचक्राणः । इत्यादि । बुभूषांचक्राणं । अनुबुभूषांचक्राणः । बुभूषिष्यन् । व्यतिबुभूषिष्यमाणः । जुहूषन् । व्यतिजुहूषमाणः । जिघित्सन् । व्यतिजिघत्समानः । इत्यादि ॥ कर्तर्याने—बोभूयमानः । कौ-बोभूय्यमानं देवेन । कर्म —अनुबोभूय्यमानः । कर्तरि कानै—बोभूयांचक्राणः । कौ—बोभूयांचक्राणं । अनुबोभूयांचक्राणः । बोभूयिष्यमाणः । कौ — बोभूयिष्यमाणः । अनुबोभूयिष्यमाणः । यङ्लुपि-उवादेशः । "न थाद्" इति नुमभावः । बोभुवत्, बोभुवतौ, बोभुवतः । इत्यादि । "वा नपः" इति वा नुम् । बोभुवत्, बोभुवती, बोभुवति, बोभुवंति । इत्यादि । बोभुवंती, बोभुवंत्यौः, बोभुवंत्यः । इत्यादि । बोभुवांचकृवान् । बोभुविष्यन् । णिचि-भावयन् । भावयमानः । कौ-भाव्यमानं । भाव्यमानः । भावयमानः स्वयमेव । भावयांचकृवान् । भावयांचक्राणः । कौ—भावयांचक्राणं । भावयांचक्राणः । हावयन् । हावयमानः । कौ—

हाव्यमानं । हाव्यमानः । हावयांचकृवान् । हावयांचक्राणः । ङौ—हावयांचक्राणं । हावयांचक्राणः । हावयांचक्राणः । एवं—आदयन् । देवयन् । सावयन् । तोदयन् । रोधयन् । तानयन् । क्रापयन् । चोरयन्नित्यादि नेयं । सन्नंतणिजंत—बोभूषयन् । बोभूषयमाणः । ङौ—बोभूष्यमाणं, बोभूष्यमाणः । कर्मकर्तरि—दधिणीत्यादिना यगभावः । बुभूषयांचक्राणः । ङौ—बुभूषयांचक्राणं । बुभूषयांचक्राणः । लृटि—बुभूषयिष्यन् । बुभूषयिष्यमाणः । ङौ—बुभूषयिष्यमाणं । इत्यादि । यङंतणिजंते-बोभूययन् । बोभूययमानः । ङौ—बोभूययमानं । बोभूययमानः । कर्मकर्तरि—यगभावः । बोभूययमानः स्वयमेव । बोभूययांचकृवान् । बोभूययांचक्राणः । ङौ—बोभूययांचक्राणं । बोभूययांचक्राणः । बोभूययिष्यन् । बोभूयायिष्यमाणः । बोभूययिष्यमाणः स्वयमेव ॥ यङुबंतणिजंते—बोभावयत् । बोभावयमानः । ङौ—बोभाव्यमानं । बोभाव्यमानः । बोभावयमानः स्वयमेव । बोभावयिष्यन्नित्यादि । कंडूयत् । कंडूयमानः । ङौ—कंडूयमानं । कंडूयमानः । कंडूयांचकृवान् । कंडूयांचक्राणः । ङौ—कंडूयांचक्राणं । कंडूयांचक्राणः । कंडूयिष्यत् । कंडूयिष्यमाणः । इत्यादि च सविशेषमवसेयं । इति शत्रादिपरिच्छेदः ।

नमः श्रीपूज्यपादाय लक्षणं यदुपक्रमं ।
यदेवात्र तदन्यत्र यन्नात्रास्ति न तत्कचित् ।

इति प्रक्रियावतारे मिङ्विधिःपंचमः ॥

अथ कृदंताः प्रदर्श्यते ।

जिष्णोःकिरीटमाणिक्यादंघ्रिकंजमलंकृतं ।
भवाटव्यटितश्रांतं रक्षत्वाजस्रमर्हतः ।

९२९ ॥ कृदमिङ् । २ । १ । ९९ । इतः प्रभृति धोर-

धिकारे मिङ्वर्जिताः वक्ष्यमाणास्त्याः कृत्संज्ञा भवंति। इति अधिका-
रेण कृत्संज्ञा–कृतकर्तर्यझिरिति प्रयोजनं।

९३० ॥ प्राक् क्तेर्वाऽसमः । २ । १ । १०० । स्त्रियां क्तिरिति वक्ष्यते। प्रागेतस्मात् क्तिसंशब्दनात् असमस्त्यो वा भवति। इत्यधिकारो वेदितव्यः। अपवादेन बाधितस्योत्सर्गस्य पुनरपवादविषये अनेन समावेशो विधीयते।

९३१ ॥ ण्वोर्ण्यः । २ । १ । १०१ । ण्वुतृजिति वक्ष्यते। प्रागेतस्मात् ण्वुसंशब्दनात् वक्ष्यमाणा ण्यसंज्ञा त्या भवंति। तयोर्ण्य-कृत्वार्थ इति प्रयोजनं।

९३२ ॥ तव्यानीयौ ।२।१।१७२। धोः परतः तव्यानीय इत्येतौ त्यौ भवतः। ततः स्वादयः। भवितव्यं। भवनीयं पुंसा। एधितव्यं, एधनीयं विद्वद्भिरित्यादि। अभिभवितव्यः। अभिभवनीयः शत्रुः। पक्तव्यः, पचनीयः, ओदनः। हर्तव्या, हरणीया भूः। होतव्यं, हवनीयं हविः। अत्तव्यं, अदनीयं घृतमित्यादि।

९३३ ॥ नशमज्जेर्झलि ।५। १। ४० । नश् मस्ज इत्येतयोर्झलादौ त्ये नुम् भवति। नंष्टव्यं। नशनीयं। मङ्क्तव्यं। मज्जनीयं।

९३४ ॥ योऽचोऽय्वास्वुः । २ । १ । १०३ । धोरजंताद् यस्त्यो भवति ण्यापवादः या आसु ऋकारांत इत्येतान् वर्जयित्वा। लव्यं। पूञ्–पव्यं।

९३५ ॥ ईद्यौ ।४।४।६८। आकारांतस्य गोरीकारादेशो भवति यत्ये परे। धेयं। देयं। आस्थेयं। अनुमेयं। विज्ञेयं। प्रहेयं।

९३६ ॥ ण्यित्ये । ४। ३ । ७६ । यकारादौ त्ये एचो अवादयो भवंति। इत्यव्। भव्यं हव्यं। श्रव्यं। लव्यं। पव्यं। इत्यादि।

अभ्यास्युरिति किं ? यु मिश्रणे-याव्यं । षुञ् अभिषवे । आङ्पूर्वः । आसाव्यं । कार्यं । हार्यं ।

९३७॥ पोरदुङोऽत्रपिवपिरापिलपिजपिजभिचामिदभेः । २ । १ । १०४ । त्रपादिवर्जितात् पवर्गान्तात् अकारोङो यस्त्यो भवति । शपौ क्रोशे-शप्यं । लभ्यं । गम्यं । रम्यं । त्रपादिनिषेधः किं ? अपत्राप्यं । डुवपौञ् बीजसंताने । वाप्यं । रप लप व्यक्तायां वाचि । राप्यं । लाप्यं । जप मानसे च । जाप्यं । जभ मैथुने । जाभ्यं । चमु अदने । आचाम्यं । दभि सौत्रो धातुः । दाभ्यं ।

९३८ ॥ यतिचतितकिशकिशसिसह्यजेः । २ । १ । १०५ । यत् चत् तक् शक् शस् सह् याजि इत्येतेभ्यो यस्त्यो भवति । यतिञ् प्रयत्ने । यत्यं । चतिञ् याचने । चत्यं । तक हसने । तक्यं । शक शकने । शक्यं । शस् हिंसायां । शस्यं । षहे मर्षणे । सह्यं । यजीञ् दानादौ । याज्यं ।

९३९ ॥ गदमदयमोऽगेः ।२।१।१०६। गद् मद् यम इत्येतेभ्यो गिरहितेभ्यो यो भवति । गद्यं । मद्यं । यम्यं । अगेरिति किं ? निगाद्यं । प्रमाद्यं । आयाम्यं ।

९४० ॥ चरेः ।२।१।१०७। चरेरगिपूर्वाद् यो भवति । ण्यापवादः । चर्यं ।

९४१ ॥ आङोऽगुरौ ।२।१।१०८। आङ्पूर्वाच्चरेर्यो भवति । चर्यो देशः । अगुराविति किं ? आचार्यः भट्टाकलंकः ।

९४२ ॥ वदः सुपि क्यप् च ।२।१। १११ । वदेर्गिवर्जिते सुपि वाचि क्यप् भवति यश्च । ककारः कित्कार्यार्थः । पकारस्तुगर्थः । क्यपि-"स्वब्वच्छयादः" इति यण इक् । "वागमिङ्" इति

वाक्सः । ब्रह्म उद्यते ब्रह्मणा उद्यते इति ब्रह्मोद्यं । ब्रह्मवद्यं । सत्य-मुद्यते इति सत्योद्यं । सत्यवद्यं ।

९४३ ॥ **भूयहत्याग्निचित्या भावे । २ । १ ।** भूय हत्या अग्निचित्या गिवर्जिते सुपि वाचि क्यबंता निपात्यंते भावे । भूयेति भवतेर्नपुंसके भावे क्यप् । ब्रह्मणो भवनं ब्रह्मभूयं गतः । देवभूयं गतः । हत्येति हंतेः स्त्रियां भावे क्यप् नकारस्य च तकारो निपात्यः । ब्रह्मणो हतिः ब्रह्महत्या । अग्निचित्येति अग्निपूर्वाच्चिञः स्त्रियां भावे क्यप् तुक् च । अग्निचित्या । अग्निग्रहणमन्यसुब्निवृत्यर्थं ।

९४४ ॥ **शास्स्त्वेतिवृञ्दृजुषः । २।१।११३ ।** शास् स्तु एति वृञ् दृ जुष् इत्येतेभ्यो धुभ्यः क्यप् भवति । न यो वर्तते चानुकृष्टत्वात् सुप्यगेरित्येव । शासु अनुशिष्टौ ।

९४५ ॥ **शासोऽङ्हलीत् । ४।४।३५ ।** हलङः क्ङिति चानुवर्तते । शासो गोरुङो अङि हलादौ च क्ङिति परतः इकारादेशो भवति । "शास्वसघसां" इति षत्वं । शिष्यः । स्तुञ् स्तुतौ । स्तुत्यः एतीति इणिको ग्रहणं । इण् गतौ । इत्यं । इक् स्मरणे । इत्यं । इङ् अध्ययने । अधीत्यं । वृञ् प्रावृर्णे । प्रवृत्यः । दृञ् अनादरे । आ-दृत्यं । जुषिञ् प्रीतिसेवनयोः । जुष्यं ।

९४६ ॥ **ऋदुङोऽक्लृप्चृतृचः । १ । १ ।११४ ।** क्लृप् चृति ऋचिवर्जितेभ्यः ऋकारोङ्गे धुभ्यः क्यप् भवति । वृतुञ् वर्तने । वृत्यं । शृदुङ् शब्दकुत्सायां । शृद्यं । अक्लृप्चृतृच इति किं ? कल्प्यं । चर्त्यं । अर्च्यं । ण्यापवादः ।

९४७ ॥ **ण्यः । २।१।१२२ ।** धोर्ण्यस्त्यो भवति । णकार ऐवर्थः । कार्यं । हार्यं । पच् युज् भुजित्यतो ण्यः ।

९४८ ॥ **चजोः कुर्धिण्ये तेऽनिटः ।५।२।९४ ।** तेऽनिटो

गोश्चकारजकारांतस्य कुत्वं भवति घिति ण्ये च परतः। पूर्ववद-न्यत्। पाक्यं। योग्यं। भोज्यं। वच् इत्यतो ण्यः।

९४९ ॥ निदाघावदाघार्घवाक्यं खौ। ५। १।६८। निदाघादयः शब्दाः कृतकुत्वादयो निपात्यंते खौ। वाक्यं। अन्यत्र-वाच्यं। पच् सिच् इत्यतो ण्यः।

९५० ॥ ण्य आवश्यके। ५। २। ७४। अवश्यस्य भाव आवश्यकं। तस्मिन्नावश्यकेऽर्थे ण्ये परतः चजोः कुत्वं न भवति। "ण्यः" इत्यावश्यके ण्यः। मयूरव्यंसकादित्वात् सः। "ण्येऽवश्यमः" इति मखं। अवश्यपाच्यं, अवश्यसेच्यं।

९५१ ॥ युजत्यजप्रवचां। ५।२।७५। युज् त्यज् प्रवच् इत्येतेषां ण्ये परतश्चजोः कुत्वं न भवति। योज्यं। त्याज्यं। प्रवाच्यं।

९५२ ॥ भुजोऽदौ ।५।१।७६। भुज् इत्येतस्याद्यर्थेऽभ्य-वहारे वर्त्तमानस्य ण्ये कुत्वं न भवति। भोज्य ओदनः। अदाविति किं? भोग्यः कंबलः।

९५३ ॥ निप्राद्युजः शकि। ५। २। ७७। नि प्र इत्येताभ्यां परस्य युजः शक्यतेर्गम्यमाने कुत्वं न भवति। नियोक्तुं शक्यः नियोज्यः, प्रयोज्यः। शकीति किं? नियोग्यः। प्रयोग्यः।

९५४ ॥ ओरावश्यके। २। १।१२४। उवर्णांतादोरवश्यं भावे द्योत्ये ण्यो भवति। यापवादः। पूञ् पवने। इत्यतो ण्ये "ण्यि त्ये" इत्याव्। पाव्यं। अवश्यपाव्यं। लूञ् छेदने। लाव्यं। अव-श्यलाव्यं। भू-भाव्यं। अवश्यभाव्यं।

९५५ ॥ ण्वुतृच्।२।१।१२९। सर्वेभ्यो धुभ्यो ण्वु तृच् इत्येतौ त्यौ भवतः। णकार ऐवर्थः। चकारः "ण्वुतृज्भ्यां च" इति विशेषणार्थः।

९५६ ॥ वोरकः । ५ ।१।१। वु इत्येतस्य गोर्निमित्तभूतस्य अक इत्ययमादेशो भवति । भावकः । भविता । कारकः । कर्ता । नायकः । नेता । पाचकः । पक्ता । मोचकः । मोक्ता । इत्यादि त्रिषु लिंगेषु योज्याः । लोदिदचोऽपच्छ्विश्रिशीत्यादिनाऽनिट्त्वमिट्त्वं च प्रत्येयं ।

९५७ ॥ गाङ्कुटामञ्णि ङिद्वत् ॥ १।१।८९। गाङित्येतस्य कुटादीनां च धूनां अञ्णि त्ये परतो ङितीव कार्यं भवति । संकोटकः । संकुटिता । उद्घोटकः । उद्घुटिता ।

९५८ ॥ इटि विजः । १ । १ । ९० । विजेर्धोरिडादौ त्ये ङित्कार्यं भवति । उद्विजिता ।

९५९ ॥ हनस्तोऽणशञ्णौ । ५ । २ । ३५ । हंतेर्णशञ्जि-वर्जिते ञ्णिति परे नकारस्य तकारादेशो भवति ।

९६० ॥ हो हनो ञ्णिन्नि । ५ । २ । ६७ । हंतेर्हका रस्य ञ्णिति त्ये नकारे च परतः कुत्वं भवति । घातकः । हंता ।

९६१ ॥ कृञ्ञौ युक् । ५ । २।३७। आकारांताद्धोः कृति ञ्णिति ञौ च युक् भवति । दायकः । दाता । विधायकः । विधाता । गायकः । गाता ।

९६२ ॥ न मोऽकम्वम्यम्रम्नम्गम्चमः ।५।२।३८। कमि वमि यमि रमि नमि गमि चमिवर्जितस्य मांतस्य धोः गोः कृति ञिति णिति ञौ च यदुक्तं तन्न भवति । "उङोऽतः" इति ऐप् न भवति । शमकः । शमिता । तमकः । तमिता ।

९६३ ॥ जन्वधेः । ५ । २ । ३९ । जन् वधि इत्येतयोः कृति ञ्णिति ञौ च यदुक्तं तन्न भवति । जनकः । जनिता । वधकः । वधिता ।

९६४ ॥ **जभोऽचि** । ५ । १ । ४१ । जभ इत्येतस्याजादौ स्ये नुम् भवति । जंभकः । जंभिता ।

९६५ ॥ **रधः** । ५ । १ । ४२ । रध इत्येतस्याजादौ त्ये परतो नुम् भवति । रंधकः । " ऊदिद्रूञः,, इति पक्षे इट् ।

९६६ ॥ **नेट्यलिटि** । ५ । १ । ३१ । रध इडादावलिटि त्ये नुम् न भवति । राधिता । रद्धा ।

९६७ ॥ **रभः** । ५ । १ । ४४ । रभ इत्येतस्याजादौ त्ये नुम् न भवत्यलिटि । आरंभकः । आरब्धा ।

९६८ ॥ **लभेः** । ५ । १ । ४५ । लभ इत्येतस्याजादौ लिड्वर्जितस्य नुम् भवति । लंभकः । लब्धा ।

९६९ ॥ **मृजेरैप्** । ५ । २ । १ । मृजेर्द्धोरैप् भवति गागयोः परतः । समार्जकः । संमार्जिता । संमार्ष्टा । सनि–बुभूषकः । बुभूषिता । यङि–बोभूयकः । बोभूयिता । यङुपि–बोभावकः । बोभाविता । णिचि—भावकः । भावयिता ।

९७० ॥ **तीच्छसहलुभरुषरिषः** । ५ । १ । १०३ । इच्छ सह लुभ रुष रिष इत्येतेभ्यस्तकारादावगे वा इड् भवति । इच्छतीति इषेः छादेशभाजो ग्रहणं । एषिता । सहिता । लोभिता । रोषिता । रेषिता । इडभावे—टुत्वादि ।

९७१ ॥ **सहवहोऽस्यौः** । ४ । ३ । ३०३ । सहि वहि इत्येतयोरवर्णस्य ढ्खे सत्यौकारादेशो भवति । एष्टा । सोढा । लोब्धा । रोष्टा । रेष्टा ।

९७२ ॥ **पचादिभ्योऽच्** । २ । १ । १३० । पच् इत्येवमादिभ्यो धुभ्योऽजित्ययं त्यो भवति । पचतीति पचः । वचः । भवः ।

करः । हरः । नयः । लोलुवः । पोपुवः । मेघः । श्विषः । श्वपचः । चक्रधरः । बहुवचनादाकृतिगणः ।

९७३ ॥ नंद्यादिभ्योऽनः । २ । १ ।१३१। नंदि इत्येवमादिभ्योऽन इत्ययं स्यो भवति । नंदयतीति नंदनः । णिखं । वासनः । मादनः । विदूषणः । " दोषो णौ,, इत्यूकारः । साधनः । वर्द्धनः । शोभनः । रोचनः । एतेभ्यो ण्यंतेभ्योऽनः । सहनः । पतनः । इत्यादि ।

९७४ ॥ ग्रहादिभ्यो णिन् । २ । १ । १३२। ग्रह इत्येवमादिभ्यो णिन् स्यो भवति । गृह्णातीति ग्राहयतीति च ग्राही । उद्भासन इति उद्भासी । तिष्ठतीति स्थायी । मंत्रयतीति मंत्री । समर्थयति इति समर्थी इत्यादि ।

९७५ ॥ ज्ञाकॄगॄप्रीगुङः कः । २ । १ । १३९ । ज्ञादिभ्य इगुङ्भ्यश्च धुभ्यः कस्यो भवति । जानातीति ज्ञः ॥ "इटि चात्वं,, इति आत्वं । कॄ विक्षेपणे । " ऋतामिद्धोः " इतीद् । किरतीति किरः । गॄ निगरणे ।

९७६ ॥ ग्रोऽचि । ५ । २ । ६३ । गॄ इत्येतस्य घोरजादौ स्ये परे रेफः लत्वं वा भवति । गिरतीति गिरः । गिलः । प्रीञ् प्रियदीप्त्योः । प्रीणातीति प्रियः । लिख अक्षरविन्यासे । लिखतीति लिखः । बुधः । बुधः । युधः । इत्यादि ।

९७७ ॥ गावातोऽनिक् । २ । १ ।१४०। गौ वाचि घोराकारांतात् को भवति अनिक् च । प्रतिष्ठत इति प्रस्थः । त्रैङ् पालने । सुत्रं । ग्लै हर्षक्षये । सुग्लः । इत्यादि । अनिगिति किं ? ह्वेञ् स्पर्द्धाशब्दयोः । प्रह्वः । ज्या वयोहानौ । प्रज्यः । इत्यादि । " स्वव्यक्ष्यादेः,, इत्यादिना पाणिक न भवति ।

९७८ ॥ **ज्वलादिग्रहाद् वा । २ । १ । १४० ।** ज्वलादिभ्यो ग्रहश्च धोरगौ वाचि णत्यो वा भवति । पक्षे–अच् । ज्वलतीति ज्वालः, ज्वलः । साहः, सहः । रामः, रमः । ग्राहः, ग्रहः ।

९७९ ॥ **तनूश्याद्व्यधाश्रुसंस्त्रतीण्श्वसः । २ । १ । १४९ ।** तनादिभ्यो धुभ्यो णो भवति । तानः । उत्तानः । श्यैञ् गतौ । अवश्यायः । आत्—दायः । ग्लायः । व्यधो ताडने । व्याधः । श्रु गतौ । आश्रावः । संश्रावः । इण् गतौ । अत्यायः । श्वस् प्राणने । श्वासः । आश्वासः ।

९८० ॥ **आशिषि वुच् । २ । १ । १५३ ।** धोराशिषि गम्यमानायां वुच् भवति । चकारः "त्यस्थेऽचित्क्यपीद्"-इत्यादिना विशेषणार्थः । जीवतात्—इत्याशास्यमानो जीवकः । नंदकः वर्द्धकः । जीवका । नंदका । वर्द्धका ।

९८१ ॥ **कर्मण्यण् । २ । २ । १ ।** कर्मणि वाचि धोरण् भवति । कुंभं करोतीति कुंभकारः । छत्रधारः । शरलावः । वेदाध्यायः । चर्चावादः । कुंभकारी । छत्रधारी इत्यादि ।

९८२ ॥ **आतः कोऽह्वावामः । २ । २ । ३ ।** कर्मणि वाचि ह्वा वा मा वर्जितादाकारांतात् धोः को भवत्यणोऽपवादः । गां ददातीति गोदः । कंबलदः । पार्ष्णित्रः । सर्वज्ञः । क्षितिपः । ब्रह्मज्यः । अह्वावाम इति किं ? स्वर्गह्वायः । ततुवायः । धान्यमायः ।

९८३ ॥ **प्रे । २ । २ । ४ ।** कर्मणि वाचि प्रशब्दे च धोरातः को भवति । तत्वप्रदः । धर्मप्रज्ञः । सिद्धे सत्यारंभो नियमार्थः । "प्र एव गौ नान्यस्मिन्" इति–गोसंदायः ।

९८४ ॥ **दाज्ञः । २ । २ । ५ ।** कर्माणि प्रशब्दे च

वाचि दा ज्ञा इत्येताभ्यां को भवति । मोक्षप्रदः । मार्गप्रज्ञः । अयमपि नियमः । दाज्ञ एव नान्यस्मात्" इति—पार्ष्णिप्रत्रायः ।

९८५ ॥ **सुपि** । २ । २ । ७ । सुपि वाचि घोरातः कौ भवति । कच्छेन पिबतीति कच्छपः । द्विपः । पादपः । समस्थः । विषमस्थः ।

९८६ ॥ **गोवांबभूमिसव्यापाद्वित्रिकुशेकुशंकङ्गुमंजिपुंजिपरमेबर्हिर्दिव्यग्नेः स्थः** । ५ । ४ । ७५ । गवादिभ्यः परस्य तिष्ठतेः सकारस्य षत्वं भवति । गोष्ठः । अंबाष्ठः । अंबष्ठः । भूमिष्ठः । सव्यष्ठः । द्विष्ठः । त्रिष्ठः । कुष्ठः । शेकुष्ठः । शंकुष्ठः । अंगुष्ठः । मंजिष्ठः । पुंजिष्ठः । परमेष्ठः । बर्हिष्ठः । दिविष्ठः । अग्निष्ठा ।

९८७ ॥ **नखमुचादयः** । २ । २ । ८ । नखमुच इत्येवमादयः शब्दाः शिष्टप्रयोगतः साधवो भवंति । नखान् मुंचंति—अणोऽपवादः—नखमुचानि धनूंषि । मूलानि विभुजति मूलविभुजो रथः । कौ मोदते—कुमुदं । जले रोहति जलरुहं ।

९८८ ॥ **ओऽर्हः** । २ । २ । १४ । कर्माणि वाचि अर्हतेरत्यो भवति । इति पूजार्हो जिनः । पूजार्हा प्रतिमा ।

९८९ ॥ **धृञोऽसूत्रे** । २ । २ । १५ । कर्मण्यसूत्रे वाचि धरतेरत्यो भवति । जलं धरतीति जलधरः । शशधरः । चक्रधरः । गणधरः । असूत्र इति किं ? सूत्रधारः ।

९९० ॥ **शम्यस्थो घोः खौ** । २ । २ । १६ । शमि वाचि स्थावर्जिताद्घोरत्यो भवति खुविषये । शं भवति—शंभवः । शंकरः । अस्थ इति किं ? शंस्था । शमीति किं ? संस्था । टाबप्यजादित्वात् । खाविति किं ? शंकरी जिनविद्या । हेत्वादिना अट् ।

९९१ ॥ हेतुशीलानुलोम्येऽशब्दश्लोककलहगाथावैर-चाटुसूत्रमंत्रपदे । २ । २ । २७ । हेतुः कारणं । शीलं स्वभावः । आनुलोम्यमनुकूलता । एतेष्वर्थेषु गम्यमानेषु शब्दादिवर्जित-कर्मणि कृञो घोरट् त्यो भवति । तीर्थकरो जिनः । यशस्करी जिनविद्या । श्रद्धाकरः । प्रेषणाकरः । अशब्दादाविति किं ? शब्द-कारः । श्लोककारः । इत्यादि ।

९९२ ॥ गमेः खच्खड्डाः । २ । २ । ५८ । कर्मणि सुपि च यथासंभवं वाचि गमेर्धोः खच् खड् ड इत्येते त्या भवंति ।

९९३ ॥ मुमचः । ४ । ३ । २३१ । पूर्वपदस्याजंतस्याङ्गः खिदंते कृति धौ मुमागमो भवति । तुरंगमः । तुरंगः । तुरगः । " ङ्यापोः क्वचिद् खौ,, इति प्रः । भुजंगमः । भुजंगः । भुजगः ।

९९४ ॥ विहायो विह च । २ । २ । ५९ । विहायस् शब्दस्य वाचो विहादेशो भवति । गमेः खच्खड्डाः प्रागेव सिद्धाः । विहायसा गच्छतीति विहंगमः । विहंगः । विहगः ।

९९५ ॥ सुदुस्याधारे डः । २ । २ । ६० । सु दुस् इत्ये-तयोर्वाचोर्गमेर्डो भवत्याधारे । सुखेन गम्यतेऽस्मिन्निति-सुगो देशः । दुर्गो देशः ।

९९६ ॥ आशिषि घ्नः । २ । २ । ६३ । कर्मणि वाचि हतेराशिषि गम्यमानायां डो भवति । तिमिं हंत्वित्याशंसितः तिमिहः । शत्रुहः । शापहः ।

९९७ । क्वचिदपे । २ । । २ । ६४ । कर्मण्यपशब्दे च सुबंते वाचि हंतेः क्वचिड्डो भवति । केशमपहंतीति केशापहः । तमोपहः । दुःखापहः । क्वचिच्छब्दः शिष्टप्रयोगानुसरणार्थः ।

९९८ ॥ **टगमर्त्ये** । २ । २ । ६६ । कर्मणि वाचि हंतेष्टग् भवत्यमर्त्ये कर्त्तरि । वातं हंति विनाशयति वातघ्नमाविकं क्षीरं । पित्तघ्नं माहिषं पयः । श्लेष्मघ्नं कटुकं । जायाघ्नास्तिलकः । पतिघ्नी पाणिरेखा ।

९९९ ॥ **जायापत्योर्लक्षणे** । २ । २ । ६७ । जाया पति इत्येतयोर्वाचोः हंतेष्टग् भवति लक्षणे लक्षणवति कर्मकर्तरि मर्त्ये । लक्षणं शुभाशुभसूचनं तिलकालकादि । जायाघ्नो ब्राह्मणः । येन तिलकादिलक्षणेन जायां हंति तद्वानित्यर्थः । एवं—पतिघ्नी कन्या ।

१००० ॥ **स्पृशोऽनुदके क्विः** । २ । २ ।६८। स्पृशरुद- कवर्जिते सुबंते वाचि क्विस्त्यो भवति । घृतं स्पृशतीति घृतस्पृक् । मंत्रेण स्पृशतीति मंत्रस्पृक् । अनुदक इति किं ? उदकस्पर्शः ।

१००१ ॥ **ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचः** । २ । २ । ७१ । ऋत्विक् दधृक् स्रक् दिक् उष्णिक् इत्येते शब्दाः क्वित्यांताः निपात्यंते । अंचति युजि क्रुंच इत्येतेभ्यः क्विर्भवति । ऋतौ ऋतुं वा यजतीति ऋत्विक् । धृष्णातीति दधृक् । क्विर्द्वित्वं च । सृजंति तामिति स्रक् । कर्मणि क्विरमागमश्च । दिशंति तां—दिक् । कर्मणि क्विः । उत्स्निह्यतीति—उष्णिक् । ग्यंतत्वं षत्वं च निपात्यं । अंचु—प्राङ् । दध्यङ् । युजि--युङ् । क्रुञ्च--क्रुङ्, क्रुञ्चौ । निपातनादनखं ।

१००२ ॥ **कर्मणीवे त्यदाद्यन्यसमाने दृशष्टक् सक् च** । २ । २ । ७२ । त्यदादावन्यशब्दे समानशब्दे च कर्मणि इवार्थे उपमाने वाचि दृशः टक् सक् क्विश्च त्या भवंति । त्यमिव पश्यति, स्य इव दृश्यते,—त्यादृशः । त्यादृक्षः । त्यादृक् ।

"आ:,, इत्यात्वं । एवं—तादृश:, तादृक्ष:, तादृक् । अन्यादृश: । अन्यादृक्ष:, अन्यादृक् । सदृश:, सदृक्ष:, सदृक् । " समानस्य धर्मादिषु,, इति सादेश: ।

१००३ ॥ मन्वन्क्वनिब्विच: क्वचित् । २ । २ । ७३ । सुपि वाचि धोर्मन् वन् क्वनिप् विच् इत्येते त्या क्वचिद् दृश्यंते । क्वचिदिति बहुलार्थं । तेन—यथालक्ष्यं लक्षणव्यवस्था । मन्—सुष्ठु श्रृणातीति सुशर्मा । सुष्ठु तरतीति सुतर्म्मा । शृणाति दु:ख-मिति शर्मा सुखं । वृणोति शरीरमिति वर्म तनत्रं । हिनोति व्यवहारमिति हेम सुवर्णं । दधाति शोभामिति धाम । क्वचिद् ग्रह-णान्निरुपपदादपि त्य: । वन्-विजायते इति विजावा । "वन्या,, इत्यात्वं । एवमग्रे गच्छतीत्यग्रेगावा । "पे कृति बहुलं,, इतीपोऽनुप् । क्वनिप्—प्रातरेति प्रातरित्वा । करोतीति कृत्वा । कित्वादेनप् पित्वा-त् तुक् च भवत: । ध्यायतीति धीवा । ध्याप्यो: क्वनिपि-क्वचि दन्यदेव" इति यण इक् । "हलो यणिक:" इति दी: । एवं-प्याय-त इति पीवा । विश्-विशतीति वेट् । रिषतीति रेट् । षत्वजश्त्वे । एवर्थश्चकार: । जागर्त्तीति जाग: । अन्यथा-"जागुरविञिणशृङ्क्तीति एब्प्रतिषेध: स्यात् । शुभमिति झि: । शुभं यातीति । शुभंया: । कीलालं पिबतीति कीलालपा ।

१००४ ॥ क्विप् । २ । २ । ७४ । धो: क्वचित् क्विप् दृश्यते । अंतरीक्षे सीदतीति-अंतरीक्षसत् । एवं—द्युसत् । अंडसूते इति—अंडसू: । शतसू: । मित्रं द्वेष्टीति मित्रद्विट् । प्रद्विट् । द्विट् । मित्राय द्रुह्यतीति मित्रध्रुक् । गां दोग्धीति गोधुक् । प्रधुक् । अश्वं युनक्ति युज्यतेऽनेन वा इति अश्वयुक् । प्रयुक् । युजीति पूर्ववत् । तत्वं वेत्ति जानाति विंते विचारयति वा तत्वबित् । प्रवित् । विद्-

ति विद्यंते विंदंति वा विदः । तेषां वरः–विदांवरः । वाक्यं भिनत्तीति वाक्यभित् । प्रभित् । भित् । तमश्छित् । प्रच्छित् । छित् । शत्रुजित् । प्रजित् । जित् । अग्रणीः । प्रणीः । नीः । विराट् । सम्राट् । उखाश्रत् । पर्णध्वत् । वहाभ्रट् । पक् । याः । हाः । मित्रभूः । प्रतिभूः ।

१००५ ॥ **भजो ण्विः** । १ । २ । ७७ । सुबंते वाचि भजेर्ण्विर्भवति । णकार ऐवर्थः । इकार उच्चारणार्थः । वकारः साति साम्ये बाधनार्थः । तेनेह क्विप् न भवाति । अर्धं भजतीति-अर्द्धभाक् ।

१००६ ॥ **शीलेऽजातौ णिन्** । १ । २ । ७८ । जातिवर्जिते सुबंते वाचि धोः णिन् भवति शीले गम्यमाने । यत्र फलनिरपेक्षा प्रवृत्तिस्तच्छीलं । उष्णं भुङ्क्ते इत्येवं शीलः उष्णभोजी । उदासरंतीत्येवं शीला उदासारिण्यः । एवं–प्रत्यासारिण्यः गावः । प्रस्थायी । प्रयायी । शील इति किं ? उष्णभोजः । अजाताविति किं ? शालीन् भोक्ता । तृन्नेव ।

१००७ ॥ **कर्तरीवे** । १ । २ । ७९ । कर्तृवाचिन्युपमाने वाचि धोर्णिन् भवति । जात्यशीलार्थमिदं । उष्ट्र इव क्रोशतीति—उष्ट्रक्रोशी । ध्वांक्षरावी । सिंहनर्दी । वृत्ताविवार्थोंतर्भूत इति तदप्रयोगः ।

१००८ ॥ **व्रताभीक्ष्ण्ये** । १ । २ । ८१ । सुबंते वाचि धोर्णिन् भवति व्रते आभीक्ष्ण्ये गम्यमाने । व्रतं शास्त्रतो नियमः । पार्श्वे एव शेष्यं—पार्श्वशायी । स्थंडिलशायी । अश्राद्धभोजी । अलवणभोजी । पुनः पुनर्यद्भवतीति तदभीक्ष्णं । तस्य भावः आभीक्ष्ण्यं । कषायमाभीक्ष्ण्यं पिबंतीति कषायपायिणो गांधारयः । क्षीरपायिणः उशीनराः । सौवीरपायिणो बाल्हीकाः ।

१००९ ॥ मन्यात् । २ । २ । ८३ । सुबंते वाचि मन्यतेर्णिन् भवति । शोभनमानी ।

१०१० ॥ खश् स्वस्य । २ । २ । ८४ । स्वस्यात्मनो यत्संबंधि सुबंतं तस्मिन् वाचि मन्यतेः खश् भवति । दर्शनीयमात्मानं मन्यते दर्शनीयंमन्यः । सर्वज्ञंमन्यः । खित्त्वान्मुम् । शित्वाद् विकरणश्च ।

१०११ ॥ जनोऽनौ डः । २ । २ । ९६ । कर्मण्यनुशब्दे च वाचि जनेर्डो भवति भूते । पुमांसमनुजातः-पुमनुजातः । पुमनुजः । स्त्र्यनुजः । "अकर्मका अपि धवः सगयः सकर्मका भवंति" इति-जनिः सकर्मकः ।

१०१२ ॥ ईपि । २ । २ । ९७ । ईबंते वाचि जनेर्डो भवति भूते । उपशमे जातः उपशमजः । अप्सु जातः—अप्सुजः । सरसिजः । "ईपोऽद्बलः,, इतीपोऽनुप् ।

१०१३ ॥ कायामजातौ । २ । २ । ९८ । जातिवर्जिते कांते वाचि जनेर्डो भवति । बुद्धेर्जातः—बुद्धिजः संस्कारः । संकल्पजः—कामः । दुःखजः शोकः । अजाताविति किं ? अश्वाज्जातः ।

१०१४ ॥ क्वचित् । २ । २ । ९९ । क्वचिदन्यस्मिन् वाचि जनेर्डो भवति भूते लक्ष्यानुरोधेन । किंजातेन किंजः । अलंजातेन— अलंजः । द्वाभ्यां जन्मनोपनयेन च जातः-द्विजः । न जातः अजः । प्रजाता प्रजाः । स्त्रीभ्यो जातं-स्त्रीजमनृतं । अद्भ्यो जातं—अब्जं । क्वचिदन्यस्मादपि धोः डो भवति । परमाहंति पराहः । परिखाता परिखा । उपखा । अटति, अततीति वा आः । कनति कायतीति वा कः । खन्यते खनतीति वा खं । भातीति भं ।

१०१५ ॥ तः । २ । २ । १०० । धोर्भूते काले तसंज्ञस्त्यो

भवति । "क्तक्तवतू तः" इति तसंज्ञा । ककारोकारयोरित्संज्ञा । भूयते स्म भवति स्म इति वा विग्रहे—भूतः । भूतवान् । शयितं । शयितवान् । कृतः । कृतवान् । कृतवती । णेः ख—भावितः । भावितवान् । भावितवती । याचितं । कारितं । गमितं । जनितमित्यादि ।

१०१६ ॥ इट् ते । ५ । १ । १०२ ॥ निष्कुष इडागमो भवति तसंज्ञके परतः । निष्कुषितः । निष्कुषितवान् ।

१०१७ ॥ डीयश्वीदिदूवेटोऽपतस्ते । ५ । १ । १२९ । डीय श्वि इत्येताभ्यामिकारेतो यस्मिन् कस्मिंश्चिद् विकल्पितेटश्च पतातिवर्जिताद्धोस्तसंज्ञके परतो नेट् भवति ।

१०१८ ॥ द्रांतस्य तो नो दोऽमत्पृमूर्छा ॥ ५ । ३ । ८० । दकारांताद् रेफांताच्च मत्पृमूर्छिवर्जिताद्धोः परस्य तसंज्ञकस्य तकारस्य नकारादेशो भवति तत्संनिधाने दकारस्य च । "पूर्वस्य" इति वर्तमाने—

१०१९ ॥ ओदितः ॥५। ३ ।८४। ओकारेतो धोः परस्य तकारस्य नत्वं भवति । डीनः । डीनवान् । श्यनिर्देशात् भौवादिकस्य भवत्येवेट् । डयितः । डयितवान् । ओश्वि गतिवृद्ध्योः । स्वब्वच्छ्यादेः कितीति साचो यणिक् । "हलो यणिकः" इति दीः । शूनः । शूनवान् । ईदित्—विजीओ भयचलनयोः । उद्विग्नः । उद्विग्नवान् । लजीओ लस्जिओ व्रीडे । स्फादिसखं । लग्नः । लग्नवान् । नेट्—अपरद्धः । अपरद्धवान् । "ऊदिद्वूञः" इति विकल्पेन विकल्पितेट्त्वं । गम्लृ सृप गतौ । "ल्टोदिदच्चः—इत्यादिना नेट् । "हन्मन्—" इत्यादिना खं । गतः । गतवान् । हनौ—हतः । हतवान् । प्रच्छौ—पृष्टः । पृष्टवान् ।

१०२० ॥ आदितः । ५ । १ । १३६ । आदितो घोसे इट् न भवति । ञिमिदा–मिन्नः । मिन्नवान् । ञिक्ष्विदा—क्ष्विण्णः । क्ष्विण्णवान् ।

१०२१ ॥ स्फादेरातो घोर्यण्वतोऽध्याख्यः । ५ । ३ । ८१ । ध्याख्यावर्जितादाकारांताद् स्फादेर्यण्वतो धोः परस्य ततकारस्य नत्वं भवति । संस्त्यानः । संस्त्यानवान् । निद्राणः । निद्राणवान् । म्लानः । म्लानवान् । स्फादेरिति किं ? यातः । आत इति किं ? च्युतः । धोरिति किं ? निर्यातः । यण्वत इति किं ? स्नातः । अध्याख्य इति किं ? ध्यातः । ध्यातवान् । ख्यातः । ख्यातवान् ।

१०२२ ॥ ल्वादेः । ५ । ३ । ८२ । ल्वादिभ्यः परस्य ततकारस्य नत्वं भवति । लूनः । लूनवान् । पूनः । पूनवान् ।

१०२३ ॥ ऋतश्च क्तेः । ५ । ३ । ८३ । ऋकारांतेभ्यो ल्वादिभ्यश्च परस्य क्तेस्तकारस्य नत्वं भवति । इत्वं दीत्वं च । कीर्णिः । तीर्णिः । शीर्णिः । लूनिः । पूनिः । तकारस्य नत्वं प्रागेव सिद्धं । कीर्णः । कीर्णवान् इत्यादि ।

१०२४ ॥ श्याञ्चुदिवोऽस्पर्शानपादानजये ।५।३।८७। श्यै अंचु दिव् इत्येतेभ्यः परस्य ततकारस्य अस्पर्शे अनपादाने जये चार्थे नत्वं भवति । प्रतिश्यायते स्म प्रतिशीनः । प्रतिशीनवान् । अभिशीनः । समच्यते स्म समक्नौ शकुनेः पक्षौ । आद्यूनः देवदत्तः । अन्यत्र-शीतं वर्त्तते । उदक्तमुदकं कूपात् । द्यूतं वर्त्तते ।

१०२५ ॥ निर्वाणोऽवाते । ५ । ३ । ९० । निर्वाण इति निस् पूर्वात् वातेः परस्य क्ततकारस्य नत्वं भवति अवाते कर्त्तरि । नि-

र्वाणो मुनिः। निर्वाणः प्रदीपः। अन्यत्र-निर्वातो वातः। निर्वातं वातेन।

१०२६ ॥ शुष्पचोः क्वौ । ५ । ३ । ९२ । शुषि पच् इत्येताभ्यां परस्य ततकारस्य यथाक्रमं क व इत्येतावादेशौ भवतः । शुष्कः । शुष्कवान् । पक्वः । पक्वान् ।

१०२७ ॥ क्षो मः । ५ । ३ । ९३ । क्षै जै सै क्षये । क्षा इत्येतस्मात् परस्य ततकारस्य मकारादेशो भवति । क्षामः । क्षामवान् ।

१०१८ ॥ प्रस्त्यो वा । ५ । ३ । ९३ । प्रपूर्वात् स्त्यायतेः परस्य ततकारस्य मत्वं भवति वा । प्रस्तीमः । प्रस्तीमवान् । प्रस्तीतः । प्रस्तीतवान् ।

१०२९ ॥ दोसोमास्थां त्कितीत् । ५ । २ । १५८ । द्यतिस्यतिमास्थानां तकारादौ त्ये परतः इकारादेशो भवति । निर्दितः । निर्दितवान् । अवसितः । अवसितवान् । प्रमितः । प्रमितवान् । उपस्थितः । उपस्थितवान् ।

१०३० ॥ धाञो हिः । ५ । २ । १६१ । धाञित्येतस्य हिरादेशो भवति तकारादौ त्ये परतः । विहितः । विहितवान् ।

१०३१ ॥ दो दद् भोः । ५ । २ । १६३ । दा इत्येतस्य भुसंज्ञकस्य दद् इत्ययमादेशो भवति तकारादौ किति परतः । दत्तः । दत्तवान् ।

१०३२ ॥ मरुद्रुऽचः । ५ । २ । १६३ । मरुच्छब्दादजंताच्च गेः परस्य दा इत्येतस्य भुसंज्ञकस्य त्त इत्ययमादेशो भवति किति । मरुत्तः। मरुत्तवान् । प्रत्तः । प्रत्तवान् । परीत्तः । परीत्तवान् । तीति दीत्वं ।

१०३३ ॥ त्कित्त्येऽदोऽगे जग्धिः । १ । ४ । १२८ ।

तकारादौ किति थे चागे परतो अदेर्जग्धिरादेशो भवति । जग्धः । जग्धवान् । प्रजग्ध्य ।

१०३४ ॥ पूङ्यजोः शानः । २ । २ । १२१ । पूङो यजेश्च सत्यर्थे वर्तमानाद्धोः शानस्त्यो भवति । पवमानः । यजमानः ।

१०३५ ॥ वयःशक्तिशीले । २ । २ । १२२ । धोः सत्यर्थे वर्तमानात् वयसि शक्तौ शीले च गम्यमाने शानस्त्यो भवति । वयो यौवनादिस्तत्र—कतीह शिखंडं वहमानाः । कतीह कवचं पर्यस्यमानाः । यस्मिन् शिखंडवहनादि भवति तदिह वयो गम्यते । शक्तिः सामर्थ्यं । तत्र—कतीह पचमानाः । कतीह समश्नानाः । कतीह पाके समासे च शक्ता इत्यर्थः । शीलं स्वभावः । तत्र—कतीहांजानाः । कतीह मंडयमानाः । कतीहांजानादिशीला इत्यर्थः ।

१०३६ ॥ सुञ्द्विषर्हः सत्र्यरिशस्ये । २ । २ । १२४ । सुञ् द्विष् अर्ह् इत्येतेभ्यः सत्यर्थे वर्तमानेभ्यो यथाक्रमं सत्रिणि अरौ शस्ये च कर्त्तरि शतृत्यो भवति । सर्वे सुन्वंतः सत्रिणो यजमाना इत्यर्थः । द्विषन् शत्रुरित्यर्थः । अर्हन् विद्यां । अर्हन् पूजां । विद्याद्यर्हतया प्रशस्यते: कर्त्तेत्यर्थः ।

१०३७ ॥ शीलधर्मसाधौ तृन् । २ । २ । १२५ । शीले धर्मे साधौ च सत्यर्थे वर्तमानाद्धोः तृन् इत्ययं त्यो भवति । शीलमुक्तार्थः । धर्मः कुलाचारः । साधुः शोभनं । तत्र—शीले—कर्त्ता कटं । वदिता जनापवादान् । करणं वदनं च शीलमस्येत्यर्थः । धर्मे—वधूमूढां मुंडयितारः । के ते श्राविष्ठायनाः । श्राद्धे सिद्धेऽन्नमपहर्त्तारः आह्वरकाः । मुंडनाहरणादिरेव तेषामाचारानुप्रवृत्त इत्यर्थः । साधौ—कर्ता कटं । गंता खलं । साधु करोति गच्छतीत्यर्थः ।

१०३८ ॥ भूभ्राज्यलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृधुवृतुसहचर इष्णुः ।२।२।१२६। भूवादिभ्य शीलादौ सत्यर्थे वर्तमानेभ्यः इष्णुस्त्यो भवति । भवनशीलो भवनधर्मा साधु वा भवतीति भविष्णुः । एवं—भ्राजिष्णुः । अलंकरिष्णुः । निराकरिष्णुः । प्रजनिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । वर्द्धिष्णुः । वर्तिष्णुः । सहिष्णुः । चरिष्णुः ।

१०३९ ॥ शमष्टकाद् घिनिण् । २ । २ । १२९ । शमादिभ्योऽष्टभ्यो धुभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो घिनिण् भवति । घकारः कुत्वार्थः । इकारः उच्चारणार्थः । "न मोऽकम्वम्यम्रम्नम्गम्चमः" इत्यैप्प्रतिषेधः । शमी । दमी । तमी । श्रमी । भ्रमी । क्षमी । कमी । प्रमादी ।

१०४० ॥ दुहानुरुधदुषद्विषद्रुहयुजत्यजरजभजाभ्याघः । २ । २ । १३० ॥ दुहादिभ्यो धुभ्यः शीलादौ सत्यर्थे घिनिण् भवति । दोही । अनुरोधी । दोषी । द्वेषी । द्रोही । योगी । त्यागी । रागी । भोगी । अभ्याघाती । कल्याणभोगी । रजेति निर्देशान्नत्वं ।

१०४१ ॥ रुचलार्थाद्धेरनः । २ । २ । १४३ । रुशब्दे चल कंपे इत्येतदर्थेभ्यो घिसंज्ञकेभ्यो धुभ्यः शीलादौ सत्यर्थेऽनस्त्यो भवति । रवणः । आक्रोशनः । चलनः । चोपनः । घेरिति किं ? रविता श्लोकं । चालिता ग्रामं ।

१०४२ ॥ हलाद्यंताद्ङैदितोऽयसूदुदीपदीक्षणिङः ।२।२ । १४४ । ङकारेत ऐकारेतश्च हलादेर्हलंतात् घिसंज्ञकाद्धोः शीलादौ सत्यर्थेऽनो भवति यकारांत सूद् दीप् दीक्ष् णीङ् इत्येतान्

वर्जयित्वा । वर्त्तनः । वर्द्धनः । स्पर्द्धनः । जुगुप्सनः । मीमांसनः ।

१०४३ ॥ निद्रातंद्राश्रद्धाशीङ्दयस्पृहिगृहिपतेरालुः । २ । २ । १५४ । तंद्रादिभ्यः सत्यर्थे शीलार्थे वालुर्भवति । द्रै स्वप्ने । निद्रालुः । तंद्रालुः । ततो निपातनान्नत्वं । श्रत्पूर्वाद्धाञः- श्रद्धालुः । शयालुः । दयालुः । स्पृहयालुः । गृहयालुः । पतयालुः । एते चुरादिषु कथादयः । तत्रातः खं । तस्य "परेऽचः प्राचः" इति स्थानिवद्भावात् "ष्युकः एप्", उकोऽत ऐत्र् न भवति ।

१०४४ ॥ सन्भिक्षाशंस्वािंदिच्छादुः । २ । २ । १६२। सन्नंतात् भिक्षादेश्च सत्यर्थे शीलादौ उर्भवति । सन्-चिकीर्षुः । जिहीर्षुः । भिक्षि-यांचायां । भिक्षुः । आङः शसिञ् इच्छायां । आशंसुः । विद ज्ञाने । त्यस्य सांनियोगे नकारागमः । विंदुः । इच्छेति इच्छतेः छकारः । इष इच्छायां । छकारो निपात्यते । इच्छुः ।

१०४५ ॥ ञिन्मत्यर्चार्थशीलादिभ्यः क्तः ।२।२।१८१। ञिद्भ्यो मत्यर्थेऽर्चार्थेभ्यः शीलादिभ्यश्च धुभ्यः सति काले क्तस्त्यो भवति । ञिमिदा—मिन्नः । ञिक्ष्विदा—क्ष्विण्णः । मतिरिच्छा ज्ञानं च । तत्रेच्छार्थेभ्यः—राज्ञां मतः । राज्ञामिष्टः । ज्ञानार्थेभ्यः- राज्ञां बुद्धः । अर्चार्थेभ्यः—राज्ञामर्चितः । शीलादिभ्यः—

शीलितो रक्षितः क्षांतः आक्रुष्टो जुष्ट उद्यतः ।
श्रयितः शमितस्तुष्टो हृष्टो रक्षित आशितः ॥
कांतोऽभिव्यापृतो हृष्टो हतस्सुप्तो हतःस्थितः ।
लिप्तोऽथ दर्पितः स्निग्ध इत्याद्याः सति संमताः ।

१०४६ ॥ उणादयो बहुलं । २ । २ । १८२। उणादयस्त्याः सति काले वर्तमानेभ्यो बहुलं भवंति ।

१ ॥ **कृवापाजिमिस्वदिसाध्यशूदसनिजनिचरीणुच-टिभ्य उण्** । कृ वा इत्येवमादिभ्यो धुभ्य उण् इत्ययं त्यो भवति । कारुः । वायुः । पायुः । जायुः । मायुः । स्वादुः । साधुः । आशुः । दारुः । सानुः । जानुः । चारुः । आयुः । चाटुः ।

२ ॥ **गमेर्डोः** । गम् इत्येतस्य धोर्डो भवति । गौः ।

३ ॥ **भ्रमेश्च डूः** । भ्रम इत्येतस्य धोः डूर्भवति । भ्रूः ।

४ ॥ **इतिश्तिपौ धुनिर्देशे** । नंदिः । विदिः । मिदिः । दरिः । भवतिः । जुहोतिः । अत्तिरित्यादयः । बहुलग्रहणाद् येभ्यो धुभ्यो यस्मिन्नर्थे ये यथादृश्यंते ते तेभ्यस्तस्मिन्नर्थे तथा भवंति । ध्वर्थकार्यनियमासिद्धो भवति ।

यश्च वाच्यस्त्वृष्णा (ष्टा) व्याप्तं सूक्ततत्र प्रयत्नतः ।
तत्प्रत्येयमिहोणादौ रत्नाकरमिवाखिलं ॥ १ ॥

१०४७ ॥ **पदरुजो घञ्** । २ । ३ । १६ । पदिरुजिभ्यां घञ् त्यो भवति स च कर्त्तरि । पद्यतेऽसाविति पादः । रुज्यतेऽसाविति रोगः । घित्वात् कुत्वं ।

१०४८ ॥ **सृः स्थिररुग्मत्स्यबले** । २ । ३ । १७ । सर्त्तेर्धोः स्थिरादिषु कर्तृषु घञ् भवति । सरतीति सारः । चंदनस्य सारः-चंदनसारः । एवं-खदिरसारः । कालांतरस्थायी पदार्थ उच्यते । अतीसारो व्याधिः । "घञि प्रायः" इति दीत्वं । विसारो मत्स्यः । सारं बलं ।

१०४९ ॥ **भावे** । २ । ३ । १८ । धोर्भावे घञ् भवति । भवनं भावः । पाकः । त्यागः । रागः । कृदभिधेयो भावो लिंग-संख्यावान् द्रव्यवत् भवति ।

१०५० ॥ **अकर्त्तरि** ।२।३।१९। कर्त्तुरन्यस्मिन् कारके धोर्घञ्

भवति । प्रास्यते तामिति प्रासः। प्रतुद्यतेऽनेन प्रतोदः । दास्यतेऽस्मै इति दासः। आहरंति तस्मात्-इत्याहारः। भुज्यतेऽस्मिन्-भोगः। इत्यादि।

१०५१ ॥ इङः । २ । ३ । २० । इङो धोर्भावेऽकर्त्तरि घञ् भवति । अचोऽपवादः । अधीयते इति-अध्यायः । उपेत्याधीयतेऽस्मात् इत्युपाध्यायः । उपाध्यायी । उपाध्याया । बह्वादित्वाद्वा ङी ।

१०५२ ॥ इणोऽभ्रेषे ।२।१।३३। गिपूर्वादिणो धोरभ्रेषे विषयेऽर्थे वर्तमानादकर्त्तरि घञ् भवति । भ्रेषः स्वरूपाच्चलनं । एषोऽत्र न्यायः । एतदत्र साधुरित्यर्थः । भ्रेष-न्ययं गतः पापः । विशेष्यलिंगवचनाविव विशेषणानां ।

१०५३ ॥ य्वृग्रह्वृदृगम्वश्रणोऽच् । २ । ३ । ५४ । इ उ ऋ इत्येतदंतेभ्यो ग्रह् वृ दृ गम् वश् रण् इत्येतेभ्यश्च धुभ्यो भावेऽकर्त्तरि अच् त्यो भवति, घञोपऽवादः । इ-चयः । जयः । क्षयः । क्रयः । उ-नवः । स्तवः । पवः । लवः । ऋ-तरः । धरः । ग्रहादि-ग्रहः । वरः । आदरः । गमः । वशः । रणः ।

१०५४ ॥ स्थादिभ्यः कः । २ ।३ । ७० । स्थाप्रभृतिभ्यो धुभ्यो भावेऽकर्त्तरि कस्त्यो भवति । प्रतिष्ठतेऽस्मिन्-इति प्रस्थः । संतिष्ठतेऽस्यामिति संस्था । व्यवतिष्ठंतेऽनयेति व्यवस्था । प्रस्नांत्य-स्मिन्निति प्रस्नः । प्रपिबंत्यस्मिन् इति प्रपा । विध्यतेऽनेनेति विधः । " व्यशिव्यधि- " इत्यादिना यण इक् । आविध्यतेऽस्मिन्निति-आविधः । विहन्यतेऽस्मिन्ननेन वा विघ्नः । आयुध्यतेऽनेनेति-आयुधः ।

१०५५ ॥ ड्वितः क्त्रिः ।२।३।७४। डुशब्देतो धोर्भावेऽकर्तरि क्त्रिस्त्यो भवति । क्त्रयंतस्य केवलस्याप्रयोगात् " भावादिमः क्त्रिः " इतीमपर एव प्रयुज्यते । डुपचौञ्—पाकेन निर्वृत्तमित्यस्व-पदेन विग्रहः । पक्त्रिमम् । डुवपीञ्—उप्त्रिमं । डुयाचृ-याचित्रिम ।

डुधाञ्-विहित्रिमं । डुकृञ्-कृत्रिमं ।

१०५६ ॥ गौ भोः किः । २ । ३ । ७८ । गौ वाचि भुसंज्ञकात् धोर्भावेऽकर्त्तरि किर्भवति । प्रधानं प्रधीयते इति धेटो धाञो वा-प्रधिः । एवं-विधिः । निधिः । उपाधिः । समाधिः । आदानं आदीयतेऽस्मात्-इति दारूपाणां चतुर्णामन्यतमस्मात् किः । आदिः ।

१०५७ ॥ कर्मण्याधारे । २ । ३ । ७९ । कर्मणि वाचि भोरकर्त्तरि आधारे किर्भवति । जलं धीयतेऽस्मिन्निति जलधिः । शरधिः । इषुधिः । वारिधिः ।

१०५८ ॥ युज्यद्विच्छप्रच्छस्वप्रक्षो नङ् । २ । ३ । ७९ । युज् यत् विच्छ् प्रच्छ् स्वप् इत्येतेभ्यो भावेऽकर्तरि नङ् भवति । युजनं—युञ्जः । यत्नः । विश्नः । प्रश्नः । स्वप्नः । रक्ष्णः । विच्छेरनेबर्थे क्ङित्करणं ।

१०५९ ॥ याच्ञा । २ । ३ । ७७ । याच्ञेति स्त्रियां भावेऽकर्तरि नङ् निपात्यते । याचनं—याच्ञा ।

१०६० ॥ स्त्रियां क्तिः । २ । ३ । ८० । स्त्रीलिंगे भावेऽकर्तरि वर्तमानाद्धोः क्तिस्त्यो भवति । घञादेरपवादः । दृश्-दृष्टिः । सृज्—सृष्टिः । चितिः । कृतिः । भ्रांतिः । शांतिः । "ऋस्य झल्क्ङयोः क्ङिति" इति दीत्वं । कीर्णिः ।

१०६१ ॥ शीण्विन्निषन्निपद्सुन्समजः । २ । ३ । ८१ । शीप्रभृतिभ्योऽकर्त्तरि स्त्रियां खौ क्यप् भवति । शेरतेऽस्यामिति शय्या । यंत्यस्यामनयेति वा इत्या । विदंत्यस्यां तया वा कर्मकामौ इति विद्या । निषदंत्यस्यां निषद्या । निपद्यंतेऽस्यां निपद्या । मन्यतेऽनया मन्या । सुनोत्यस्यां सुत्या । समजंत्यस्यां समज्या । संशीतिः ।

समितिः । वित्तिः । मतिः । सुतिः । इत्यादि बहुलवचनात् सिद्धं ।

१०६२ ॥ संपदादिभ्यः क्विप्क्तिः । २ । ३ । ९१ । संपदादिभ्यो धुभ्यो भावेऽकर्तरि स्त्रियां क्विब्भवति क्तिश्च । संपत् । संपत्तिः । विपत् । विपत्तिः । आपत् । आपत्तिः । परिषत् । परिषत्तिः । आशीः ।

१०६३ ॥ ण्यासश्रिविद्ग्रंथिघट्टिवंदोऽनः । २ । ३ ।९४। णि आस् विद् श्रंथि घट्टि वंद इत्येतेभ्यः स्त्रियां भावेऽकर्तरि अनस्त्यो भवति । णि इति णिङ्णिचोः सामान्यग्रहणं । भावना । कामना । कारणा । हारणा । योजना । लक्षणा । आसना । वेदना । श्रंथना । घट्टना । वंदना ।

१०६४ ॥ त्यात् । २ । ३ । ९९ । त्यांतेभ्यो धुभ्यो भावेऽकर्तरि स्त्रियामत्यो भवति । कित रोगापनयने ।

१०६५ ॥ किद्गुप्तिजः सन् भिषज्यादिनिंदाक्षमे । २ । १ । ३ । किद् गुप् तिज् इत्येतेभ्यो यथासंख्यं भिषज्यादौ निंदायां क्षमायां चार्थे वर्तमानेभ्यः सन् इत्ययं त्यो भवति स्वार्थे । चिकित्सा । गुप् रक्षणे । "गुपूधूप्विच्छपन्पणेरायः" इत्यायः । गोपाया । चिकीर्षा । पुत्रीया । पुत्रकाम्या । लोलूया । कंडूया । अटाट्या ।

१०६६ ॥ सरोर्हलः । २ । ३ । १०० । सह रुणा वर्तमानात् हलंताद्धोः भावेऽकर्तरि स्त्रियामत्यो भवति । कुडिङ् दाहे । उपदेशावस्थायामेव " इदिद्धोर्नुम् " इति नुम् । कुंडा । हुडिङ् संपाते । हुंडा । शिक्षा । भिक्षा । ईहा । ऊहा ।

१०६७ ॥ षिद्भिदादिभ्योऽङ् । २ । ३ । १०१ । षिद्भ्यो भिदादिभ्यश्च भावेऽकर्तरि स्त्रियां अङ्त्यो भवति । जृष्— ।

१०६८ ॥ दृशूरेप् ५ । २ । १४३ । दृशेः ऋवर्णांतानां च गूनामाङि परतः एप् भवति । इत्येप् । रंतत्वं । टाप् । जरा । त्रपूष्—त्रपा । क्षिप्—अयादेशः । क्षया । क्षमूष्—क्षमा । घटादयःषितः । घटैष्—घटा । व्यथैष्—व्यथा । प्रथैषि—प्रथा । भिदा विदारणे । भित्तिरन्या । भिदा द्वैधीकरणे । विदा विचारणे । वित्तिरन्या । क्षिपा प्रेरणे । क्षितिः । इत्यादि ।

१०६९ ॥ चिंतिपूजिकथिकुंबिचर्चः । २ । ३ । १०१ । चिंत्यादिभ्यो भावेऽकर्तरि स्त्रियां अङ्त्यो भवति । चिंत्यादयो हि चुरादिण्यंताः । णेः खं । चिंता । पूजा । कथा । कुंबा । चर्चा । भूषिभेषिस्पृहिलोलिदोलिभ्यश्चेति वक्तव्यं । भूषा । भिषा । स्पृहा । लोला । दोला ।

१०७० ॥ गावातः । २ । ३ । १०३ । आकारांताद्धोर्भावेऽकर्तरि स्त्रियामङ्त्यो भवति । प्रज्ञायते अस्यां—प्रज्ञा । प्रदीयतेऽस्यां प्रदा । प्रधीयतेऽस्यां प्रधा । उपधा । "इटि चात्खं" इत्यात्खं । टाप् ।

१०७१ ॥ करणाधारे चानट् । २ । ३ । ११२ । करणे आधारे च भावे च धोरनट् भवति । घञाद्यपवादः । टित्वात् स्त्रियां ङीः । वृश्च्यतेऽनेनेति व्रश्चनः । इध्मनां व्रश्चनः इध्मव्रश्चनः । शात्यतेऽनेनेति शातनः । पलाशानां शातनः—पलाशशातनः । लूयतेऽनेनेति लवनः । श्मश्रुकर्तनः । आधारे—शेरतेऽस्मिन् इति-शयनं । आस्यतेस्मिन्निति आसनं । अधिक्रियतेऽस्मिन्निति अधिकरणं । गौर्दुह्यतेऽस्यामिति गोदोहनी । तिलाः पीड्यतेऽस्यामिति तिलपीडनी । सक्तुधाना । नब्भावे—हसनं । जल्पनं । शयनं । आसनं । वदनं । भोजनं । चंदनानुलेपनं ।

१०७२ ॥ पुंखौ घः प्रायः । २ । ३ । ११३ । धोः पुलिंगे खौ करणाधारयोः घस्त्यो भवति प्रायः । क्वचिद्भवति क्वचिन्न भवतीत्यर्थः । घकारः " छादेर्घे " इत्यत्र विशेषणार्थः । करणे–प्रच्छाद्यतेऽनेनेति प्रच्छदः । " छादेर्घे " इत्युक्तः प्रः । उरश्छाद्यतेऽनेनेति उरश्छदः। दंताश्छाद्यतेऽनेनेति दंतच्छदः। प्लवतेऽनेनेति प्लावः। आखन्यतेऽनेनेति आखनः। करः । आधारे–एत्य कुर्वंत्यस्मिन् इति–आकरः। एत्य लुनंत्यस्मिन्निति आलवः । एत्य पुनंत्यस्मिन्–आपवः। पुंखाविति किं ? प्रहरणो दंडः। पुंग्रहणं किं ? प्रदानं। प्राय इति किं ? प्रासादनः।

१०७३ ॥ खनेर्डडरेकेकबकाश्च । २ । ३ । ११५ । खनेर्धोः करणाधारयोः पुंखौ ड डर इक इकबक इत्येते त्या भवंति । चकारात् घश्च । आखन्यतेऽनेनास्मिन् वा–आखः । आखरः । आखनिकः । आखनिकबकः । आखनः ।

१०७४ ॥ घञ् । २ । ३ । ११६ । खनेः करणाधारेषु घञ् भवति । आखानः । पृथग्वचनमुत्तरार्थं ।

१०७५ ॥ तृस्त्रोऽवे । २ । ३ । ११७ । तृ स्तृ इत्येताभ्यां अवशब्दे वाचि करणाधारे पुंखौ घञ् भवति । अवतारः । समवतारः । अवस्तारः ।

१०७६ ॥ हलः । २ । ३ । ११८ । हलंताद्धोः करणाधारयोः पुंखौ घञ् भवति । घापवादः । वेदः । चेष्टः । वेगः । नेगः । लेखः । गंडः । बंधः । संगः । निमार्गः । विमार्गः । अपामार्ग । " घञि प्रायः " इति दीः । आरामः । प्रासादः ।

१०७७ ॥ स्त्रीषद्दुसि कृच्छ्राकृच्छ्रे खः । २ । ३ ।

१२१ । करणाधारनिवृत्तं । सु ईषत दुस् इत्येतेषु कृच्छ्राकृच्छ्रवृत्तिषु वाक्षु धोः खो भवति घञाद्यपवादः । कृच्छ्रं दुःखं । अकृच्छ्रं सुखं । यथासंभवं विशेषणं । सुखेन शय्यते इति सुशयं भवता । ईषच्छयं भवता । दुःखेन शय्यते इति दुश्शयं भवता । एवं-सुकरः । दुष्करः । ईषत्करः कटो भवता ।सुबोधं काव्यं । ईषद्बोधं नाटकं । दुर्बोधं व्याकरणं।

१०७८ ॥ कर्तृकर्मणोर्भूकृञ्भ्यां च्वौ । २ । ३ । १२२ । स्वीषद्दुस्सु कृच्छ्राकृच्छ्रार्थेषु वाक्षु कर्तृकर्मणोश्च च्व्यर्थे वर्तमानयोः वाचोर्यथासंख्यं भूकृञ्भ्यां खो भवति । सुखेनानाढ्येन आढ्येन भाव्यमिति विग्रहे–खः । " खित्यङ्गे कृति, मुमचः " इति मुम् । स्वाढ्यंभवं भवता । ईषदाढ्यंभवं भवता । दुराढ्यंभवं भवता । सुखेनानाढ्य आढ्यः क्रियते स्वाढ्यंकरो जिनदत्तः । ईषदाढ्यंकरः । दुराढ्यंकरो भवान् ।

१०७९ ॥ आतोऽनः । २ । ३ । १२३ । स्वीषद्दुस्सु कृच्छ्राकृच्छ्रार्थे वाचि धोराकारांतादनस्त्यो भवति । खापवादः । सुखेन ग्लायते इति सुग्लानं । ईषद्ग्लानं । दुर्ग्लानं । सुज्ञानं । ईषद्ज्ञानं । दुर्ज्ञानं तत्त्वं ।

१०८० ॥ शास्युधधृषमृषदृशोऽते । २ । ३ । १२४ । पूर्वयोगापेक्षयांते दुसि कृच्छ्रार्थे वाचि शास् युध् धृष् मृष् दृश् इत्येतेभ्यो धुभ्योऽनस्त्यो भवति । दुःशासनः । दुर्योधनः । दुर्धर्षणः । दुर्मर्षणः । दुर्दर्शनो राजा ।

१०८१ ॥ निषेधेऽलंखल्वोः क्त्वा । २ । ४ । ४ । निषेधवृत्त्योरलंखलु इत्येतयोर्वाचोर्धोः क्त्वात्यो वा भवति । अलं कृत्वा । खलुकृत्वा । अलं बाले रुदित्वा रुदितेन रोदनेन । पक्षेक्तोऽनद् च ।

१०८२ ॥ परकालैककर्तृकात् । २ । ४ । ७ ।
परः कालो यस्याः सा परकाला क्रिया तयैकः कर्ता यस्य स तथा । तस्माद् संबंधिशब्दात् पूर्वकालवाचिनो धोः क्त्वात्यो भवति वा । स्नात्वा भुङ्क्ते । भुक्त्वा व्रजति । व्रजित्वा करोति । कृत्वा शेते ।

१०८३ ॥ मृड्मृद्गुध्कुष्वद्वसः क्त्व । १ । १ । ९५ ।
मृडादीनां क्त्वात्ये परे किद्वत्कार्यं भवति नान्येषां ।

१०८४ ॥ रुद्विद्मुषग्रहस्वपप्रच्छां सनि च । १ । १ । ९७ । रुदादीनां सनि क्त्वात्ये किद्वद् भवति । रुदित्वा । विदित्वा । मुषित्वा । गृहीत्वा । सुप्त्वा । पृष्ट्वा ।

१०८५ ॥ नोङ्स्थफवंचिलुंच्यृतितृष्मृष्कृशः क्त्व । १ । १ । ११० । नकारोङस्थकारफकारांतस्य धोर्वंचि लुंचि ऋति तृषि मृषि कृश इत्येतेषां किद्वद् कार्यं भवति क्त्व परे । श्रथित्वा, श्रंथित्वा । गुफित्वा, गुंफित्वा । वचित्वा । वंचित्वा । लुचित्वा । लुंचित्वा । ऋतित्वा । अर्त्तित्वा । तृषित्वा । तर्षित्वा । मृषित्वा । मर्षित्वा । कृशित्वा, कर्शित्वा ।

१०८६ ॥ व्युङोऽवो हलः सन्क्त्वोः । १ । १ । १११ ।
उकारोङो धोरिकारोङश्चावकारांतस्य हलादेस्सेटि सनि क्त्वात्ये च किद्वद् भवति वा । द्युतित्वा, द्योतित्वा । लिखित्वा, लेखित्वा ।

१०८७ ॥ नशजोर्वा । ४ । ४ । ३३ । नशो जकारस्य च गोरुङो वकारस्य खं वा भवति क्त्वात्ये परे । नष्ट्वा । नंष्ट्वा । भक्त्वा, भंक्त्वा ।

१०८८ ॥ वोदितः । ५ । १ । ११० । उदितो धोः परस्य क्त्वात्यस्य वा इट् भवति । देवित्वा । वर्त्तित्वा । ध्वंसित्वा ।

पक्षे-ऊठादिः । दूत्त्वा । वृत्वा । ध्वस्त्वा । "दोसोमास्थां ति कितीद्" इतीत्वं । सित्वा । मित्वा । दो दद्भोः इति ददादेशः । दत्त्वा । "धाञो हिः" हित्वा ।

१०८९ ॥ हाकः क्त्वि । ५ । २ । १६१ । हाको हिरादेशो भवति क्त्वाख्ये । हित्वा राज्यं । "क्तित्यदो जग्धिः" इति जग्ध्वा ।

१०९० ॥ प्यस्तिवाक्से क्त्वः । ५ । १ । ३१ । तिसे वाक्से क्त्वात्यस्य प्यादेशो भवति । प्रस्तुत्य । प्रकृत्य । अधिकृत्य । उच्चैः कृत्याचष्टे । नानाकृत्य गतः । तिवाक्से इति किं ? अकृत्वा । परमकृत्वा ।

१०९१ ॥ प्ये । ४।४।४० । हनादीनां प्ये परे खं भवति । प्रहृत्य । प्रमत्य । प्रवत्य । प्रतत्य ।

१०९२ ॥ वा मः । ४ । ४ । ४१ । मकारांतानां हनादीनां प्ये परे खं भवति वा । नियत्य, नियम्य । विरत्य, विरम्य । आगत्य, आगम्य ।

१०९३ ॥ प्ये च । ४ । ३ । १० । दीङो नित्यमात्वं भवति प्ये एप्विषये च । उपदाय । अवदाय । उपदाता ।

१०९४ ॥ मिञ्मीञोरखाचि । ४ । ३ । ५० । मिञ् मीञ् इत्येतयोरात्वं भवति प्ये खाज्वर्जिते एञ्विषये च । निमाय गतः । प्रमाय गतः ।

१०९५ ॥ वा लीङ्लिनात्योः । ४ । ३ । ५१ । लिङ्लिनात्योः आत्वं भवति वा प्ये खाज्वर्जिते एञ्विषये च । विलाय, विलीय ।

१०९६ । णेः । ४ । ४ । ५७ । णेः खं भवत्यगे । प्रकाश्य । उत्तार्य । उपभोज्य । अनुभाव्य । अध्याप्य । प्रस्थाप्य । प्रतिपाद्य ।

१०९७ ॥ ण्येऽय् घिपूर्वात् । ४ । ४ । ६० । घिपूर्वात् वर्णात् परस्य णेरयादेशो भवति ण्ये परतः । प्रविभिदय्य । प्रच्छिदय्य । प्रशमय्य । प्रतमय्य । प्रकथय्य । प्रगणय्य गतः ।

१०९८ ॥ पूर्वाग्रेप्रथमाभीक्ष्ण्ये खमुञ् । २ । ४ । ८ । पूर्व अग्र प्रथम इत्येतेषु वाक्षु आभीक्ष्ण्ये च क्त्वर्थोपाधौ गम्यमाने परकालैककर्तृकाद्धोः खमुञ् भवति । पूर्वंभोजं । पूर्वं भुक्त्वा । अग्रेभोजं । अग्रेभुक्त्वा । प्रथमंभोजं । प्रथमं भुक्त्वा व्रजति । आभीक्ष्ण्ये–

१०९९ ॥ प्राग्भृशाभीक्ष्ण्याविच्छेदे । ५ । ३ । ३ । क्रियायाः साकल्यमवयवक्रियाणां वा कार्त्स्न्यं भृशार्थः । पुनः पुनरावृत्तिराभीक्ष्ण्यं । सातत्यमविच्छेदः । एतेषु यत्परं वाक्यं वा वर्तते तस्य प्रागातिखाङ्कादेः सर्वस्य द्वे रूपे भवतः । भोजंभोजं । भुक्त्वा भुक्त्वा व्रजति । पायं पायं । पीत्वा पीत्वा व्रजति ।

ईक्षमीक्षं तदा बाले रोधं रोधं च मामनु ।
आयमायं निवृत्ता या जीवेदेकाकिनी कथं ॥

११०० ॥ कर्मण्याक्रोशे । २ । ४ । ११ । कर्मणि वाचि करोतेरेककर्तृकात् खमुञ् भवति आक्रोशे गम्यमाने । चोरंकारं, चोरं कृत्वा क्रोशति । चौरोऽसीत्याक्रोशतीत्यर्थः ।

११०१ ॥ समर्थास्त्यर्थशकधृषज्ञाग्लाघटरभलभक्रमसहार्हे तुम् । २ । ४ । ४७ । समर्थार्थेषु अस्त्यर्थेषु शकादिषु च वाक्षु धोस्तुम् भवति । समर्थो भोक्तुं । पर्याप्तो भोक्तुं । अस्ति भोक्तुं । भवति भोक्तुं । शक्नोति भोक्तुं । धृष्णाति भोक्तुं । जानाति भोक्तुं । ग्लायति भोक्तुं । घटते भोक्तुं । आरभते भोक्तुं । आलभते भोक्तुं । प्रक्रमते भोक्तुं । सहते भोक्तुं । अर्हति भोक्तुं ।

११०२ ॥ कृत् कर्तर्यञ्जिः । २ । ४ । ४८ । ञ्जिवर्जिताः कृतः कर्तरि भवंति । कारकः । कर्त्ता । कुंभकारः । अञ्जिरिति किं ? कर्तुं व्रजति । कर्तुमिच्छति । कारंकारं व्रजति । अनिर्दिष्टार्थास्तुमादयः स्वार्थे भावे भवंति ।

११०३ ॥ जन्भूगो यो वा । २ । ४ । ५१ । जन्भूगा इत्येतेभ्यो यस्त्यो वा कर्तरि भवति । जन्यो देवदत्तः । जन्यं देवदत्तेन । भव्यो देवदत्तः । भव्यं देवदत्तेन । गेयो देवदत्तः गाथानां । गेया गाथा देवदत्तेन ।

११०४ ॥ श्लिष्शीङ्स्थास्वस्जन्रुहृजृषारंभात् क्तः । २ । ४ । ५४ । श्लिषादिभ्यो धुभ्य आरंभार्थेभ्यश्च यः क्तः स कर्तरि वा भवति । आश्लिष्टो भवान् कन्यां । आश्लिष्टा कन्या भवता । शीङ्—अतिशयितो गुरुं । अतिशयितो गुरुर्भवता । स्था—उपस्थितो गुरुं भवान् । उपस्थितो गुरुर्भवता । आस्—उपस्थितो गुरुं भवान् । उपास्थितो गुरुर्भवता । वस्-अनूषितो गुरु भवान् । अनूषितो गुरुर्भवता । जन्—अनुजातः कन्यां भवान् । अनुजाता कन्या भवता । रुह्—आरूढो वृक्षं भवान् । आरूढो वृक्षो भवता । जृष्—अनुजीर्णो वृषलीं भवान् । अनुजीर्णा वृषली भवता । आरंभः—प्रकृतं कटं भवान् । प्रकृतः कटो भवता । प्रकृतं भवता ।

११०५ ॥ तयोर्व्यक्तखार्थः । २ । ४ । ५८ । तयोः कर्मभावयोः व्यक्तखार्था भवंति । कर्तव्यः कटः । कार्यः कटः । कृतः कटः । सुकरः । सुज्ञानं तत्त्वं भवता । भावे—शयितव्यं । शयितं । सुशयं । सुग्लानं भवता । सकर्मकात् कर्मणि अकर्मकात् भावे यथा स्युरेते इति व्यवस्थार्थस्तयोरिति । व्यानड्

बहुलमिति बहुलवचनात् अन्यत्रापि ल्यानटो भवंति । ज्ञानमावृणो-ति आव्रियतेऽनेनेति वा ज्ञानावरणीयं । एवं-दर्शनावरणीयं । वेदनीयं । मोहनीयं कर्म । स्नानीयं चूर्णं । दीयतेऽस्मादिति दानीयोऽतिथिः । निरदंति तदिति निरदनः । राज्ञा भुज्यंते राजभोजनाः शाल्यः । संप्रदीयतेऽस्मा इति संप्रदानं । अपादीयतेस्मादिति-अपादानं । अत एवान्येऽपि कृतोऽन्यत्रापि भवंति । पादाभ्यां ह्रियते इति पाद-हारकः । गलेन चुप्यते गलचोपकः । अत्र कर्मणि ण्वुः । चरोऽड्डुक्तः । मनसि हृञोऽपि । मनोहरतीति मनोहारी ।

इति प्रक्रियावतारे कृद्विधिः षष्ठः समाप्तः ।
समाप्तेयं प्रक्रिया ।

सत्संधिं दधते समासमभितः ख्यातार्थनामोन्नतं
निर्ज्ञातं बहुतद्धितं क्रममिहाख्यातं यशःशालिनां ।
सैषा श्रीगुणनंदितानितवपुः शब्दार्णवं निर्णयं
नावत्याश्रयतां विविक्षुमनसां साक्षात् स्वयं प्रक्रिया ॥१॥
दुरितमदेभनिशुंभत्कुंभस्थलभेदनक्षमोऽग्रनखैः ।
राजन्मृगाधिराजो **गुणनंदी** भुवि चिरं जीयात् ॥२॥
सन्मार्गे सकलसुखप्रियकरे संज्ञापिते सद्वने
प्राग्वासस्सुचरित्रवानमलकः कांतो विवेकी प्रियः ।
सोयं यः श्रुतकीर्तिदेवयतिपो भट्टारकोत्तस्सको,
रंरम्यान्मम मानसे कविपतिः सद्राजहंसश्चिरं ॥३॥